Digitized by Arya Samaj Foundation Chennai and eGangotri

94340

SIDDHĀNTA-KAUMUDĪ

[Kāraka-prakaraṇa]

OF

BHAṬṬOJI DĪKṢITA

Edited with
An Elaborate English Exposition
&
Critical Annotations

By

BISHNUPADA BHATTACHARYA
Principal, Sanskrit College, Calcutta.

R
491.25
DIK-S

SANSKRIT PUSTAK BHANDAR : CALCUTTA-700006

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

aj Foundation C

SIDDHANTA-KAUMUDĪ

R
11·95
K·9

TACHARYA

n. Gurukul Kang

Digitized by Arya Samaj Foundation Chennai and eGangotri
R
491.25
DIK-S
74340.

R
491.25
DIK-S पुस्तकालय
गुरुकुल कांगड़ी विश्वविद्यालय
विषय संख्या आगत नं० 74340
लेखक Dikshit Bhattoji
शीर्षक Siddhanta Kaumudi

	सदस्य संख्या	दिनांक	सदस्य संख्या

गुरुकुल कांगड़ी विश्वविद्यालय
कृपया पुस्तक के ऊपर कोई निशान आदि न लगायें।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

491.25; DIK-S
74340

SIDDHĀNTA-KAUMUDĪ

[Kāraka-prakaraṇa]

OF

94340

BHAṬṬOJI DĪKṢITA

Edited with
An Elaborate English Exposition
&
Critical Annotations

BY

BISHNUPADA BHATTACHARYA
Principal, Sanskrit College, Calcutta.

Stock Verification 2024

SANSKRIT PUSTAK BHANDAR : CALCUTTA–700006

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Published by :
Sri Shyamapada Bhattacharjee
Sanskrit Pustak Bhandar
38, Bidhan Sarani, Calcutta–700006

All rights reserved by the Author

First Edition
September, 1974

R
491.25
DIK-2

Price : { Popular Edition [illegible]
Deluxe Edition Rs. 20.00

Printed by :
D. P. Mitra
The Elm Press
63, Beadon Street.
Calcutta–6

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar.

Digitized by Arya Samaj Foundation Chennai and eGangotri

SIDDHĀNTA-KAUMUDĪ

[Kāraka-prakaraṇa]

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

PREFACE

This edition of Bhaṭṭoji's *Siddhānta-kaumudī* (*Kāraka-prakaraṇa*) has been prepared out of lecture notes made from time to time for Degree Course students. Emphasis has been mainly laid on the elucidation of intricate points in Bhaṭṭoji's *vṛtti* on the *sūtras*, and obvious points have been left out.

The *Siddhānta-kaumudī* is justly regarded as the basic text meant for beginners willing to be introduced to the Pāṇinian system and it incorporates almost all the fundamental tenets and conclusions of the Pāṇinīyas relating to the analytical aspect (*prakriyā*) of Sanskrit Grammar as opposed to its metaphysical aspect (*darśana*) for which Bhartṛhari's *magnum opus*—viz. *Vākya-padīya*, Koṇḍa Bhaṭṭa's *Vaiyākaraṇa-bhūṣaṇa*, Nāgeśa's *Laghu-siddhānta-mañjūṣā* etc. are to be consulted. The title *Siddhānta-kaumudī* employed by Bhaṭṭoji for designating his work has been explained by Nāgeśa in his *Bṛhat-śabdendu-śekara* as follows :—

"सिद्धान्तप्रकाशकत्वेनातिदुरूहग्रन्थान्तरेभ्यः सिद्धान्तज्ञाने जायमानस्य क्लेशरूपसन्तापस्य शामकत्वेन च कौमुदीसादृश्यम् ॥"

Bhaṭṭoji's work is mainly based upon and much indebted to Rāmacandra's *Prakriyā-kaumudī*, which is also apparent from the titles of the two works. The name *Prakriyā-kaumudī* has been explained in the commentary *Prasāda* thus :—

"प्रक्रियन्ते प्रकृतिप्रत्ययादिविभागेन व्युत्पाद्यन्ते शब्दा आभिस्ताः प्रक्रियाः। 'कृञः श च' इति करणे शप्रत्ययः। 'रिङ् शयग्लिङ्क्षु' इति रिङ्। तासु कौमुदी। 'संज्ञायाम्' इति सप्तमीतत्पुरुषः। कौमुदीव कौमुदी सुखं जनयन्ती सर्वशब्दप्रकाशिका। अथवा प्रक्रिया कौमदीव प्रक्रियाकौमुदी। 'उपमितं व्याघ्र—' इति समासः।"

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Bhaṭṭoji (*circa* 1636 A. D.), in his *vṛtti*, has often adopted *verbatim* the statements and illustrations of Rāmacandra (*circa* 1450 A. D.) without referring to him by name, and we have occasionally tried to point out these borrowings in our notes. Bhaṭṭoji also criticises frequently the views of the author of the *Prakriyā-kaumudī* and its commentaries called *Prasāda* of Viṭṭhala and *Prakāśa* of Kṛṣṇa in his *Prauḍha-manoramā*, the learned auto-commentary on his own *Siddhānta-kaumudī*. From all this it is quite evident that "these works were very popular in his time and the *Prakriyā* was used as a model for the *Kaumudī*".

In preparing the notes much care has been taken to trace the sources of Bhaṭṭoji's statements and views, and excerpts from the *Mahābhāṣya*, *Kāśikā*, *Nyāsa*, *Padamañjarī*, Kaiyaṭa's °*Pradīpa*, Nāgeśa's °*Uddyota* and *Laghu-śabdendu-śekhara*, Bhaṭṭoji's *Śabda-kaustubha*, Bhartṛhari's *Vākya-padīya* and Helārāja's commentary thereon and similar other authoritative works besides the two well-known commentaries-viz. *Tattva-bodhinī* and *Bāla-manoramā* have been copiously given in order to elucidate the knotty points, which, it is hoped, would render this edition useful to inquisitive students of the Pāṇinian system.

There has been inordinate delay in bringing out this edition, announced long ago, due to circumstances beyond our control, for which we crave the indulgence of all concerned.

Dated, Calcutta,
the 21st August, 1974 — Author

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वैयाकरणसिद्धान्तकौमुदी

कारकप्रकरणम्

अथ प्रथमा विभक्तिः

§ 532. प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा ।। —II.3.46.

दीक्षितः ।। नियतोपस्थितिकः प्रातिपदिकार्थः । मात्रशब्दस्य प्रत्येकं योगः । प्रातिपदिकार्थमात्रे लिङ्गमात्राद्याधिक्ये संख्यामात्रे च प्रथमा स्यात् । उच्चैः । नीचैः । कृष्णः । श्रीः । ज्ञानम् ।

अलिङ्गा नियतलिङ्गाश्च प्रातिपदिकार्थमात्र इत्यस्योदाहरणम् ।। अनियतलिङ्गास्तु लिङ्गमात्राधिक्यस्य । तटः । तटी । तटम् ।

परिमाणमात्रे द्रोणो व्रीहिः । द्रोणरूपं यत् परिमाणं तत्-परिच्छिन्नो व्रीहिरित्यर्थः । प्रत्ययार्थे परिमाणे प्रकृत्यर्थोऽभेदेन संसर्गेण विशेषणम् । प्रत्ययार्थस्तु परिच्छेद्यपरिच्छेदकभावेन व्रीहौ विशेषणमिति विवेकः ।।

वचनं संख्या । एकः । द्वौ । बहवः । इहोक्तार्थत्वाद्विभक्ते-रप्राप्तौ वचनम् ।।

Exposition

§ What is a प्रातिपदिक ? Pāṇini has defined a प्रातिपदिक in the following two *sūtras*—viz. 'अर्थवदधातुरप्रत्ययः प्रातिपदिकम् । कृत्तद्धितसमासाश्च ।।'—I. 2. 45-46.—which again are supplemented by a *Vārttika* of Kātyāyana—viz. 'निपातस्यानर्थकस्य प्रातिपदिकत्वम्' (I. 2. 45. 12) [But the Bhāṣyakāra seems to reject the above

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Vārttika on the ground that the *sūtra*—'अधिपरी अनर्थकौ'(I.4.93.) teaching the कर्मप्रवचनीयसंज्ञा of such unmeaning particles as अधि and परि implies that Pāṇini himself regarded अनर्थक निपात's too as प्रातिपदिक's].

(1) Thus any collection of letters (वर्णसमुदाय) *having a meaning*, which is other than a धातु (root), which is neither by itself प्रत्यय (suffix) nor a प्रत्ययान्त (ending in a प्रत्यय), is a प्रातिपदिक ; (2) a word ending in a कृत् or a तद्धित suffix is a प्रातिपदिक ; (3) a compound (समास) is a प्रातिपदिक ; (4) and lastly, *meaningless indeclinable particles* (अनर्थक निपात's), too, are प्रातिपदिक's.

What is प्रातिपदिकार्थ or the meaning expressed by a प्रातिपदिक ? Dikṣita says "नियतोपस्थितिकः प्रातिपदिकार्थः"—*i.e.* the *sense* that is always and *invariably* comprehended by the hearer wherever a प्रातिपदिक (as defined above) is heard, that *sense* is the meaning expressed by the प्रातिपदिक—it is the प्रातिपदिकार्थ. Thus, the प्रवृत्तिनिमित्त and its आश्रय—*i.e.* the substratum, constitute प्रातिपदिकार्थ. As MM. Śivadatta says : "नियतोपस्थितिर्यस्य सोऽर्थात् यस्मिन् प्रातिपदिके उच्चारिते यस्यार्थस्य नियमेन भानं स प्रातिपदिकार्थः। स च प्रवृत्तिनिमित्तं तदाश्रयश्चेति तावेवात्र प्रातिपदिकार्थपदेन गृह्येते—लिङ्गपदोपादानात् ।"

Vāmana and Jayāditya in the *Kāśikā* explain प्रातिपदिकार्थ as सत्ता—"प्रातिपदिकार्थः सत्ता" ; for, *existence* (सत्ता) alone is the *invariable* element in the sense conveyed by a प्रातिपदिक. Cf. : "न सत्तां पदार्थो व्यभिचरति". Rāmacandra, too, says 'प्रातिपदिकार्थः सत्ता' which has been explained by Viṭṭhala in his commentary °*Prasāda* as 'सत्तेत्युपलक्षणम्। यत्रार्थान्तरानपेक्षया शब्दस्य प्रवृत्तिः स एव प्रातिपदिकार्थः। शब्दप्रवृत्तिनिमित्तम् इति यावत् ।'

Words that have *no genders* (अलिङ्ग) and that have *constant genders* (नियतलिङ्ग) take प्रथमा by प्रातिपदिकार्थमात्रे प्रथमा, since the *gender too* in their case is present as an *invariable* element in the meaning expressed by them. Thus,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अव्ययs like उच्चैः, नीचैः and words like कृष्णः, श्रीः and ज्ञानम् are instances of प्रातिपदिकार्थमात्रे प्रथमा, since in the case of अव्ययs there is *no gender at all*, while in the others (कृष्णः, श्रीः, ज्ञानम्) the genders (*masculine*, *feminine* and *neuter*) are respectively *constant*. It should be noted, however, that when the word कृष्ण refers to Lord Vāsudeva, then and then only it has a constant gender ; but when it expresses a thing possessing the *quality of blackness*, it has a *variable gender*, and as such should not then take प्रथमा by प्रातिपदिकार्थमात्रे प्रथमा, but by लिङ्गमात्राधिक्ये प्रथमा. See *Bālamanoramā* on this point. *Tattvabodhinī*, too, says "यद्यपि नीलद्रव्ये अयमनियतलिङ्गः, तथापि वासुदेवे भगवति नियतपुंलिङ्ग इति भावः ।"

§ **लिङ्गमात्राधिक्ये प्रथमा**—Though at the end of the द्वन्द्व compound—viz. 'प्राति०—०वचन', we have the word ०मात्रे only, still in the case of लिङ्ग and परिमाण, it should be construed to mean लिङ्गमात्राधिक्ये and परिमाणमात्राधिक्ये, inasmuch as the sense of लिङ्ग and परिमाण is *something over and above* the *constant and invariable connotation* of a प्रातिपदिक (नियतोपस्थितिकः प्रातिपदिकार्थः). As *Tattvabodhinī* puts it : "यद्यपि लिङ्गमात्रे परिमाणमात्रे इत्येवाक्षरार्थः तथापि प्रातिपदिकार्थं विना लिङ्गादि - प्रतीतेरसम्भवात् इति तदाधिक्य इत्युक्तम् ।"

'अलिङ्गाः......अनियतलिङ्गास्तु लिङ्गमात्राधिक्यस्य'—(Dikṣita)—As we have already pointed out, in the case of अव्ययs (that have *no genders*) and of words like कृष्णः, श्रीः, ज्ञानम् (that have *fixed genders*), the gender too is present as a constant element within the connotation of the term (*i.e.* प्रातिपदिकार्थ), so these are cases of प्रातिपदिकार्थमात्रे प्रथमा. But when a *term* (प्रातिपदिक) has a *variable gender* (अनियतलिङ्ग), like तट, which take of three genders without any difference in connotation, the *gender* is not present as a constant element within the connotation. So the *sense of gender* being *something in addition to* the fixed

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

connotation of the term, it cannot take प्रथमा according to प्रातिपदिकार्थमात्रे प्रथमा. It is thus a case of लिङ्गमात्राधिक्ये प्रथमा. Example - तटः, तटी, तटम्.

The conception of gender of terms varies according to different teachers. Patañjali in his *Mahābhāṣya* defines लिङ्ग as 'संस्त्यानप्रसवौ लिङ्गम्' (*Mbh.* on P.1.2.64) : "संस्त्यानं संहतिरपचयः। प्रसवः प्रसूतिरुपचय इत्यर्थः। तथा संस्त्यानविवक्षायां स्त्री। प्रसवविवक्षायां पुमान्। उभयोरविवक्षायां नपुंसकमिति। तत्र क्वचिदुपचयो यथा वृक्षः। क्वचिदपचयो यथा गङ्गा। क्वचिदुपचयापचयाभावो यथा ज्ञानम्। क्वचिदुपचयापचयौ। यथा मृगः मृगी। क्वचित् त्रयं यथा तटः, तटी, तटम् इति॥"

There are various conceptions, *seven in all*, regarding gender as recorded by Bhartṛhari in the *Prakīrṇakāṇḍa* of his *Vākyapadīya*. As Viṭṭhala says : "लिङ्गप्रकारविशेषास्तु भर्तृहरिणा प्रकीर्णकाण्डे उक्ता ज्ञेयाः। तेन च—

'स्तनकेशादिसम्बन्धो विशिष्टा वा स्तनादयः।
तदुपव्यञ्जना जातिर्गुणावस्था गुणास्तथा॥
शब्दोपजनितोऽर्थात्मा शब्दसंस्कार इत्यपि।
लिङ्गानां लिङ्गतत्त्वज्ञैः विकल्पाः सप्त दर्शिताः॥'

—इत्यारभ्य

'इदमयमियं चेति शब्दसंस्कारमात्रकम्।
निमित्तदर्शनादर्थः कैश्चित् सर्वत्र वर्ण्यते॥
नावश्यं विषयत्वेन निमित्तं व्यवतिष्ठते॥'[1]

—इत्यन्तेन ग्रन्थसन्दर्भेण सर्वप्रकारविशिष्टं लिङ्गं सम्यग् विचारितम्॥—*Prasāda*.

§ परिमाणमात्रे द्रोणो व्रीहिः।....परिच्छिन्नो व्रीहिरित्यर्थः—Dikṣita.

The examples of परिमाणमात्रे (i.e. परिमाणमात्राधिक्ये) प्रथमा is द्रोणो [व्रीहिः]. Here the word व्रीहिः has been mentioned with a view to pointing out clearly that the word द्रोणः (with प्रथमा) does not merely denote the *wooden pot* called द्रोण used for measuring quantities of rice etc. In that case, it would have

1 For the citations *vide* Bhartṛhari's *Vākya-padīya*, III. 13.1-2, 30-31.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

been taken as an instance of प्रातिपदिकार्थमात्रे प्रथमा. But here the word द्रोण is used to denote the thing (viz. rice) measured (परिमित) by *the pot called* **द्रोण** *which is a unit of measure* and consequently is an adjective to व्रीहिः. Thus, besides denoting a wooden pot called द्रोण (which is the प्रातिपदिकार्थ), the word द्रोणः denotes *the pot as a standard of measure and also the thing* (*here* व्रीहि) *measured by it*. These last two meanings are conveyed by प्रथमा ('सु'). So it cannot be regarded as a case of प्रातिपदिकार्थमात्रे प्रथमा.

Cf, "खारी द्रोण इति परिमाणस्य उदाहरणम्। ननु चात्र प्रातिपदिकार्थे इत्येव प्रथमा। तथाहि द्रोणादयः शब्दा लौहे दारुमये वा परिमाणे अर्थान्तर-निरपेक्षा एव वर्तन्ते। सत्यं सिद्धा यदा परिमाणे वर्तन्ते। यदा तु तत्परिमिते धान्यादौ सोऽयमित्यभिसम्बन्धात् वर्तन्ते द्रोणपरिमितो व्रीहिः द्रोणः इति तत्र प्रथमा न स्यात्। अतः परिमाणग्रहणम्।.... तच्चोन्मानादेरप्युपलक्षणम्। तेन घृतं पलं, हस्तः पटः, दीर्घं काष्ठम् इति अत्रापि प्रथमा स्यात्।"—*Prasāda*.

As regards various units of measurement consult Kauṭilya'a *Arthaśāstra*, II. 19. (तुलामानपौतवम्) and *Amarakośa*, II. 9. 85-89. Regarding difference between उन्मान, परिमाण, प्रमाण etc. cf. "मितिर्मानं मीयतेऽनेन च। तत्र तुलाद्युन्मानम्, अङ्गुल्यादि प्रमाणं, प्रस्थादि परिमाणम्। यदाहुः—

ऊर्ध्वं मानं किलोन्मानं परिमाणं तु सर्वतः।
आयामस्तु प्रमाणं स्यात् संख्या बाह्या तु सर्वतः॥"

—Kṣīrasvāmin on *Amara*°, II. 9. 85

In the *Kaśikā-vivaraṇa-pañjikā* Jinendrabuddhi states. : "परिमाणग्रहणञ्च यत्र निमित्तादर्थान्तरे सोऽयमित्यभेदसम्बन्धाच् शब्दः प्रवर्तते तदुपलक्षणार्थं वेदितव्यम्। तेन परिमाणवद् अर्थान्तरभूतेष्वपि उन्मानादिषु प्रथमा भवति। घृतं पलम्। दीर्घं काष्ठम्। शुक्लः पटः। हस्तो मुष्टिर्वितस्तिरित्येवमादि सिद्धं भवति। कुत एतत्? मात्रशब्दात्। स ह्यत्र व्याप्तिवचनो गृह्यते। यथा कन्यामात्रं वरयतीति। ब्राह्मणमात्रं भोजयतीति। तेन परिमाणग्रहणस्यैव उपलक्षणार्थता विज्ञायते। यदि तु यथा पयोमात्रं भूङ्क्ते इत्यत्र मात्रशब्दो नियमार्थस्तथेहापि नियमार्थ एव स्यात् ततश्च उन्मानादिषु प्रथमा न स्यात्। तस्य परिमाणादन्यत्वात्।"—Vol. I., pp. 422-423.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

§ **प्रत्ययार्थ......इति विवेकः** (*Dīkṣita*)—According to Dīkṣita the प्रातिपदिकार्थ of the stem द्रोण is द्रोणपरिमाणविशेष and the meaning of the प्रत्यय 'सु' (प्रथमा–एकवचन) is परिमाणसामान्य. Thus, the meanings conveyed by the two parts (viz. प्रकृति and प्रत्यय) of the word 'द्रोणः' are related together on the basis of the relation of identity (अभेदसंसर्ग). Again, the meaning of the प्रत्यय 'सु'—viz. परिमाणसामान्य, is related to व्रीहिः on the basis of the relation of परिच्छेद्यपरिच्छेदकभाव which is thus a भेदसंसर्ग*, so that the resultant knowledge aroused by the expression 'द्रोणो व्रीहिः' is– "द्रोणाख्यपरिमाणविशेषात्मकं यत् सामान्य-परिमाणं तत्परिच्छिन्नो व्रीहिः"—as *Bālamanoramā* puts it. Vide *Tattvabodhinī* on this point : "न च प्रकृतिप्रत्ययार्थयोर-भेदान्वयो दुर्लभः, पचति, पाचकः, औपगव इत्यादौ सर्वत्र भेदान्वयस्यैव दृष्ट-त्वादिति वाच्यम्। देवतार्थकतद्धितादौ अभेदान्वयस्य दृष्टत्वात्। 'ऐन्द्रं हविः' इत्यत्र हि इन्द्रदेवताकं हविः इति वोधः सर्वैरेवाभ्युपगम्यत इति नास्ति शङ्कावसर इति भावः।"

§ **वचनं........अप्राप्तौ वचनम्** (Dīkṣita)—The word वचन is a संज्ञा (technical term) recognised by Pāṇini's predecessors to denote numbers and accepted by Pāṇini himself. As the *Tattvabodhinī* notes : "वचनं संख्येति। वाच्यवाचकयोरभेदाध्यवसायेन तथैव पूर्वाचार्य्याणां व्यवहारादिति भावः।"

It should be noted that 'एकः' 'द्वौ' 'वहवः' are instances of 'वचनमात्रे प्रथमा' and not वचनमात्राधिक्ये as it has been construed in the case of लिङ्ग and परिमाण to denote respectively लिङ्ग-मात्राधिक्ये and परिमाणमात्राधिक्ये for वचन or संख्या is the प्रातिपदि-कार्थ of words like एक, द्वि, वहु. Though, as such, एकः, द्वौ, बहवः should have been regarded as instances of प्रातिपदिकार्थमात्रे प्रथमा, yet Pāṇini mentions 'वचन' in the *sūtra* separately, for, otherwise, according to the अधिकारसूत्र—"अनभिहिते" (II. 3.1) and

* In both these cases the dictum "नामार्थयोरभेदान्वयः" is equally applicable.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

the dictum 'उक्तार्थानाम् अप्रयोगः', the affixes सु औ जस् denoting एकत्व, द्वित्व and बहुत्व would not have come after एक, द्वि and बहु respectively[1]. Cf. 'उक्तेष्वप्येकत्वादिषु प्रथमा यथा स्यात् इति वचन-ग्रहणम् । अन्यथा अनभिहिताधिकाराद् उक्तेषु एकत्वादिषु न स्यात्'—°*Prasāda* . See also *Bālamanoramā*.

§ In the *Prakriyā-Kaumudī* Rāmacandra cites three other instances of प्रातिपदिकार्थे प्रथमा—viz. कृदर्थे युङ्, तद्धितार्थे औपगवः and समासार्थे चित्रगुः, since by the rule 'कृत्तद्धितसमासाश्च' (1.2.46) कृदन्त and तद्धितान्त words are regarded as प्रातिपदिक's. Viṭṭhala in his °*Prasāda* thereon says : 'कृत्तद्धितसमासाश्च' इति कृदन्तस्य तद्धितान्तस्य समासस्य च प्रतिपदिकत्वात् कृदर्थादौ प्रातिपदिकार्थेत्य-नेनैव प्रथमा स्यादित्याह । कृदर्थेत्यादि । युङ् । युजिर् योगे अस्मात् कर्त्तरि 'ऋत्विग्-दधृक्.........'(II.2. 69) इति क्विन् । औपगव इति । उप-गोरपत्यम् । 'तस्यापत्यम्' इत्यर्थेऽण् तद्धितः। चित्रगुरिति। चित्रा गावो यस्य इति 'अनेकमन्यपदार्थे' (II. 2. 24) इत्यन्यपदार्थे वहुव्रीहिः समासः ॥

§ 533. **सम्बोधने च** ॥—II.3.47.

दीक्षितः । इह प्रथमा स्यात् । हे राम ।

Exposition

Though Pāṇini might have incorporated 'सम्बोधन' in the previous *sūtra*, just like लिङ्ग, परिमाण and वचन to mean सम्बोधनमात्राधिक्ये, thus making it 'प्रातिपदिकार्थ......वचनसम्बोधनमात्रे प्रथमा' which would have been more economic,[2] yet he breaks it up into a separate aphorism to denote that this particular rule *alone* is to be construed with the *two subsequent rules*—viz. "सामन्त्रितम् । एकवचनं सम्बुद्धिः" (II. 3. 48-49). Had

---

1 Cf. बहुषु बहुवचनम् । द्वेकयोर्द्विवचनैकवचने ॥—I. 4.21–22.

2 *Vide* the Paribhāṣā—'अर्धमात्रालाघवेन पुत्रोत्सवं मन्यन्ते वैयाकरणाः'.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Pāṇini made it a part of the previous rule, then the whole *sūtra* would have to be construed with the *two subsequent sūtras* cited above[1]. As Jinendrabuddhi states: "योगविभाग उत्तरार्थः।"

It is to be noted, however, that instances like 'हे पचन्' 'हे पचमान' etc. should be regarded as cases of प्रातिपदिकार्थे प्रथमा, because the idea of सम्बोधन is itself a part of the प्रातिपदिकार्थ as it is conveyed by the suffixes शतृ and शानच् respectively according to the rule 'सम्बोधने च' (III. 2. 125)[2]. As Jinendrabuddhi notes: 'अथ कथमिह प्रथमा? हे पचन्, हे पचमानेति। कथञ्च न स्यात्? शतृशानज्भ्याम् उक्तत्वात् सम्बोधनस्य। एतावपि 'सम्बोधने च' (III. 2. 125) इति सम्बोधन एव..। मा भूदनेन। पूर्वसूत्रेण भविष्यति। सम्बोधनार्थस्येह 'कृत्तद्धितसमासाश्च' (I. 2. 46) इत्यनेन प्रातिपदिकार्थत्वात्।' Also note: 'हे पचन् हे पचमानेत्यत्र सम्बोधनस्य शतृशानज्भ्याम् उक्तत्वात् प्रातिपदिकार्थान्तर्भूतत्वात् पूर्वेणैव प्रथमा।'—°*Prasāda*.

॥ इति प्रथमा ॥

1 *Vide* the Paribhāṣā—"एकयोगनिर्दिष्टानां सह वा प्रवृत्तिः सह वा निवृत्तिः।"

2 Cf. 'सम्बोधने च विषये लटः शतृशानचौ प्रत्ययौ भवतः। हे पचमान।—*Kāśikā, loc. cit.*

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथ द्वितीया विभक्तिः

§ 534. कारके ॥—1.4.26

दीक्षितः ।। इत्यधिकृत्य ।।

Exposition

§ This is an अधिकारसूत्र. As Dīkṣita observes: 'इत्यधिकृत्य'. The word 'कारके' construed with the subsequent rules like 'ध्रुवमपायेऽपादानम्' etc. qualifies the संज्ञा's like 'अपादान' etc. As Vāmana says : 'कारक इति विशेषणम् अपादानादिसंज्ञाविषयमधिक्रियते'—*Kāśikā.* Here the word कारक does not mean an *agent* or *doer* (कर्तृ), but it is used here as a synonym of निमित्त or हेतु (*cause*). The कारक's like अपादान, सम्प्रदान etc. are but *auxiliary causes of actions* (क्रिया) : 'कारकशब्दश्च निमित्तपर्य्यायः। कारकं हेतुरिति नामान्तरम्। कस्य हेतुः ? क्रियायाः।'—*Kāśikā.* Jinendrabuddhi elucidates the above text of the *Kāśikā* as follows : 'कारकशब्दोऽयमस्त्येव व्युत्पन्नो ण्वुलन्तः कर्तृपर्याय इति। अस्ति च संज्ञाशब्दोऽव्युत्पन्नो निमित्तपर्यायः इति। तत्रेह यदि पूर्वोक्तस्य ग्रहणं स्यात् तदापादानादिषु कारकशब्दो न वर्त्तेत। यथा कर्तृशब्दो 'ण्वूल्तृचौ' (III. 1. 133) इति कर्त्तरि व्युत्पादितस्तथा कारकशब्दोऽपि। कर्ता च स्वतन्त्रः। अपादानादयश्च अस्वतन्त्राः। तत् कथं तेषु कारकव्यपदेशः स्यात् ? असति हि कारकव्यपदेशे कारकसंशब्दनेषु तेषां ग्रहणं न स्यात्। अथ तेषामपि कथञ्चित् स्वतन्त्रताऽभ्युपेयेत, एवञ्च तत्र कर्तृसंज्ञा प्रसज्येत। निमित्तपर्य्यायस्य तु कारकशब्दस्य ग्रहणे न दोषः स्यात्। ततः स एव गृह्यते इति मत्वाह कारकशब्दोऽयं निमित्तपर्य्याय— इति। ग्रामादागच्छति इति। ग्रामस्य ध्रुवस्य आगमनक्रियां प्रति निमित्तभावोऽस्ति। यदीह ग्रामोऽवधिभावेन नावतिष्ठेत तत आगमनं न निष्पद्येत। तस्माद् ग्रामः कारकम्।"—*Kāśikā-vivaraṇa-pañjikā.* Jñānendra Sarasvatī in his *Tattva-bodhinī* takes the सप्तमी in 'कारके' as

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

a substitute for प्रथमा, so that 'कारके' actually means 'कारकम्': "तत्र हि व्यत्ययेन प्रथमार्थे सप्तमी। प्रतिसूत्रं वाक्यं भित्त्वा कारकसंज्ञाऽनेन विधीयते। तद्यथा—अपाये ध्रुवं कारकसंज्ञं स्यात्। ततोऽपादानम्। उक्तं कारकमपादानं स्यात्". But Jinendrabuddhi construes सप्तमी in 'कारके' to signify the sense of निर्धारण, the only irregularity being that *singular* has been used for the usual *plural* ending :—'कारक' इति निर्धारणे सप्तमी। निर्धारणं तु बहूनां सम्भवति। तत्कथमेकवचनेन निर्देशः? सामान्यापेक्षया तु एकवचनम् अथवा छन्दोवत् सूत्राणि भवन्ति। ततो 'व्यत्ययो बहुलम्' (II. 1. 85) इति बहुवचने प्राप्ते एकवचनम्। कारकेषु मध्ये यद् ध्रुवं कारकं तदपादानसंज्ञं भवति। एवमन्यत्रापि वेदितव्यम् इति।" It is to be noted that if Jinendrabuddhi's interpretation is accepted there is no need for resorting to वाक्यभेद or splitting up an aphorism into two different independent statements as has been done by the author of the *Tattvabodhinī*.

The term कारक is a *significant* one. As *Tattvabodhinī* observes : "अन्वर्था चेयं संज्ञा करोतीति कारकम् इति। तेन ब्राह्मणस्य पुत्रं पन्थानं पृच्छतीति क्रियान्वयिनो न भवति। ब्राह्मणो ह्यत्र पुत्रविशेषणं न तु क्रियान्वयीति।"

§ 535. कर्त्तुरीप्सिततमं कर्म ॥—I.4.49

दीक्षितः ॥ कर्त्तुः क्रिययाऽऽप्तुमिष्टतमं कारकं कर्मसंज्ञं स्यात् ॥ 'कर्त्तुः' किम्? माषेष्वश्वं बध्नाति ॥ कर्मण ईप्सिता माषा न तु कर्त्तुः ॥ तमब्ग्रहणं किम्? पयसा ओदनं भुङ्क्ते ॥ 'कर्म' इत्यनुवृत्तौ पुनः कर्मग्रहणमाधारनिवृत्त्यर्थम्। अन्यथा 'गेहं प्रविशति' इत्यत्रैव स्यात् ॥

Exposition

§ Though there is no mention of क्रिया in the aphorism yet the *vṛtti* explains it as 'कर्त्तुः क्रियया आप्तुमिष्टतमम्' because कर्त्ता (*agent*) is the substratum of क्रिया (*action*), so that

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

they being thus correlated, the mention of the one necessarily implies the other. As Prasāda says : "अत्र यद्यपि क्रिययेति नोक्तं तथापि "कर्तुः"-शब्दस्य सम्बन्धिशब्दत्वात् क्रियोपस्थानम् इति". Here the षष्ठी (sixth case-ending) in कर्त्तुः is according to the rule 'शेषे षष्ठी' (II. 3. 50) and not 'क्तस्य च वर्तमाने' (II. 3. 67) in connection with the word 'ईप्सित[-तम]' ending in वर्त्तमाने क्त. Cf. "एतेन कर्त्तुरिति नेप्सिततमापेक्षया 'क्तस्य च वर्त्तमाने' इत्यनेनेयं षष्ठी। अपि तु क्रियापेक्षया शेषलक्षणैवेति दर्शयति। ननु च नेह क्रियोपात्ता। तत् कथं तदपेक्षया षष्ठी प्रयुज्यते ? यद्यपि नोपात्ता तथापि कर्त्तुः क्रियापेक्षत्वात् कर्त्तृशब्दोऽयं सम्बन्धिशब्द इति कर्त्तृसम्बन्धिनीं क्रियामुपस्थापयतीत्यदोषः। ईप्सितशब्दोऽस्ति रूढ़िशब्दः ईप्सितोऽभिप्रेतः इति। अस्ति च क्रियाशब्द आप्तुमिष्ट ईप्सित इति। तत्रेह क्रियाशब्दो गृह्यते। नेतरः। न हि रूढ़िशब्दस्य क्रियया कर्त्तृसाध्यया सम्बन्धं उपपद्यते"—Jinendrabuddhi.

According to Bhartṛhari ईप्सिततम कर्म is of three kinds—viz. निर्वर्त्त्य, विकार्य्य and प्राप्य —

'निर्वर्त्त्यं च विकार्य्यं च प्राप्यं चेति त्रिधा मतम्।
तत्रेप्सिततमं कर्म.............. ॥'—*Vākyapadīya*, III.7.45

Vide also : "तच्च कर्म त्रिविधम्। निर्वर्त्त्यं विकार्यं प्राप्यञ्च। तत्र निर्वर्त्त्यं यदसदेव उत्पाद्यते। यस्य जन्म क्रियते तन्निर्वर्त्त्यम्। यथा कटं करोति। कटो ह्यसन्नेव क्रियते। विकार्य्यं लब्धसत्ताकमवस्थान्तरमापाद्यते। यथा काष्ठानि भस्मीकरोति (भस्म करोति)। नात्र काष्ठानि असन्त्येव जन्यन्ते कारणान्तरेभ्यः प्रागेव उत्पन्नत्वात्। उत्पन्नानि केवलं भस्माख्यामवस्थामापाद्यन्ते। प्राप्यं यत्र व्याप्तिव्यतिरेकेण क्रियाकृता विशेषा न विभाव्यन्ते। यथाऽदित्यं पश्यति। न हि दृशिक्रियया व्याप्यमानस्य सवितुः प्राप्तेरन्यः क्रियाकृत-विशेष उपलभ्यते इति प्राप्यञ्चैतत् कर्म॥"—Jinendrabuddhi.

§ कर्म इत्यनुवृत्तौ......इत्यत्रैव स्यात् (Dīkṣita)—Here Dīkṣita justifies the use of the word कर्म in the *sūtra*. The *Pūrvapakṣin* says : In the *sūtra* "अधिशीङ्स्थासां कर्म" (I. 4. 46) the word कर्म is once used, so it can easily be construed in the present *sūtra* (I. 4. 49) as well by अनुवृत्ति. Consequently the use of the same word in the present *sūtra* is redundant. To

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

this the *Siddhāntī* replies : The argument set forth by the *Pūrva-pakṣin* is defective inasmuch as he overlooks the fact that in the *sūtra* (I. 4. 46) the word कर्म is related with आधार which follows from the immediately preceding *sūtra* (I. 4. 45)—viz. 'आधारोऽधिकरणम्'. So, if it is to be construed in the present *sūtra* the word आधार also would follow along with it, so that the *sūtra* would mean in that case "कर्त्तुरीप्सिततम आधारः कर्मसंज्ञः स्यात्", which would have limited the scope of its application. But by the use of the word कर्म afresh in the present *sūtra* the Sūtrakāra indicates that the word कर्म related to आधार in the *sūtra* I. 4. 46 ceases to follow in the present *sūtra*. *Vide* Jinendrabuddhi : 'कर्म इत्यनुवर्त्तमाने इति—'अधिशीङ्स्थासां कर्म' इत्यतः। पुनरित्यादि। पूर्वं कर्मग्रहणमाधारेण सम्बद्धम्। अतस्तदनुवृत्तौ तस्यानुवृत्तिः स्यात्। अत आधारनिवृत्त्यर्थं पुनः कर्मग्रहणं क्रियते। यदि पुनराधारोऽनुवर्त्तते ततः किं स्यात् इत्यत्राह—आधारस्यैव हि स्यात् इति। हि-शब्दो यस्मादर्थे। यस्मादाधारस्यानुवृत्तौ तस्यैव स्यात् तस्मात् तन्निवृत्त्यर्थं पुनः कर्मग्रहणमिति सम्बन्धः। क्व पुनराधारस्यैव स्यादित्यत्राह—गेहमित्यादि।"

§ 536. अनभिहिते ॥—II.3.1.

दीक्षितः ॥ इत्यधिकृत्य—

Exposition

§ This is an अधिकारसूत्र. As the *Kāśikā* states : "अनभिहिते-इत्यधिकारोऽयं वेदितव्यः। यदित ऊर्ध्वमनुक्रमिष्यामोऽनभिहित इत्येवं तद्वेदितव्यम्". When the attributes like कर्मत्व, करणत्व etc. of something with reference to some action (क्रिया) *are not expressed* (अनुक्त) by any other *word, suffix etc.* then the case-ending (विभक्ति) enjoined in the subsequent *sūtras* are added to a word denoting that thing. There are two different views as to the usefulness of this *sūtra* viz.—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(i) According to one view, the number (संख्या) is regarded as the वाच्य of a विभक्ति. So the endings (of द्वितीया etc.) like अम्, औ,, शस् etc. do not merely indicate कर्मत्व etc. but also एकत्व, द्वित्व and बहुत्व of the *substratum* of कर्मत्व etc. If the present *sūtra* is not accepted, the rules like 'कर्मणि द्वितीया' would apply in the case of कृतः कटः, for though the कर्मत्व of कट has been clearly expressed by the suffix 'क्त' in 'कृतः', yet the एकत्व of कट being left *unexpressed*, the suffix अम् (2nd case-ending singular) must have to be added after कट to express it. But if the present *sūtra* be accepted, there would be no such possibility, since in conjunction with rules like 'कर्मणि द्वितीया' etc. it would mean that when the एकत्व etc. of anything having the attributes कर्मत्व etc., that *are not expressed* by any word or suffix, have to be conveyed the endings like अम्, औ, शस् etc. should be added. Thus, in कृतः कटः the 'कर्मत्व of कट being already *expressed* by the suffix क्त, the ending अम् is not added to the word कट. So in this view the formulation of the present *sūtra* is justified. Vide : "बहुषु बहुवचनम्" (I. 4.21) इत्येवमादिना संख्या वाच्यत्वेन विभक्तीनामुपदिष्टाः। तत्र विशेषणार्थ–मिदमारभ्यते। अनभिहितकर्माद्याश्रयेष्वेकत्वादिषु द्वितीयादयो वेदितव्या इति।'—*Kāśikā.* "एतेन 'बहुषु बहुवचनम्' इत्यादेः शास्त्रस्य 'अनभिहिते' इत्येतस्य च 'कर्मणि द्वितीया' (II.3 2) इत्येवमादिभिः सह एकवाक्यतां दर्शयति। अनभिहिते कर्मणि द्वितीया बहुषु बहुवचनम् इति। एवमन्यत्राप्येकवाक्यता वेदितव्या। एकवाक्यता च गुणप्रधानभावमन्तरेण न सम्भवति इत्येकस्य गुणभावेन भवितव्यम्, अपरस्य च प्रधानभावेन। तत्र विशेषणत्वादनभिहित इत्यस्य कर्माद्यपेक्षया गुणभावः। कर्मादीनां तु विशेष्यत्वात् प्राधान्यम्। एकत्वाद्यपेक्षया कर्मादीनान्तु विशेषणत्वादप्राधान्यम्। एकत्वादीनां विशेष्यत्वात् प्रधानभावः।"—Jinendrabuddhi on *Kāśikā* II. 3. 1. The *Tattva-bodhinī* makes the point clearer : "ननु बहुपटुरित्यादौ बहुच् प्रत्ययेन उक्तार्थत्वात् कल्पबादयो यथा न प्रवर्त्तन्ते तथा क्रियते कट इत्यादौ अपि तिङादिभिरुक्तार्थत्वात् द्वितीया न भविष्यति।.......अत्राहुः—'संख्या विभक्त्यर्थः' इति पक्षे सूत्रारम्भः आवश्यकः। तथाहि सूत्रारम्भे 'कर्मणि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्वितीया' इत्यस्य अनभिहिते कर्मणि यदेकत्वं तत्र द्वितीयैकवचनम् इत्यर्थः। सूत्रानारम्भे च कर्मणि यदेकत्वं तत्र द्वितीयैकवचनमिति हि वाक्यार्थः। तथा च सति कृतः कटः इत्यादौ क्तेन कर्ममात्रोक्तौ अपि तदेकत्वस्य अनुक्ततया अम् दुर्वारः स्यात्।"

(ii) According to the other view that does not regard संख्या as the वाच्य of a विभक्ति, but considers the कारक (कर्म etc.) as its वाच्य, the *sūtra* is useless and can well be left out. The *Tattvabodhini* states this viewpoint as follows :—"कारकं विभक्त्यर्थः इति पक्षे तु कारकस्य क्त-प्रत्ययादिना एव उक्तत्वात् प्रातिपदिकार्थे प्रवृत्तायाः प्रथमायाः एकत्वादिबोधनसम्भवाच्च अमादिविभक्तेरप्रवृत्तौ 'अनभिहिते' इति सूत्रं प्रत्याख्यातम् आकरे इति।" *Vide* also *Bālamanoramā* under the next *sūtra*.

§ 537. कर्मणि द्वितीया—II. 3.2.

दीक्षितः ।। अनुक्ते कर्मणि द्वितीया स्यात् । हरिं भजति । अभिहिते तु कर्मणि 'प्रातिपदिकार्थमात्रे' इति प्रथमैव । अभिधानं च प्रायेण तिङ्कृत्तद्धितसमासैः । तिङ्—हरिः सेव्यते । कृत्—लक्ष्म्या सेवितः । तद्धित—शतेन क्रीतः शत्यः । समास—प्राप्त आनन्दो यं स प्राप्तानन्दः ।। क्वचिन्निपातेनाभिधानम् । यथा—'विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसाम्प्रतम्'। 'साम्प्रतम्'-इत्यस्य हि युज्यत इत्यर्थः ।।

Exposition

§ अभिधानं च प्रायेण.........प्राप्तानन्दः —(Dīkṣita). The कर्मत्व, कर्तृत्व, करणत्व etc. inherent in an object with reference to some action can be expressed by a तिङ्, कृत्, तद्धित or समास. The instance of कर्मत्व being expressed by—(i) a तिङ् प्रत्यय is हरिः सेव्यते. According to the rule "लः कर्मणि च भावे चाकर्मकेभ्यः" (III. 4. 69) the suffix त is added to the root to express the idea of कर्मत्व inherent in हरि; so, द्वितीया is no more

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

added to हरि, which takes प्रथमा according to 'प्रातिपदिकार्थे प्रथमा';

(ii) a कृत् प्रत्यय is हरिः सेवितः. The क्त is added to the root in कर्मवाच्य according to the rule "तयोरेव कृत्य-क्त-खलर्थाः" (III. 4. 70). As the *Bālamanoramā* notes : "अत्र सेवितहरेः कर्मणः कृता अभिहितत्वात् न द्वितीया" ;

(iii) a तद्धित is शत्यः (पटादिरिति शेषः). Here the कर्मत्व of objects like पट (cloth) etc. with reference to the action of क्रय being already expressed by the तद्धित suffix 'यत्' added to शत according to the rule "शताच्च ठन्-यतावशते" (V. 1. 21) द्वितीया is not added after words like पट etc. to indicate कर्मत्व ;

(iv) a समास is प्राप्तानन्दः (हरिः)—Here the बहुव्रीहि compound expresses the idea of कर्मत्व inherent in हरि with reference to the action of प्राप्ति. So, द्वितीया is no more added after the word हरि.

It is to be noted that Bhaṭṭoji Dīkṣita has taken these instances bodily from Rāmacandra's *Prakriyā-Kaumudī* and has only changed the order of instances to make them accord with the order laid down in the statement 'अभिधानं च प्रायेण तिङ्-कृत्-तद्धित-समासैः', which is based upon the *Vārttika* 'तिङ्-कृत्-तद्धित-समासैः परिसंख्यानम्' (II. 3. 1. 5) [not accepted in the *Siddhāntakaumudī*]. Rāmacandra illustrates as follows : "सेव्यते सेवितो लक्ष्म्या प्राप्तानन्दः सदा हरिः। तद्धितोक्तौ शतेन क्रीतः शत्यः।"

§ क्वचिन्निपातेन.......युज्यत इत्यर्थः—(Dīkṣita). Bhaṭṭoji has introduced the word प्रायेण in the *Vārttika* : 'तिङ्-कृत्-तद्धित-समासैः परिसंख्यानम्' in order to include निपात's (*indeclinables*), that sometimes express the idea of कर्मत्व etc., when the case-endings like द्वितीया etc. are not used 'विषवृक्षोऽपि....असाम्प्रतम्' (*Kumāra*° II .55). Here the word 'साम्प्रतम्' is an अव्यय meaning —'युज्यते', thus expressing the idea of कर्मत्व inherent in विषवृक्ष, which as such does not take द्वितीया. Śaraṇadeva in his

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Durghaṭavṛtti, however, regards 'साम्प्रतम्' as a तद्धितान्त अव्यय, so that विषवृक्षोऽपि according to him should properly be regarded as a case of तद्धितेनाभिधानम्. As he observes "[कथं] 'विषवृक्षोऽपि संवर्द्ध्य स्वयं छेत्तुमसाम्प्रतम्' इति कुमारः ? 'क्रमादमुं नारद इत्यबोधि सः' इति माघः ? उच्यते—सम्प्रति भवं साम्प्रतम्, न साम्प्रतम् असाम्प्रतम् इति तद्धितान्तमव्ययम् । तथा इतिशब्दः कृदन्ताव्ययम् । ततश्च कृत्तद्धिताभ्यामभिहितत्वात् न द्वितीया । 'अव्ययेनाभिहितेऽपि न द्वितीया' 'कृत्तद्धितसमासैः परिसंख्यानम्' इत्यस्य सम्भवप्रदर्शनार्थत्वात् इति रक्षितः । कथं तर्हि 'वदन्त्यपर्णामिति तां पुराविदः' इति कुमारः, इतिशब्देनोक्तत्वात् ? उच्यते—पुराविद इत्यस्मादनन्तरमितिशब्दो द्रष्टव्यः' ॥" [T.S.S. Edn.]

§ 538. तथायुक्तं चानीप्सितम् ॥—I.4.50.

दीक्षितः ॥ ईप्सिततमवत् क्रियया युक्तमनीप्सितमपि कारकं कर्मसंज्ञं स्यात् । ग्रामं गच्छंस्तृणं स्पृशति । ओदनं भुञ्जानो विषं भुङ्क्ते ॥

Exposition

§ The negative particle in the term 'अनीप्सितम्' indicates the idea of *otherness* (अन्यत्व) and not of *absolute negation.* So, anything which is *other than* ईप्सित would be known as कर्म and as such take द्वितीया, if it be related in the *same way* to the क्रिया as the thing which is *the most desired to be had* (ईप्सिततम). The *Kāśikā-vṛtti* explains the force of the particle नञ् as follows: "ईप्सितादन्यत् सर्वम् अनीप्सितं द्वेष्यमितरच्च । विषं भक्षयति, चौरान् पश्यति, ग्रामं गच्छन् वृक्षमूलान्युपसर्पति". Thus, it is not a case of प्रसज्यप्रतिषेध, but of पर्युदास. (Vide *Nyāsa*). 'द्वेष्यं प्रतिकूलं यथा विषचौरादि । इतरदप्रतिकूलं यथोक्तप्रकाराणि वृक्षमूलानि'. Now, one may raise the objection that in विषं भक्षयति, विष (poison) should be regarded as an ईप्सिततम कर्म, for one who is extremely afflicted with poverty, disease etc. really desires to drink poison with full knowledge as a means of escape. So

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

how can it be regarded as अनीप्सित ? To this the *Tattva-bodhinī* replies that when a man is forced to drink poison under duress by an enemy then विष cannot be regarded as ईप्सिततम. So in that case विष can take द्वितीया by the present rule alone. Cf : "अत्र विषं हेयमपि ओदनवद् भुजिना सम्बन्धात् कर्म। ननु य एव पुरुषो व्याध्यादिना पीड्यमानो मरणमेव श्रेयो मन्यते तस्य विषमपि ईप्सितमेव। योऽपि भ्रान्त्या प्रयुङ्क्ते तस्यापि गुड़ादिवद्बुद्ध्या व्यवसीयमानं विषमीप्सितमेव। कथमन्यथा प्रवर्त्तेत। तस्मादिदमुदाहरणमयुक्तमेव इति चेत्। अत्राहुः—यदा कश्चित् मरणकातरोऽपि वैरिणा निगृह्यमाणो विषं भुङ्क्ते तदेदमुदाहरणमिति ॥"—*Tattvabodhinī.*

§ 539. अकथितं च ॥—I.4.51.

दीक्षितः ॥ अपादानादिविशेषैरविवक्षितं कारकं कर्मसंज्ञं स्यात् ॥

दुह्याच्पच्दण्ड्रुधिप्रच्छिचिब्रूशासुजिमन्थ्मुषाम् ।
कर्मयुक् स्यादकथितं तथा स्यान्नीहृकृष्वहाम् ॥

दुहादीनां द्वादशानां तथा नीप्रभृतीनां चतुर्णां कर्मणा यद्युज्यते तदेवाकथितं कर्मेति परिगणनं कर्त्तव्यमित्यर्थः। गां दोग्धि पयः। बलिं याचते वसुधाम्। अविनीतं विनयं याचते। तण्डुलानोदनं पचति। गर्गान् शतं दण्डयति। व्रजमवरुणद्धि गाम्। माणवकं पन्थानं पृच्छति। वृक्षमवचिनोति फलानि। माणवकं धर्मं ब्रूते शास्ति वा। शतं जयति देवदत्तम्। सुधां क्षीरनिधिं मथ्नाति। देवदत्तं शतं मुष्णाति। ग्राममजां नयति, हरति, कर्षति, वहति वा।

अर्थनिबन्धनेयं संज्ञा। बलिं भिक्षते वसुधाम्। माणवकं धर्मं भाषते, अभिधत्ते, वक्तीत्यादि। कारकं किम्? माणवकस्य पितरं पन्थानं पृच्छति ॥

"अकर्मकधातुभिर्योगे देशः कालो भावो गन्तव्योऽध्वा च कर्मसंज्ञक इति वाच्यम् ॥" (वार्त्तिक) ॥ कुरून् स्वपिति। मासमास्ते। गोदोहमास्ते। क्रोशमास्ते ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Exposition

§ अपादानादि ....स्यात्। (Dikṣita)—In this rule the term अकथित signifies the sense of अनुक्त or अकीर्त्तित and not of अप्रधान (subordinate). As Haradatta points out in his *Padamañjari* : "अकथितशब्दोऽयमस्ति अप्रधाने रूढः, तद्‌यथा अकथितोऽहमस्मिन् ग्रामे, अप्रधानभूत इति गम्यते । अस्ति च क्रियाशब्दोऽकीर्त्तितपर्यायः । "कथ वाक्यप्रबन्धे" चुरादौ अदन्तः पठचते । तत्र पूर्वस्य ग्रहणे पाणिना कांस्यपात्र्यां दोग्धि पय इत्यत्र पाणिकांस्यपात्र्योरपि स्यात्। करणाधिकरणसंज्ञयोस्तु पचत्यादिरवकाशः, न हि तत्रास्य प्रसङ्गः, दुहि-याचीति परिगणनात् । अतो द्वितीयस्य ग्रहणम्, तदाह केनाकथितम् ? अपादानादिभिर्विशेषकथाभिरिति । किमत्र प्रमाणं तदाह—केनेति। करणनिर्देशः । रूढ़िशब्देषु हि व्युत्पत्त्यर्थमेव क्रियोपादीयते, न तत्र करणादि सम्बध्यते, न हि गच्छतीति गौरित्यत्र केनेति प्रश्नो रथेनेति प्रतिवचनं वा भवति। इह 'कारके' इत्यनुवर्तनात् सत्येव कारकत्वेऽकथितस्य संज्ञया भाव्यमिति सामर्थ्याद् विशेषकथाभिरित्युक्तम् ।"—*Op. cit.*, Vol. I. p. 204. Thus, when any of the several कारक's—viz. अपादान, सम्प्रदान, करण, अधिकरण, कर्म, कर्तृ (and हेतु) as specified in the *Aṣṭādhyāyī* is not intended to be expressed *as such*—i.e. *qua* अपादान etc. *but as simply being related to the action* (क्रिया) *in a non-specified way*, i.e. desired to be expressed as a कारक in general, then in the absence of any specific injunction the Accusative case-ending is used instead of the Ablative, Dative etc. as the case may be.

§ दुह्याच्......वहाम् (Dikṣita). This *kārikā* sums up the purport of the *Ślokavārttika* (as *Bālamanoramā* states—'वार्त्तिकार्थसंग्रहश्लोकोऽयम्') which runs as follows :—

'दुहियाचिरुधिप्रच्छिभिक्षिचिञामुपयोगनिमित्तमपूर्वविधौ ।
ब्रुविशासिगुणेन च यत् सचते तदकीर्त्तितमाचरितं कविना ।।'

Though in this *Vārtiika* there is no mention of the roots √पच्, √मन्थ्, √मुष् etc., yet according to Kaiyaṭa, the author of the °*Pradīpa* commentary, they are to be included by the force of the indeclinable 'च'. Cf. "यद्यपि 'दुहि-याचि—' इति प्रकृत-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूत्रस्य श्लोकवार्त्तिके पचिमथिमुष्यादयो न पठिताः, तथापि चकारेण तेऽपि संग्राह्या इति कैयटः।"—*Bālamanoramā.* Rāmacandra in his *Prakriyā-kaumudī*, however, reads the list of the roots in a different order—e.g.

दुह्याच्यर्थ-रुधि-प्रच्छि-चि-ब्रु-शासु-जि-कर्मयुक्।
नीहृक्कृष्मन्थ्वह्दण्ड्ग्रहमुष्पचकर्मभाक्॥

Tattvabodhinī criticises the above enumeration on grounds of: (i) inclusion of √ग्रह् in the above list and (2) reversing the proper order, which would entail various anomalies: "यत्तु प्राचां 'दुह्याच्यर्थ—'इति पठितं तत्र ग्रहेः पाठोऽप्रामाणिकः। इतरेषां तु द्विकर्मकत्वं यद्यपि प्रामाणिकं तथापि सन्दर्भाशुद्धिः। तथाहि दुहादीन् न्यादींश्च द्वैराश्येन पठित्वा भावकर्मप्रक्रियाशेषे "लकृत्यक्तखलर्थाः किं द्विकर्मकेभ्यः मुख्ये कर्मणि स्युर्गौणे वा" इत्याशङ्कायां स्वयमेव पठितं—"न्यादयो ण्यन्तनिष्कर्मगत्यर्था मुख्यकर्मणि। प्रत्ययं यान्ति दुह्यादिगौणेऽन्ये तु यथारुचि।।" इति। एवं च दण्डिमन्थिभ्यामपि मुख्ये स्यात्। नचेष्टापत्तिः। गर्गाः शतं दण्डयन्तामिति भाष्यविरोधात्। शतं ह्यत्र प्रधानं, न तु गर्गाः"—*Tattvabodhinī.*

§ **कर्मणा यद् युज्यते**—(Dīkṣita).—This is an explanation of the word कर्मयुक् occurring in the *kārikā* cited in the *vṛtti.* "कर्मयुक् कर्मणा युज्यते-कर्मयुक्। "सत्सूद्विष............ '(III. 2. 61) इत्यादिना क्विप्। **कर्मणा यद् युज्यते इति**। मुख्यकर्मणा सह क्रियया सम्बध्यमानं कारकमेव अपादानादिविशेषैरकथितं सत् कर्मसंज्ञकं भवति। एतेन दुहादीनां द्विकर्मकत्वं स्फोरितम्। अन्ये वाहुः—कर्मयुगित्यत्र कर्मशब्देन क्रिया उच्यते—इति। तेन क्रियान्वयीत्यर्थः।"—*Tattvabodhinī.*

§ **अर्थनिवन्धनेयं संज्ञा** (Dīkṣita)—*Vide Bālamanoramā* on this point.

§ **अकर्मकधातुभिः........वाच्यम्**।।—This is usually regarded as a *Vārttika* of Kātyāyana. It merely repeats the purport of the statement of the Bhāṣyakāra under I. 4. 51 ('अकथितं च'). This has been distinctly pointed out in the *Bālamanoramā*: "वस्तुतस्तु 'अकर्मकधातुभिर्योगे..........' इत्यादि वचनं भाष्ये न दृश्यते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

किन्तु अकर्मकधातूनां कथं द्विकर्मकत्वमित्याशङ्कायां 'कालभावाध्वगन्तव्याः कर्मसंज्ञा ह्यकर्मणाम्। देशश्च'—इत्युक्तम्। हि-शब्दघटितत्वादिदं न विधायकम्। किन्तु अनुवादकमेव।" Haradatta reads the above statement as follows: "अकर्मकाणां च धातूनां कालभावाध्वगन्तव्यदेशाः कर्मसंज्ञका इष्यन्ते", the use of the word इष्यन्ते showing that it is an इष्टि of the Bhāṣyakāra and not a *Vārtika*. Cf. also: "उक्तं च—कालभावाध्वगन्तव्याः कर्मसंज्ञा ह्यकर्मणाम्, देशश्चाकर्मकाणां तु कर्मसंज्ञो भवतीति वक्तव्यमिति"—*Padamañjarī*, Vol. I, p. 309. According to Bhāṣyakāra, as pointed out by Jinendrabuddhi in his *Nyāsa*, काल, भाव etc. should be ragarded as instances of अकथितकर्म: "सर्वं एते कालादयोऽकथिताः। पूर्वंविधेः कस्यचिदप्रवृत्तत्वात्॥"—Vol. I, p. 299. But the author of the *Bālamanoramā*, on the authority of Bhartṛhari, regards them as cases of 'कर्त्तुरीप्सिततमं कर्म': "तथाहि 'कुरून् स्वपिति' इत्यादौ स्वापादिक्रियया कुर्वादीन् व्याप्नोति इत्यर्थः। धातूनाम् अनेकार्थतया कदाचित् तेषां स्वापादिकरणकव्यापनेऽपि वृत्तिः। ततश्च "कर्त्तुरीप्सिततम्—"इत्येव सिद्धम्। यदा तु स्वपादिधातूनां स्वापादौ एव वृत्तिः, न तु व्याप्तिपर्य्यन्ते, तदा कुरुषु स्वपिति, मासे आस्ते इत्यधिकरणत्वमेव"—*Bālamanoramā*.

§ 540. **गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणिकर्त्ता स णौ**॥--I. 4.52

दीक्षितः॥ गत्याद्यर्थानां शब्दकर्मणाम् अकर्मकाणां चाणौ यः कर्त्ता स णौ कर्म स्यात्॥

शत्रूनगमयत् स्वर्गं वेदार्थं स्वानवेदयत्।
आशयच्चामृतं देवान् वेदमध्यापयद्विधिम्॥१॥
आसयत् सलिले पृथ्वीं यः स मे श्रीहरिर्गतिः॥

'गति—' इत्यादि किम्। पाचयत्योदनं देवदत्तेन। 'अण्यन्तानाम्' किम्। गमयति देवदत्तो यज्ञदत्तं, तमपरः प्रयुङ्क्ते—गमयति देवदत्तेन यज्ञदत्तं विष्णुमित्रः॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

94340

'नीवह्योर्न' (वार्त्तिकम्) ।। नाययति, वाहयति वा भारं भृत्येन ।

'नियन्तृकर्तृकस्य वहेरनिषेधः ।।' (वा०) वाहयति रथं वाहान् सूतः ।

'आदि-खाद्योर्न' ।। (वा०) आदयति खादयति वाऽन्नं वटुना ।

'भक्षेरहिंसार्थस्य न ।।' (वा०) ।। भक्षयत्यन्नं वटुना ।। 'अहिंसार्थस्य' किम् । भक्षयति बलीवर्दान् सस्यम् ।

'जल्पति-प्रभृतीनामुपसंख्यानम् ।।' (वा०) ।। जल्पयति भाषयति वा धर्मं पुत्रं देवदत्तः ।।

'दृशेश्च' ।। (वा०) ।। दर्शयति हरिं भक्तान् । सूत्रे ज्ञान-सामान्यार्थानामेव ग्रहणम्, न तु तद्विशेषार्थानामित्यनेन ज्ञाप्यते । तेन स्मरति जिघ्रतीत्यादीनां न । स्मारयति घ्रापयति वा देवदत्तेन ।

'शब्दायतेर्न ।।' (वा०) ।। शब्दाययति देवदत्तेन । धात्वर्थसंगृहीतकर्मत्वेनाकर्मकत्वात् प्राप्तिः । येषां देशकालादि-भिन्नं कर्म न सम्भवति तेऽत्राकर्मकाः, न त्वविवक्षितकर्माणोऽपि । तेन 'मासमासयति देवदत्त'-मित्यादौ कर्मत्वं भवत्येव । देवदत्तेन पाचयतीत्यादौ तु न ।।

491.25
DIK-S

Exposition

§ The term कर्म occurring twice in this rule (viz. शब्दकर्म and अकर्मक) means the 'कर्मकारक' and not क्रिया. As the *Bālamanoramā* states: 'शब्दः कर्म येषां ते शब्दकर्माणः, तेषामिति बहुव्रीहिः । अविद्यमानं कर्म येषां ते अकर्मकाः । उभयत्रापि कर्मशब्दः कारकपरः'. *Vide* also *Tattvabodhinī* in this connexion: "शब्दः कर्म कारकं येषां तेषामित्यर्थः । कर्मशब्दोऽत्र कारकपरः, न तु 'कर्त्तरि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कर्मव्यतिहारे' (I. 3. 14) इत्यत्रेव क्रियापरः। कृत्रिमे कार्यसंप्रत्ययात्[1], कर्मग्रहणसामर्थ्यात् च। अन्यथा हि गतिबुद्धिप्रत्यवसानशब्दार्थाकर्मकाणामित्येव ब्रूयात्॥"

§ अणिकर्त्ता—means अणौ यः कर्त्ता—i.e. what is the *agent* (कर्तृ) of the non-causative form of the root. The *agent* of the roots meaning गति (motion), बुद्धि (knowledge), प्रत्यवसान (eating) and roots having शब्द (sound) as their object, as also intransitive roots *becomes the object and takes the accusative case-ending in the causal form*. The verses "शत्रूनगमयत् स्वर्गम्—" etc. embody the examples respectively of the roots mentioned in the present aphorism. Bhaṭṭoji Dīkṣita has taken them bodily from Rāmacandra's *Prakriyākaumudī*.

There is a controversy as to whether the present aphorism should be regarded as a विधि or नियम (restrictive injunction). The older grammarians adopted the latter view. According to them the प्रयोज्यकर्त्ता (i.e. the agent, of the root in its non-causal form) would have become a कर्म when the suffix णिच् would be added to the root according to the rule 'हेतुमति च' (III. 1. 26), by the सूत्र—viz. 'कर्त्तुरीप्सिततमं कर्म' (I. 4. 49). So the function of the present aphorism is to restrict the application of P. I. 4. 49 in the causative form to the roots enumerated in it, and not in the case of other roots like पच् etc. As Jinendrabuddhi says: "किमर्थं पुनरिदं सूत्रम्? यावता ण्यन्ते धातौ प्रयोजकव्यापारेण प्रेषणाध्येषणाख्येन व्याप्तुमिष्टतमत्वात् प्रयोज्यस्य 'कर्त्तुरीप्सिततमं कर्म' इत्यनेनैव कर्मसंज्ञा सिद्धा? सत्यम्। नियमार्थं वचनम्—प्रयोजकव्यापारेण व्याप्यमानस्य यदा कर्मसंज्ञा तदा गत्यर्थादीनामेव, नान्येषामिति।"—*Nyāsa*, p. 300. See also *Bālamanoramā* on this point, where Bhartṛhari's *kārikā* 'गुणक्रियायां—'etc. summing up the *view of older grammarians*

---

1 The expression "कृत्रिमे कार्यसंप्रत्यात्"—refers to the Paribhāṣā: 'कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसंप्रत्ययः।'

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

explained above, is quoted from the *Vākyapadīya* (II.7.127). *Tattvabodhinī* contains a very learned discussion on this point.

§ नीवह्योर्न—This is shown as a *Vārttika*. But in the *Bhāṣya* which reads as "आदि-खादि-नी-वहीनां प्रतिषेधः" this cannot be traced in its present form, but it forms a portion of the *Vārttika* 5. It is, however, read in the *Kāśikā-vṛtti* under the present aphorism in a different form : "गत्यर्थेषु नीवह्योः प्रतिषेधो वक्तव्यः". As according to the Bhāṣyakāra the root √वह् does not signify purely गति (motion), the exception is uncalled for. So also is the case with the root नी. As the *Tattvabodhinī* puts it : " 'नीवह्योर्न' इति वचनं तु यैः प्रापणं गतिशब्देन न गृह्यते तेषामनावश्यकम् इति बोध्यम्". The Bhāṣyakāra explicitly states under the aphorism "न गतिहिंसार्थेभ्यः" (P. I. 3. 15)—"न वहिर्गत्यर्थः। देशान्तरप्रापणक्रियो वहिः".

§ 'नियन्तृकर्तृकस्य वहेरनिषेधः'—This is *Vārttika* 6 under I. 4. 52. It is an exception to *Vārttika* 5 referred to above. The actual form of the *Vārttika* in the *Mahābhāṣya*, however, is : 'वहेरनियन्तृकर्तृकस्य [प्रतिषेधः]' which is also the reading in the *Kāśikā*. This *Vārttika* is necessary irrespective of whether √वह् be regarded as a गत्यर्थक root or not. As the *Tattvabodhinī* says : 'यैस्तु प्रापणं गतिशब्देन गृह्यते, यैर्वा न गृह्यते उभयेषामपीदं वचनमावश्यकम्.' The word 'नियन्तृ' means ordinarily a 'charioteer'. As *Amarakośa* (II. 8.60) reads :'नियन्ता प्राजिता यन्ता सूतः क्षत्ता च सारथिः।'—Accepting this meaning of the word Bhaṭṭoji Dīkṣita cites the example 'वाहयति रथं वाहान् सूतः.' But the Bhāsyakāra seems to take the word नियन्तृ to mean '*any driver of cattle*' (पशुप्रेरकः) and not merely सारथि, as it appears from the example cited by him : "अनियन्तृकर्तृकस्येति किमर्थम् ? वहन्ति यवान् बलीवर्दाः। वाहयन्ति बलीवर्दान् यवान् ।"—*Tattvabodhinī* points this out clearly : "नियन्ता पशुप्रेरकः, न तु सारथिरेवेति। तेन वाहयति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बलीवर्द्दान् यवान् इति सिध्यति। अस्मादेव भाष्योदाहरणात् "रूढ़ियोंगमपहरति" इति न्यायोऽत्र न स्वीक्रियते।"

§ **आदिखाद्योर्न**—In the *Mahābhāṣya* this forms a part of the *Vārttika* 5 cited above.

§ **'भक्षेरहिंसार्थस्य न'**—This is *Vārttika* 7 in the *Mahābhāṣya*. In the counter-instance cited—viz. 'भक्षयति बलीवर्द्दान् सस्यम्'—the element of हिंसा has been explained on the ground that *standing crops* in the field are endowed with consciousness (i.e. सचेतन). So, by their eating injury is done to them and through them to their owner. See *Bālamanoramā* on this point. The author of the *Tattvabodhinī*, too, points out: 'क्षेत्रस्थानां यवानां भक्ष्यमाणानां हिंसा ज्ञेया, तस्यामवस्थायां तेषां चेतनत्वात्'. *Vide* also: "भक्षिरत्र हिंसार्थः। सर्वे सचेतना भावा इत्यस्मिन् दर्शने हिंसितं शस्यम् इति शस्यस्य भक्षणे देवदत्तो हिंसितो भवति। यस्य हि तच् शस्यं तस्य हिंसा गम्यते।"— *Kāśikā-vivaraṇa-pañjikā*, p. 299. Cf: *Manu*° I. 49 :

"तमसा वहुरूपेण वेष्टिताः कर्महेतुना।
अन्तःसंज्ञा भवन्त्येते सुखदुःखसमन्विताः॥"

§ **'जल्पतिप्रभृतीनामुपसंख्यानम्'**—This is not the form of the *Vārttika* as read in the *Mahābhāṣya*. It has been pointed out at the outset that the word कर्म in the *sūtra* 'गतिबुद्धि—' means *technical* (कृत्रिम) कर्म—i.e. कर्मकारक, and *not* क्रिया. If then, कर्म means कर्मकारक, Vārttikakāra points out, roots like जल्पति, विलपति and आभाषते must have to be included as they have no शब्द as their कर्म (object). Thus the *Vārttika* 3 reads: [अस्तु तर्हि शब्द एषां कर्मेति—*Bhāṣya*] "शब्दकर्मण इति चेज्जल्पतिप्रभृतीनामुपसंख्यानम्।" The *Bhāṣyakāra* comments thereon: 'के पुनर्जल्पतिप्रभृतयः। जल्पति, विलपति, आभाषते। जल्पति देवदत्तः। जल्पयति देवदत्तम्।। विलपति देवदत्तः। विलापयति देवदत्तम्।। आभाषते देवदत्तः। आभाषयति देवदत्तम्।।' The *Kāśikā*, however,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

does not read this *Vārttika*. The *Nyāsakāra* includes the three roots जल्पति, विलपति and आभाषते, as बुद्ध्यर्थक roots. Cf: "शब्दग्रहणेन इह पारिभाषिकं कर्म गृह्यते। न तु क्रिया। क्रियाग्रहणे हि कर्मग्रहणमनर्थकं स्यात्। कारकाधिकारादेव कारकस्य क्रियापेक्षत्वात् शब्दात्मिकायां क्रियायां वर्त्तमाना धातवो ग्रहीष्यन्ते इति। तत् किं कर्मग्रहणेन ? यदि तर्हि पारिभाषिकं कर्म गृह्यते जल्पति देवदत्तो जल्पयति देवदत्तम्। विलपति देवदत्तो विलापयति देवदत्तम्। आभाषते देवदत्तः। आभाषयति देवदत्तम्। पश्यति देवदत्तः कार्षापणम्। दर्शयते देवदत्तं कार्षापणमित्यत्र न प्राप्नोति। शब्दादन्यस्य पारिभाषिकस्य कर्मणो विवक्षितत्वात्। नैष दोषः। बुद्ध्यर्थत्वात् भविष्यति। अत्र हि जल्पतिप्रभृतयस्त्रयस्तावत् शब्दसाधने बोधने वर्त्तते। जल्पति देवदत्त इति। वचनेन बोधयति इत्यर्थः। एवमन्यत्रापि। पश्यति कार्षापणम् इत्यत्र दृशिः चक्षुःसाधने ज्ञाने वर्त्तते। चक्षुषा जानीते इत्यर्थः। तस्मात् बुद्ध्यर्थत्वात् सिद्धम्॥'—*Kāśikā-vivaraṇa-pañjikā*, pp. 299-300.

§ **दृशेश्च**—In the *Mahābhāṣya* the *Vārttika* is read as: 'दृशेः सर्वत्र' which has been explained as 'दृशेः सर्वत्र उपसंख्यानं कर्त्तव्यम्। पश्यति रूपतर्कः कार्षापणम्। दर्शयति रूपतर्कं कार्षापणम्'।

Rāmacandra says: 'श्रुग्रहदृशामिति केचित्। श्रावयति गीतं श्रोतॄन्। ग्राहयति वटुं वेदम्। दर्शयति भक्तान् देवम्।' The *Tattva-bodhinī*, however, criticises the inclusion of श्रु and ग्रह along with दृश्. As it remarks: "यद्यपि 'श्रुग्रहदृशाम्' इति कर्मत्वमुक्तम्, तत्र दृशिग्रहणं प्रामादिकमेव। शृणोतेस्तु शब्दकर्मत्वात् सिद्धम्। ग्राहेर्द्विकर्मकत्वं यद्यपि 'अजिग्रहत् तं जनको धनुस्तत्' इति भट्टिप्रयोगस्य, 'अयाचितारं नहि देवदेवम् अद्रिः सुतां ग्राहयितुं शशाक' इति कालिदास-प्रयोगस्य चानुगुणम्, तथापि बहूनामसम्मतमेव।"

§ **शब्दायतेर्न**—The full *Vārttika* as read in the *Bhāṣya* is "शब्दकर्मनिर्देशे शब्दक्रियाणामिति चेत् ह्वयत्यादीनां प्रतिषेधः" on which Bhāṣyakāra comments: 'के पुनर्ह्वयत्यादयः। ह्वयति क्रन्दति शब्दायते'. It is not clear why Bhaṭṭoji leaves out the other two roots viz. ह्वयति and क्रन्दति, and selects only शब्दायते. Rāmacandra, however, mentions all the three mentioned

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

by Bhāṣyakāra and another fourth viz. अयति, following Bopadeva, the author of the *Mugdhabodha*. As he says 'अय-क्रन्द-शब्दाय-ह्वेञां नेति केचित्। आययति सैनिकैररीन्। क्रन्दयति सैनिकैररीन्। शब्दाययति ह्वाययति वा शूरैः रिपून्' ।—*Prakriyā-Kaumudī*, Vol. I, p. 395. See °*Prasāda* commentary thereon. Vide *Tattvabodhinī* : 'एतेन शब्दाययति सैनिकैः रिपून् इति कर्म प्रयुञ्जानाः परास्ताः ।'

§ **धात्वर्थसंगृहीत......प्राप्तिः**—See *Bālamanoramā* on this point. Cf. also the *kārikā* :

"धातोरर्थान्तिरे वृत्तेर्धात्वर्थेनोपसंग्रहात् ।
प्रसिद्धेरविवक्षातः कर्मणोऽकर्मिका क्रिया ।।"—

Vākyapadīya, III. 4. 69

§ **"येषां देश....कर्माणोऽपि"**—The following remarks of the *Tattvabodhinī* on this point would be found helpful : "न **तु अविवक्षितकर्माणोऽपीति**। यथा 'लः कमणि च--' इति सूत्रे (III. 4. 69) अविवक्षितकर्माणोऽपि अकर्मका इति गृह्यन्ते। तथैव इहापि यदि गृह्येरन् तदा ओदनादिकर्मणोऽविवक्षायां पाचयति देवदत्तम् इति स्यात्, न तु देवदत्तेन पाचयति इति। एवं 'गत्यर्थाकर्मक--' इति सूत्रेऽपि अविवक्षितकर्माणोऽकर्मका इति न गृह्यते। दत्तवान् पक्ववान् इत्यर्थे दत्तः पक्व इत्यापत्तेः ।" This statement of Bhaṭṭoji is based on the *Vārtikas* 8 & 9 on the present *sūtra* as recorded in the *Bhāṣya* and the Bhāṣyakāra's comments thereon—viz. "अकर्मकग्रहणे कालकर्मकाणामुपसंख्यानम् ।। सिद्धं तु कालकर्मकाणाम् अकर्मकवद् वचनात्"—*Vārttikas* 8 & 9.

§ 541. हृक्रोरन्यतरस्याम् ।।—I.4 53.

दीक्षितः ।। हृक्रोरणौ यः कर्त्ता स णौ वा कर्मसंज्ञः स्यात् । हारयति कारयति वा भृत्यं भृत्येन वा कटम् ।

अभिवादिदृशोरात्मनेपदे वेति वाच्यम् (वा०) । अभिवादयते दर्शयते देवं भक्तं भक्तेन वा ।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Exposition

§ It is a case of उभयत्रविभाषा or प्राप्ताप्राप्तविभाषा as pointed out in the *Bālamanoramā*. The *Nyāsa* is more explicit on the point : 'गत्यर्थादयो निवृत्ताः । तेनोभयत्र विभाषेयम् । यदायं हरतिर्गतौ वर्त्ततेऽभ्यवहारे वा, करोतिश्चाकर्मको भवति तदा प्राप्ते । यदा तु हरतिः स्तेयादौ वर्त्तते करोतिश्च सकर्मको भवति तदाऽप्राप्ते ।'—The Bhāṣyakāra actually cites the present *sūtra* as an instance of उभयत्रविभाषा. Cf : "हृक्रोरन्यतरस्याम्'—प्राप्ते अप्राप्ते उभयत्र वा इति सन्देहः । कथं च प्राप्ते कथं वाऽप्राप्ते कथं वोभयत्र । 'गतिबुद्धि-प्रत्यवसानार्थ—' (I. 4. 52) इति वा नित्ये प्राप्तेऽन्यत्र वाऽप्राप्ते उभयत्र वा इति । उभयत्र । प्राप्ते तावत्—अभ्यवहारयति सैन्धवान् अभ्यवहारयति सैन्धवैः । विकारयति सैन्धवान् विकारयति सैन्धवैः । अप्राप्ते । हरति भारं देवदत्तः हारयति भारं देवदत्तम् हारयति भारं देवदत्तेन । करोति कटं देवदत्तः कारयति कटं देवदत्तम्, कारयति कटं देवदत्तेन"—*Bhāṣya* on "न वेति विभाषा" (I. 1. 44).

§ **'अभिवादिदृशो...........वेति वक्तव्यम्'**—This *Vārttika* is, however, read in the *Mahābhāṣya* as 'हृक्रोर्वावचनेऽभिवादिदृशो-रात्मनेपद उपसंख्यानम्'. It is to be noted, however, that in respect of अभिवादि (अभि—√वद+णिच्) 'वा' in the *Vārttika* stands for अप्राप्तविभाषा, while with regard to दृश् it indicates प्राप्तविभाषा. See *Bālamanoramā*. *Tattvabodhinī* also says : 'अभिवादयतेरप्राप्तौ दृशेस्तु प्राप्तौ अयं विकल्पः ।'

§ 542. **अधिशीङ्स्थासां कर्म** ॥—I.4.46.

दीक्षित ।। अधिपूर्वाणामेषामाधारः कर्म स्यात् ।। अधिशेते, अधितिष्ठति, अध्यास्ते, वा वैकुण्ठं हरिः ।।

Exposition

§ It is to be noted that 'आधारः' is construed with the present *sūtra* through अनुवृत्ति from 'आधारोऽधिकरणम्' (I. 4. 45). *Vide* also notes on the *sūtra*: 'कर्त्तुरीप्सिततमं कर्म' (I. 4. 49).

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

§ 543. **अभिनिविशश्च** ॥—I. 4.47.

दीक्षित ॥ अभिनीत्येतत्संघातपूर्वस्य विशतेराधारः कर्म स्यात् । अभिनिविशते सन्मार्गम् । 'परिक्रयणे सम्प्रदानम्——' (§ 580) इति सूत्रादिह मण्डूकप्लुत्याऽन्यतरस्यांग्रहणमनुवर्त्य व्यवस्थितविभाषाऽश्रयणात् क्वचिन्न । पापेऽभिवेशः ॥

Exposition

§ **अभिनीत्येतत् संघातपूर्वस्य विशतेः**—i.e. when the root √विश् is preceded by *both* the prepositions अभि and नि *in the order they are mentioned in the aphorism.* This is implied by the placing of the preposition नि *after* अभि ond *not before* it, as expected according to the rule 'अल्पाच्तरम्' governing पूर्वनिपात in a द्वन्द्व compound. *Tattvabodhinī* makes the point clear: 'नेरल्पाच्तरत्वेन पूर्वनिपाते कर्तव्ये विपरीतोच्चारणम् ईदृशसंघातविवक्षार्थम् ।'

§ **मण्डूकप्लुत्या अन्यतरस्यांग्रहणमनुवर्त्य**—"*The maxim of a frog's leap* used by grammarians and others to express the passing from one rule to another over intervening ones. I noted it in the following portions of the *Mahābhāṣya* I. 1. 3 (Vārttika 2) ; V. 2. 4 (2) ; VI. 1. 17 and 3. 49 ; and VII. 2. 117'—*Laukika-nyāyāñjali* by Col. G. A. Jacob, Pt. I. p. 41. Thus, the term अन्यतरस्याम् in this case follows from 'परिक्रयणे सम्प्रदानमन्यतरस्याम्' (I. 4. 44) and skipping over the intermediate *sūtras* relates itself with the present one, thus indicating व्यवस्थितविभाषा by resorting to which such usages as पापेऽभिनिवेशः, कल्याणेऽभिनिवेशः, या या संज्ञा यस्मिन् यस्मिन् संज्ञिनि अभिनिविशते etc., where we have सप्तमी instead of द्वितीया according to the present rule, are justified. Vide *Bālamonaramā* on this point.

§ **544 उपान्वध्याङ्वसः** ॥—I.4.48.

दीक्षितः ॥ उपादिपूर्वस्य वसतेराधारः कर्म स्यात् । उपवसति, अनुवसति, अधिवसति वा वैकुण्ठं हरिः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अभुक्त्यर्थस्य न ।। (वा०) ।। वने उपवसति ।

उभसर्वतसोः कार्या धिगुपर्यादिषु त्रिषु ।
द्वितीयाऽऽम्रेडितान्तेषु ततोऽन्यत्रापि दृश्यते ।। (वा०)।।

उभयतः कृष्णं गोपाः । सर्वतः कृष्णम् । धिक् कृष्णाभक्तम् । उपर्युपरि लोकं हरिः । अध्यधि लोकम् । अधोऽधो लोकम् ।।

"अभितःपरितःसमयानिकषाहाप्रतियोगेऽपि" ॥ वा० ॥

अभितः कृष्णम् । परितः कृष्णम् । ग्रामं समया । निकषा लङ्काम् । हा कृष्णाभक्तम् । तस्य शोच्यतेत्यर्थः । 'बुभुक्षितं न प्रतिभाति किञ्चित्' ।।

Exposition

§ **'अभुक्त्यर्थस्य न'**—This is not the exact form of the *Vārttika* as read in the *Mahābhāṣya* as also in the *Kāśikā*. It merely records the implication thereof. The *Vārttika* in the *Mahābhāṣya* is as follows : 'वसेरश्यर्थस्य प्रतिषेधो वक्तव्यः ।। [ग्रामे उपवसतीति]." For the meaning of the *Vārttika* see *Bālamanoramā*. The Bhāṣyakāra, however, dispenses with the *Vārttika* with the following remark : 'स तर्हि वक्तव्यः । न वक्तव्यः । नात्रोपपूर्वस्य वसेर्ग्रामोऽधिकरणम् । कस्य तर्हि । अनुपसर्गस्य । ग्रामेऽसौ वसंस्त्रिरात्रमुपवसतीति ।।' Haradatta in his *Padamañjarī* brings out further the implication of the *Bhāṣya* statement cited above : 'एतदुक्तं भवति । विशिष्टाधारावस्थिततत्वेन निश्चिते देवदत्ते भोजननिवृत्तिविशिष्टकालं प्रतिपादयितुम् इदं प्रयुज्यते 'ग्राम उपवसतीति' । तत्र अन्तरङ्गत्वात् प्रतीयमानवसिक्रियापेक्षो ग्रामस्याधिकरणभावः । उपवसनं तु स्वरूपेणैव कालमपेक्षते इति कालेनैवान्तरङ्गः सम्बन्धः, ग्रामादिना तु वहिरङ्ग इत्युक्तमपि त्रिरात्रादिकं कर्म भवति ।।"—Vol. I, p. 300.

§ **'उभसर्वतसोः कार्या........दृश्यते'**—This is a *Śloka-vārttika* cited by the Bhāṣyakāra under P. II. 3. 2. All cases of **द्वितीया** stated hereafter are instances of उपपदविभक्ति and

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

not कारकविभक्ति. As the *Bālamanoramā* introduces the *Vārttika* with the remark : 'अथोपपदविभक्तयः'. The *Tattvabodhinī*, too states : 'उपपदविभक्तिमाह', on which Pt. Śivadatta has the, following note : 'उपपदेति । कारकविभक्तेरुपपद-विभक्तितो बलवत्त्वात् पूर्वं कर्मकारकविभक्तिमुक्त्वा इत्यादि । इत्थं च कर्म चतुर्विधमवगन्तव्यम् । तदाह हरिः — 'निर्वर्त्यं च विकार्य्यं च प्राप्यं चेति त्रिधा मतम् । तच्चेप्सिततमं कर्म चतुर्धान्यत्तु कल्पितम् ।। औदासीन्येन यत् प्राप्यं यच्च कर्त्तुरनीप्सितम् । संज्ञान्तरैरनाख्यातं यद् यच्चाप्यन्यपूर्वकम् ।।" तथा तल्लक्षणानि तु—"यदसज्जायते सद्वा जन्मना यत् प्रकाश्यते । तन्निर्वर्त्यं, विकार्य्यं तु कर्म द्वेधा व्यवस्थितम् ।। प्रकृत्युच्छेदसम्भूतं किञ्चित् काष्ठादि भिन्नवत् । किञ्चिद् गुणान्तरोत्पत्त्या सुवर्णादिविकारवत् ।। क्रियाकृत-विशेषाणां सिद्धिर्यत्र न गम्यते । दर्शनादनुमानाद् वा तत् प्राप्यमिति कथ्यते ।।" The *kārikās* cited are from Bhartṛhari's *Vākya-padīya*, III. 7.

It is to be noted that though the word उभ is mentioned in the *Vārttika*, it is changed into उभय when followed by the suffix तसि. As the author of the *Nyāsa* points out : "उभसर्वतसोरित्यत्र यद्यपि उभशब्दः पठितस्तथापि सामर्थ्यात् उभयशब्दो गृह्यते । साधर्म्यात् । नहि उभशब्दस्तसिप्रत्ययान्तोऽस्ति । तस्य नित्यद्विवचन-टाब्विषयत्वात् । तथा चोक्तम्—'अन्याभावो नित्यद्विवचनटाब्विषयत्वा-दुभयोऽन्यत्र' इति । (*Vārttika* under I. 1. 27)."

§ **'अभितः परितः......प्रतियोगेऽपि'**.—This also is found in *Bhāṣya* under II. 3. 2. In the *Prakriyā-Kaumudī*, Rāmacandra includes ऋते in the above list—e.g. 'अभितःपरितःसमयानिकषाहा-ऋते-प्रतियोगेष्वपि'. But this is against the Bhāṣyakāra's statement. The word प्रति in the list is an उपसर्ग and not a कर्मप्रवचनीय. So in 'बुभुक्षितं न प्रतिभाति किञ्चित्'—the द्वितीया is not according to the rule 'कर्मप्रवचनीययुक्ते—'. As the *Tattvabodhinī* notes : "एष प्रतिशब्दः क्रियाविशेषकत्वादुपसर्गः न तु कर्मप्रवचनीयः । तेनात्र 'कर्मप्रवचनीययुक्ते'—इत्यनेन गतार्थता न शङ्क्या ।"—Viṭṭhala in his °*Prasāda* also says : 'प्रतिशब्दः क्रियाविशेषणं, न कर्मप्रवचनीयः' । Vide

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

also *Bālamanoramā* : "बुभुक्षितमिति । भा दीप्तौ । इह तु उपसर्गवलात् स्फुरणे वर्त्तते । ततो लक्षणादौ त्ववृत्तेः प्रतेर्न कर्मप्रवचनीयत्वम् । एवञ्च 'कर्मप्रवचनीययुक्ते द्वितीया' इत्यनेन गतार्थत्वं न भवति ।"

§ 545. अन्तरान्तरेणयुक्ते ॥—II. 3.4.

दीक्षितः ॥ आभ्यां योगे द्वितीया स्यात् । अन्तरा त्वां मां हरिः । अन्तरेण हरिं न सुखम् ॥

Exposition

§ The word अन्तरेण in this *Sūtra* is a निपात meaning '*without*' and not the form in the third case ending of the word 'अन्तर' meaning *difference*, as it is associated here with the word अन्तरा which too is a **निपात**. Cf. the *Paribhāṣā* "सहचरितासहचरितयोः सहचरितस्यैव ग्रहणम्". Vide the *Bhāṣya* : 'इह कस्मात् न भवति । किं ते बाभ्रव-शालङ्कायनानाम् अन्तरेण गतेनेति । लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवेति ॥ अथवा यद्यपि तावदयमन्तरेण-शब्दो दृष्टापचारो निपातश्चानिपातश्च, अयं तु खलु अन्तराशब्दोऽदृष्टापचारो निपात एव । तस्यास्य कोऽन्यो द्वितीयः सहायो भवितुमर्हति अन्यत् अतो निपातात् । तद्यथा अस्य गोर्द्वितीयेनार्थ इति गौरेवानीयते नाश्वो न गर्द्दभः ॥" *Taṭṭvabodhinī* also states : "प्रतिपदोक्तत्वात् निपातयोरेव ग्रहणम्, न तु टावन्ततृतीयान्तयोः । परस्परसाहचर्य्याच्च । तद्यथा गुरुभार्गवौ इत्युक्ते ग्रहयोरेव प्रतीतिः, न तु आचार्य-परशुरामयोः । तेन किमनयोरन्तरेण गतेन इति सिद्धम् । किमनयोर्विशेषेण ज्ञातेनेत्यर्थः ।"

§ 546. कर्मवचनीयाः ॥—I.4.83.

दीक्षितः ॥ इत्यधिकृत्य ।

Exposition

This is an अधिकार सूत्र governing the subsequent rules upto 'अधिरीश्वरे' (I. 4. 97). As the *Taṭṭvabodhinī* points out : 'रीश्वरात् प्राग् इति वोध्यम् ।' The *Bhāṣya* has the following

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

comment on the term कर्मप्रवचनीय : "किमर्थं महती संज्ञा क्रियते। अन्वर्थसंज्ञा यथा विज्ञायेत। कर्म प्रोक्तवन्तः कर्मप्रवचनीया इति। के पुनः कर्म प्रोक्तवन्तः। ये संप्रति क्रियां नाहुः। के च सम्प्रति क्रियां नाहुः। येऽप्रयुज्यमानस्य क्रियामाहुस्ते कर्मप्रवचनीयाः।"[1]

§ 547. अनुर्लक्षणे ॥—I 4 84.

दीक्षितः ॥ लक्षणे द्योत्येऽनुरुक्तसंज्ञः स्यात्। गत्युपसर्गसंज्ञाऽपवादः ॥

Exposition

The term 'लक्षण' is used in the present *sūtra* as well as in the subsequent *sūtra*—viz. 'लक्षणेत्थम्भूताख्यान—' (I. 4. 90) both in connection with अनु as a कर्मप्रवचनीय. It might then be legitimately asked as to why the present *sūtra* has been read at all, inasmuch as in I. 4. 90 also अनु is taught as a कर्मप्रवचनीय in the sense of लक्षण. So I. 4. 84 can be easily dispensed with. To this the scholiasts point out that the term 'लक्षण' in the present *sūtra* signifies कारकहेतु (or efficient cause) while in the subsequent rule it refers to a ज्ञापकहेतु (i.e. indicatory sign). Thus, the scopes of the two *sūtras* are distinct. As the *Kāśikā* observes: "किमर्थमिदमुच्यते? यावता, 'लक्षणेत्थंभूत—' इति सिद्धैवानोः कर्मप्रवचनीयसंज्ञा। हेत्वर्थं तु वचनम्, हेतुतृतीयां बाधित्वा द्वितीयैव यथा स्यात्।" On this the *Nyāsa* comments: "तुशब्दोऽवधारणे हेत्वर्थमेवेति। हेतुशब्दः कारकहेतुवचनः, न ज्ञापकहेतुवचनः। अन्यथा ह्यपरिहार एवायं स्यात्।" Haradatta's comments on the above statement of the *Kāśikā* are also worth our attention :"हेत्वर्थन्त्विति। तु-शब्दः पक्षं व्यावर्त्तयति। हेतुः=करणम्, अर्थः=प्रयोजनम्, प्रयोजकोऽस्य वचनस्य इत्यर्थः। ननु च तत्र चात्र च

1 "Prepositions, used by themselves and governing a noun in some case, are called "*karmapravacanīya*"—V. S. Apte : *The Student's Guide to Sanskrit Composition* § 37.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लक्षणग्रहणमेव क्रियते, तद्यदि हेतुर्लक्षणं न भवति, इहापि न गृह्येत, अथ भवति तत्रापि गृह्येतेति पुनरपि नार्थ एतेन ? तत्राह—हेतुतृतीयामिति। सत्यम्, लक्ष्यतेऽनेन तल्लक्षणम्=चिह्नं ज्ञापकम्, कारणमपि नियतं कार्यविशेषावगतिहतुत्वाद् लक्षणं भवत्येव। उक्तं भाष्ये—लक्षणेन हेतुरपि व्याप्तो नावश्यं तदेव लक्षणं येन पुनः पुनर्लक्ष्यते, किं तर्हि ? यत् सकृदपि निमित्तत्वाय कल्पते तदपि लक्षणमिति। किन्तु 'येन नाप्राप्तिन्यायेन' कर्मप्रवचनीययुक्ते द्वितीया षष्ठ्या एवापवादः। ततश्च लक्षणेत्थंभूतेत्यनोर्लक्षणे कर्मप्रवचनीयसंज्ञाया अवकाशो यो हेतुर्न भवति—वृक्षमनु विद्योतते विद्युदिति। हेतुतृतीयाया अवकाशः—धनेन कुलमिति। हेतुभूते तु लक्षणे उभयप्रसङ्गे परत्वात् तृतीया स्यात्, तामपि बाधित्वा द्वितीयैव यथा स्यात्। पुनः संज्ञाविधाने कक्षान्तरप्राप्तत्वाद् द्वितीयैव तृतीयां बाधते। उक्तं च—

'हेतुहेतुमतोर्योगपरिच्छेदेऽनुना कृते।
आरम्भाद्बाध्यते प्राप्ता तृतीया हेतुलक्षणा॥'[1]

—*Padamañjarī.*

§ 548. कर्मप्रवचनीययुक्ते द्वितीया॥—II. 3.8.

दीक्षितः॥ एतेन योगे द्वितीया स्यात्। [पर्जन्यो] जपमनु प्रावर्षत्। हेतुभूतजपोपलक्षितं वर्षणमित्यर्थः। परापि हेतौ तृतीयाऽनेन बाध्यते। 'लक्षणेत्थम्भूत—' (§552) इत्यादिना सिद्धे पुनः संज्ञाविधानसामर्थ्यात्॥

Exposition

पराऽपि....................विधानसामर्थ्यात् (Dīkṣita). For elucidation of this passage *vide Bālamanoramā. Vide* also the observations of the *Padamañjarī* as cited under the previous *sūtra.*

§ 549. तृतीयार्थे॥—1.4.85

दीक्षितः॥ अस्मिन् द्योत्येऽनुरुक्तसंज्ञः स्यात्॥ नदीमन्ववसिता सेना। नद्या सह संबद्धेत्यर्थः। 'षिञ् बन्धने' क्तः॥

1 *Vākyapadīya,* II. 203.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Exposition

Here by 'तृतीयार्थ' the *Sūtrakāra* intends to imply the meaning of साहित्य (*togetherness*) which is expressed by the third case-ending in such instances as 'रामेण सह लक्ष्मणो वनं जगाम' according to the rule 'सहयुक्तेऽप्रधाने' (II. 3. 19) and *not* कर्तृत्व or करणत्व which is expressed by the 3rd case-ending according to the rule 'कर्तृकरणयोस्तृतीया' (II.3.18). *Vide* Pt. Śivadatta's comments: "तृतीयाशब्देन तन्निमित्तशब्दः 'सहयुक्तेऽप्रधाने' इत्यत्रोपात्तोऽनन्तरोक्तत्वात्—सहशब्दो लक्ष्यते। 'तदर्थे साहित्ये' द्योत्ये इत्यर्थः।" *See* also the *Bālamanoramā* on this point.

§ 550. हीने ॥—I. 4.86.

दीक्षितः ॥ हीने द्योत्येऽनुः प्राग्वत्। अनु हरिं सुराः। हरेर्हीना इत्यर्थः ॥

Exposition

When अनु signifies *inferiority* of some person or thing with respect to another person or thing, it becomes a कर्मप्रवचनीय and *the second case-ending is attached to the word that stands for the superior person or thing.* As the *Tattvabodhinī* states: "उत्कृष्टादेव द्वितीया, न तु अपकृष्टात्—शक्तिस्वभावादित्याशयेन उदाहरति—अनु हरिम् इति।" Haradatta, too, observes: "कर्मप्रवचनीयविभक्तिस्तु तेन व्यतिरिच्यमाने उत्कृष्टे एव भवति न हीने, अभिधानशक्तिस्वाभाव्यात्। नोभाभ्यामेकयैव द्वितीयया द्विष्ठस्यापि सम्बन्धस्याभिधानात् षष्ठीवत् ॥"—*Padamañjarī.* Other instances are "अनु शाकटायनं वैयाकरणाः। येऽन्वर्जुनं योद्धारः"—*Kāśikā.*

§ 551. उपोऽधिके च ॥—I.4.87

दीक्षितः ॥ अधिके हीने च द्योत्ये उपेत्यव्ययं प्राक्संज्ञं स्यात्। अधिके, सप्तमी वक्ष्यते। हीने—उप हरिं सुराः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Exposition

The word हीने follows from the previous *sūtra*—viz. "हीने" (I.4.86) by the force of the indeclinable 'च' in the present *sūtra*.

§ **अधिके सप्तमी वक्ष्यते** (Dīkṣita)—When उप signifies आधिक्य it governs the seventh case-ending according to the rule 'यस्मादधिकं—' (II. 3. 9), which would be read later. The *Kāśikā* cites the following instances of आधिक्य—'उप खार्य्यां द्रोणः । उप निष्के कार्षापणम् ।'

§ 552. लक्षणेत्थम्भूताख्यानभागवीप्सासु प्रतिपर्यनवः ॥ —I.4.90.

दीक्षितः ।। एष्वर्थेषु विषयभूतेषु प्रत्यादय उक्तसंज्ञाः स्युः । लक्षणे––वृक्षं प्रति पर्यनु वा विद्योतते विद्युत् । इत्थम्भूताख्याने भक्तो विष्णुं प्रति पर्यनु वा । भागे–– लक्ष्मीर्हरिं प्रति पर्यनु वा । हरेर्भाग इत्यर्थः । वीप्सायां—वृक्षं वृक्षं प्रति पर्यनु वा सिञ्चति । अत्रोपसर्गत्वाभावान्न षत्वम् । 'एषु' किम् ? परिषिञ्चति ।।

Exposition

§ When the indeclinable particles प्रति, परि and अनु signify the ideas of (1) लक्षण, (2) इत्थम्भूताख्यान, (3) भाग and (4) वीप्सा, then they are regarded as कर्मप्रवचनीय, and govern the second case-ending according to the rule 'कर्मप्रवचनीययुक्ते द्वितीया' (II. 3. 8) already explained.

(1) लक्षण in the present *sūtra* means a ज्ञापकहेतु or चिह्न as opposed to कारकहेतु or कारक as already pointed out. As Haradatta says : 'लक्ष्यते येन तत् लक्षणं चिह्नं ज्ञापकम् ।'

'वृक्षं प्रति परि अनु वा विद्योतते विद्युत्'—Here the particles प्रति, परि and अनु signify the particular relation (सम्बन्ध-विशेष)—viz. लक्ष्यलक्षणभाव, between वृक्ष (लक्षण) and विद्युत् (लक्ष्य). As

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

the *Nyāsa* points out : "अत्र वृक्षो लक्षणम् । विद्योतमाना विद्युत् लक्ष्या । सा हि वृक्षं प्राप्य विद्योतते इति तयोः प्राप्तिक्रियाजनितोऽत्र लक्ष्यलक्षणभावः सम्वन्धः प्रतिशब्देन द्योत्यते ।"

(2) इत्थम्भूताख्यान—The expression has been explained in the *Padamañjarī* as follows : "अयं प्रकार इत्थम् । प्रथमान्तादिदमस्थमुः, इह त्विदमा प्रत्यवमृश्यस्य सन्निहितस्य कस्यचिदभावात् प्रकारविशेषमात्रवृत्तिरित्थंशब्दः । "भू प्राप्तौ" आत्मनेपदी, 'आ धृषाद्वा' (*Gaṇasūtra* § 202) इति णिजभावपक्षे गत्यर्थात् कर्त्तरि क्तः । तत इत्थंशब्दाद् अव्ययादपि वृत्तिविषये सत्त्वधर्मोपादानात् कर्मणि द्वितीया । श्रितादिष गम्यादीनामिति समासः, कञ्चित् प्रकारं प्राप्त इत्थम्भूतः । इत्थम्भूतस्य आख्यानम् इत्थम्भूताख्यानम् ।।"

(3) भाग—It means 'a portion' that is regarded as one's own. As the *Padamañjarī* explains it : "स्वीक्रियमाणोंऽशो भागः". In the example "लक्ष्मीर्हरिं प्रति' the particle प्रति signifies the relation of स्व-स्वामिभाव (i.e. the relation between the owner and the thing owned) subsisting between लक्ष्मी and हरि. As *Tattvabodhinī* says : 'लक्ष्मीरूपस्य भागस्य हरिणा सह स्व-स्वामिभावः सम्वन्धः ।'

(4) वीप्सा— means 'व्याप्तुमिच्छा'—i. e. pervasion, severally. 'वृक्षं वृक्षं प्रति सिञ्चति'—Here the sense of pervasion is actually signified by the repetition of the word वृक्षम्. Vide *Nyāsa*: "अत्र वीप्सा द्विर्वचनेनैव द्योत्यते । प्रतिशब्दस्य तु सेकक्रियाजनितो वृक्षाणां यः सम्वन्धः साध्यसाधनभावलक्षणः स एव द्योत्यः । वृक्षादिनिमित्तं साधनम् । सेकः साध्यः । द्वितीया चेह सेकर्मकत्वात् सिचेः सेकेन व्याप्तुमिष्टतमानां वृक्षाणां कर्मत्वे सति 'कर्मणि द्वितीया' (II. 3. 2) इत्यनेनैव सिद्धा । कर्मप्रवचनीयसंज्ञया उपसर्गसंज्ञाया निवर्त्तितत्वात् 'उपसर्गात् सुनोति—' (VIII. 3. 65) इत्यादिना षत्वं न भवति ।"

§ **"'एषु' किम् ? परिषिञ्चति"** (Dikṣta)—In परिषिञ्चति, the indeclinable परि is used as an उपसर्ग and consequently the स् of सिञ्चति is cerebralised according to the rule 'उपसर्गात् सुनोति—' (VIII. 3. 65). परिषिञ्चति means 'सर्वतः सिञ्चति'.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

§ 553. अभिरभागे ।।–I.4.91

दीक्षितः ।। भागवर्जे लक्षणादावभिरुक्तसंज्ञः स्यात् । हरिमभि वर्त्तते । भक्तो हरिमभि । देवं देवमभि सिञ्चति । 'अभागे' किम् ? यदत्र ममाभिष्यात् तद् दीयताम् ।।

Exposition

§ अभि is regarded as a कर्मप्रवचनीय in all the senses stated in I. 4. 90 excepting भागः.

§ **'अभागे किम् ? यदत्र ममाभिष्यात् तद् दीयताम्'**—Here the meaning is 'यदत्र मम भागः स्यात् तत् दीयताम्'—अभि is used here as as an उपसर्ग. Consequently the स् in स्यात् (√अस्+विधिलिङ्) is cerebralised by the rule "उपसर्गप्रादुर्भ्यामस्तिर्यच्परः" (VIII. 3. 87). Some other scholiasts like Jinendrabuddhi read 'यदत्र माम् अभिष्यात्···' instead of 'यदत्र **मम** अभिष्यात्'. They justify the transitive use of the root √अस् which is usually intransitive by the following argument : "मामिति । यद्यप्यस्तिरकर्मकस्तथापि अकर्मका अपि धातवः. सोपासर्गाः सकर्मका भवन्तीति कर्मणि द्वितीया । ननु चाभिशब्दो भागासम्बन्धस्य द्योतकः इति तेनास्तेः सम्बन्धो नास्ति । तत् कथं सकर्मकता ? नेदमस्ति । अस्तिसम्बन्धद्वारेण ह्यभिशब्दो भागसम्बन्धं द्योतयति । अन्यथा हि यदि तस्यास्तिना योगो न स्यात् तदोपसर्गसंज्ञापि न स्यात् । ततश्च उपसर्गसंज्ञानिबन्धनमभिष्यादिति षत्वमपि न स्यात् ।"—*Nyāsa*.

Rāmacandra, in his *Prakriyā-Kaumudī*, adopts the reading of *Nyāsa*. The *Tattvabodhinī* refers to this view : "प्राञ्चस्तु—मामभिष्यादिति प्रत्युदाहरन्ति, तत्र "मां प्राप्नुया"दित्यर्थः । उपसर्गवशेनास्तेः सकर्मकत्वात् मामिति f तीया ।"

§ 554. अधि-परी अनर्थकौ ।।–I.4.93

दीक्षितः ।। उक्तसंज्ञौ स्तः । कुतोऽध्यागच्छति । कुतः पर्यागच्छति । गतिसंज्ञाबाधात् 'गतिर्गतौ' इति निघातो न ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Exposition

§ The term 'अनर्थक' in the present *sūtra* does not mean *devoid of meaning* (अविद्यमानार्थक), but it signifies *not conveying any meaning other than that of the root* (अनर्थान्तरवाचिन्). As the *Tattvabodhinī* puts it : "कुतोऽध्यागच्छतीति। इह प्रजयति, पराभवति, वृक्षं प्रति विद्योतते—इत्यत्र प्रादेर्विशेषद्योतकत्ववदधिपर्योरिह विशेषद्योतकत्वाभावादानर्थक्यम्, धात्वर्थमात्रद्योतकत्वेन त्वर्थवत्तास्त्येवेति बोध्यम्." Haradatta has the following illuminating note on this point : "अनर्थान्तरवाचिनौ इति। यथा तिष्ठति, नितिष्ठति, परिभवतीत्यादौ धातूपात्तादर्थादर्थान्तरवाचित्वम्, नैवमत्रार्थान्तरवाचित्वम्; किन्तु आगच्छतीति प्रयोगे योऽर्थः स एव अधिपरियोगे ताभ्यामुच्यते। तदत्र प्रयोगे धातोरधिपर्योश्च सहाभिधायित्वम्; यथा गजशब्दे योऽर्थः स एव मतङ्गज इति सर्व्वैः सहाभिधीयते। एवं वृषशब्दे योऽर्थः स एव वृषभशब्दे। तदेवमनर्थान्तरवाचित्वादनर्थककल्पत्वादनर्थकौ इत्युक्तम्—न तु अभावात्। तयोश्च गतिसंज्ञाबाधाय कर्मप्रवचनीयसंज्ञा विधेयेति दर्शितं भवति।"—*Padamañjarī*.

§ **'गतिसंज्ञाबाधात्······निघातो न'**—According to the *sūtra* 'गतिर्गतौ' (VIII. 1. 70), a गति (i.e. उपसर्ग) becomes *unaccented*, when it is immediately followed by another गति. In the instance 'कुतोऽध्यागच्छति', however, as अधि is not regarded as a गति, but as a कर्मप्रवचनीय, it is not unaccented according to VIII. 1. 70. Now, what is the use of including 'कुतः' in the example ? As to that, *Tattvabodhinī* points out : 'गतिर्गतौ' इत्यत्र 'पदात्' इत्यधिक्रियते इति पदात् परत्वसम्पत्तये 'कुत' इत्युक्तम्."[1] See also *Bālamanoramā*.

§ 555. सुः पूजायाम् ॥ 1.4.94.

दीक्षितः ॥ सु सिक्तम्, सुस्तुतम्। अनुपसर्गत्वान्न षः। पूजायां किम्—सुषिक्तं किं [स्यात्] तवात्र। क्षेपोऽयम् ॥

1. It may be noted here, however, that the अधिकार 'पदात्' (VIII. 1.17) extends upto VIII. 1. 68, so that 'गतिर्गतौ' (VIII. 1. 70) cannot come under the said अधिकार. On VIII. 1. 69 *Kāśikā* observes : 'पदादिति निवृत्तम्'.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Exposition

The indeclinble सु is a कर्मप्रवचनीय in the sense of '*adoration*', '*honour*'. In the examples' 'सु सिक्तम्', 'सु स्तुतम्' it is the sense conveyed by the roots (viz. √सिच् and √स्तु) that is commended. As the author of the *Kāśikā* the notes: 'धात्वर्थः स्तूयते'. As सु is not an उपसर्ग here the rule enjoining cerebralisation of the initial स of the roots does not apply. As Bhaṭṭojī notes: "अनुपसर्गत्वान्न षः." Cf. also: 'उपसर्गसंज्ञाश्रयं षत्वं न भवति'—*Kāśikā*.

§ "पूजायां किम्......क्षेपोऽयम्" (Dīkṣita)—In the counter-example "सुषिक्तं किं तवात्र"—which is the reading in the *Kāśikā* no *commendation* is meant but क्षेप or निन्दा (*censure*). *Bālamanoramā* adopting the reading 'सुषिक्तं कि स्यात् तवात्र' brings out the sense of *censure* in the statement as follows: 'त्वया सम्यक् सिक्तम्। किन्तु अत्रास्मिन् सुसेके कृते सति सेक्तुस्तव किम्, न किञ्चदपीत्यर्थः।"—in this case षत्व takes place according to 'उपसर्गात् सुनोति—',the particle 'सु' being *not* a कर्मप्रवचनीय but an उपसर्ग, conveying as it does the meaning of क्षेप.

§ 556 अतिरतिक्रमणे च ।।—I.4.95.

दीक्षितः ।। अतिक्रमणे पूजायां च अतिः कर्मप्रवचनीयसंज्ञः स्यात् । अति देवान् कृष्णः ।।

Exposition

§ In the sense of अतिक्रमण ('*excelling*', '*surpassing*') as also पूजा ('*honour*', '*adoration*'), which is construed in the present *sūtra* from the preceding one (1.4.94) by the force of the particle च the indeclinable particle 'अति' becomes कर्मप्रचनीय. The same example 'अति देवान् कृष्णः' might be construed as illustrating both these senses. Cf "अति देवान् कृष्ण इति। प्रपञ्चसंरक्षणविषये देवेभ्योऽधिकः कृष्ण इत्यर्थः। देवानां पूज्य इति वां। आद्येऽर्थे। 'कुगतिप्रादयः' इति समासो न 'स्वती पूजायाम्' इति नियमात्। द्वितीये त्वनमिधानान्नेत्याहुः।"—*Bālamanoramā*. 'अतिक्रमण' has been explained in the *Kāśikā* as "निष्पन्नेऽपि वस्तुनि कियाप्रवृत्तिरतिक्रमणम्।"—*loc.*

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

cit. Instead of 'अतिदेवान् कृष्णः', *Kāśikā* cites the examples 'अति सिक्तमेव भवता। अति स्तुतमेव भवता', in which case the absence of षत्व is due to 'अति' being a कर्मप्रवचनीय in the above two senses and *not* an उपसर्ग. Jñānendra Sarasvatī refers to this reading of the *Kāśikā* with the following observations : "अन्ये तूदाहरन्ति अति सिक्तम्, अति स्तुतमिति। बहुतरं समीचीनं वा सिक्तं स्तुतं चत्यर्थः। बहुतरार्थे अतिकमणं समीचीने पूजेति विवेकः।"—*Tattvabodhinī*.

§ 557. अपिः पदार्थसम्भावनाऽन्ववसर्गगर्हासमुच्चयेषु ॥—I.4.96

दीक्षितः ॥ एषु द्योत्येष्वपिरुक्तसंज्ञः स्यात्। सर्पिषोऽपि स्यात्। अनुपसर्गत्वान्न षः। सम्भावनायां लिङ्। तस्या एव विषयभूते भवने कर्तृदौर्लभ्यप्रयुक्तं दौर्लभ्यं द्योतयन्नपिशब्दः स्यादित्यनेन संबध्यते। 'सर्पिषः' इति षष्ठी त्वपिशब्दबलेन गम्यमानस्य बिन्दोरवयवावयविभावसम्बन्धे। इयमेव ह्यपिशब्दस्य पदार्थ-द्योतकता नाम। द्वितीया तु नेह प्रवर्त्तते, सर्पिषो बिन्दुना योगो न त्वपिनेत्युक्तत्वात्। अपि स्तुयाद्विष्णुम्, सम्भावनं शक्त्युत्कर्ष-माविष्कर्तुमत्युक्तिः। अपि स्तुहि, अन्ववसर्गः कामचारानुज्ञा। धिग्देवदत्तम् अपि स्तुयाद् वृषलम्, गर्हा। अपि सिञ्च, अपि स्तुहि, समुच्चये ॥

Exposition

§ 'पदार्थ' means *"the meaning of a word that is not expressly stated."* (पदान्तरस्य अप्रयुज्यमानस्य अर्थः पदार्थः—*Kāśikā*). So, where अपि signifies the sense of another word that is not actually stated in the sentence there it becomes a कर्मप्रवचनीय. As the *Nyāsa* clearly explains : "पदार्थ इति। अन्यस्य पदस्यार्थो लक्ष्यते। न स्वार्थो नापि स्वसम्बन्धिनः पदस्य अर्थः पदार्थः। स्वपदार्थग्रहणे स्वसम्बन्धिपदार्थग्रहणे वा पदार्थग्रहणमनर्थकं स्यात्। अपिशब्दस्य हि योऽर्थो यश्चापिशब्दसम्बन्धिनः स्यादित्यादेः पदस्य, स पदार्थ एवेति किं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पदार्थग्रहणेन ? तस्मात् पदार्थग्रहणसामर्थ्याद् विशिष्टपदस्यार्थः विज्ञायत इत्याह--पदान्तरस्य इत्यादि।" Thus, in सर्पिषोऽपि स्यात्, मधुनोऽपि स्यात्, the particle अपि signifies the sense of the word बिन्दु (मात्रा etc.) that is unexpressed. As the *Kāśikā* states: 'मात्रा बिन्दुः स्तोकमित्यस्यार्थेऽपिशब्दो वर्त्तते।'

§ **सम्भावनायां लिङ्**—(Dīkṣita). In "सर्पिषोऽपि स्यात्' the लिङ् in स्यात् is according to the *Vāttika* under the rule 'उपसंवादाशङ्कयोश्च' (III. 4. 8) where, आशङ्का means उत्प्रेक्षा (i.e. सम्भावना). "उपसंवादाशङ्कयोर्वचनानर्थक्यं निर्गुणत्वात्". Vide *Bālamanoramā*.

§ "**तस्या एव·····पदार्थद्योतकता नाम**" (Dīkṣita)—Here Dīkṣita explains the relation of अपि with the verbal form 'स्यात्' on the one hand and with 'सर्पिषः' in the genitive ending on the other. The sense conveyed by the विधिलिङ् ending in 'स्यात्'—viz. आशङ्का or संभावना, has for its object (विषय) the sense of the roof अस् (viz. भवन—'being') which is understandable only if the 'subject' (कर्तृ) of the verb 'to be' (√अस्) be 'scarce' (दुर्लभ). Thus, the sense of दौर्लभ्य or '*scarcity*' as finally conveyed by अपि here is a corollary to the idea of दौर्लभ्य in respect of 'बिन्दु', the subject of the verb 'to be'—and this idea of बिन्दु is the 'पदार्थ' as referred to in the *sūtra* under consideration. So, the particle 'अपि' is द्योतक of the meaning conveyed by the word 'बिन्दु' though not actually employed in the expression 'सर्पिषोऽपि स्यात्'. The relation of बिन्दु with 'सर्पिस', however, is of the nature of अवयवावयविभाव—i.e. *the relation as between the part and the whole*, and as such षष्ठी is used to convey that sense after सर्पिस् and *not* द्वितीया according to 'कर्मप्रवचनीययुक्ते द्वितीया'. As a result the particle अपि not merely conveys the idea of 'बिन्दु' but also its दौर्लभ्य in the manner described above and all this is implied by the term 'पदार्थ' in the *sūtra*. As *Tattvabodhinī* comments: "**इयमेवेति।** बिन्दुदौर्लभ्यप्रयुक्तदौर्लभ्यद्योतकतैवेत्यर्थः।"

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

See also *Bālamandramā* on the point. The following *Bhāsya* text which is the source of all these later discussions may be profitably consulted here : "अथ वा यदत्र कर्मप्रवचनीययुक्तं नादः प्रयुज्यते । किं पुनस्तत् ? विन्दुः ।। बिन्दोस्तर्हि कस्मान्न भवति ? 'उपपदविभक्तेः कारकविभक्तिर्बलीयसी''-ति प्रथमा भविष्यति ।"—Nāgeśa in his °*Uddyota* makes the intention of the Bhāṣyakāra explicit as follows : **अथवेति** । अयं भावः—अपिना परपदार्थो बिन्दुस्तद्दौर्लभ्यप्रयुक्तदौर्लभ्यं संबन्धश्च द्योत्यते । तत्रापि-द्योत्यसंबन्ध-प्रतियोगित्वस्य बिन्दौ सत्त्वात् तस्यैव कर्मप्रवचनीययुक्तत्वमिति । तदाह—**बिन्दुकर्तृकत्वमिति** । तद्दौर्लभ्यप्रयुक्तदौर्लभ्यं चेत्यपि बोध्यम् ।"—*loc. cit.*

§ "अपि स्तुयाद् बिष्णुम्....प्रत्युक्तिः" (Dīkṣita)—In the expression 'अपि स्तुयात् विष्णुम्' लिङ् in 'स्तुयात्' is used in the sense of 'संभावन' according to the rule : "संभावनेऽलमिति चेत् सिद्धाप्रयोगे' (III. 3. 154), on which *Kāśikā* explains संभावन as : 'संभावनं क्रियासु योग्यताध्यवसानं शक्तिश्रद्धानम् ।' Bhaṭṭoji follows *Kāsikā* when he states : "संभावनं शक्त्युत्कर्षमाविष्कर्तुमत्युक्तिः." In *sūtrā* VI. . 21 ('आशङ्काबाधनेदीयःसु संभावने') also the term संभावन occurs which has been explained in *Kāsikā* as : 'अस्तित्वाध्यवसायः संभावनम् ।' The expression 'संभावनवचन' is also met with in *sūtra* III. 3. 155. Puruṣottamadeva, in his *Bhāṣāvṛtti* on the present *sūtra*, however, reads 'संभावना' instead of 'संभावन' which runs counter to the genuine Pāṇinean tradition as is evident from the citations above. Cf. "सम्भावना योग्यता । 'अपि स्थाणुं जयेद्रामः ।'"—*Bhāṣāvṛtti, loc. cit.*

§ 'अन्ववसर्ग' means 'कामचारानुज्ञा'—i. e. "*permission to do as one likes*" according to *Kāśikā* and this is repeated by Bhaṭṭoji. The author of the *Bhāṣāvṛtti* says : "अन्ववसर्गः प्राकाम्यम् । अपि सिञ्च अपि स्तुहि ।"—*loc cit* Bhaṭṭoji merely illustrates : 'अपि स्तुहि', probably in order to avoid confusion with समुच्चय, which he illustrates by 'अपि सिञ्च अपि स्तुहि'.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

In the instances लोट् is employed in the sense of अतिसर्ग according to the rule : "प्रैषातिसर्गप्राप्तकालेषु कृत्याश्च" (III. 3. 163), where अतिसर्ग is used in the same sense as 'अन्ववसर्ग' in the present *sūtra*—viz. कामचाराभ्यनुज्ञा. As *Kāśikā* explains : 'कामचाराभ्यनुज्ञानमतिसर्गः.' 'आमन्त्रण' is also employed by Paṇini in the same sense in III. 3. 161 (vide : आमन्त्रणं कामचारकरणम्'—*Kāsikā, loc. cit.*).

§ गर्हा means 'कुत्सा' or 'निन्दा'. 'अपि स्तुयात् वृषलम्'—This much is the example proper, 'धिग् देवदत्तम्' merely serving as expletive. The लिङ् in स्तुयात् is in the sense of संभावना according to III. 4.8 referred to above. cf. 'गर्हयां लडपिजात्वोः' (III.3.142) इति लटं बाधित्वा परत्वादन्तरङ्गत्वाच्च संभावनायां लिङ् । अत्र वृषलस्य निन्द्यत्वात् तत्स्तुतेर्निन्द्यत्वं गम्यमानमपिशब्दो द्योतयति, धिग् देवदत्तमिति तदनुवादः ।"—*Bālamanoramā.*

§ 'समुच्चय' means 'अनेकाक्रियाध्याहार'—i.e. 'aggregation'. In the example cited the two actions denoted by the verbal forms 'सिञ्च' and 'स्तुहि' are brought together by the *two* particles 'अपि' used as कर्मप्रवचनीय, and as such there has been no cerebralization according to the rule : 'उपसर्गात् सुनोति—' (VIII. 3. 65). Cf . "अपि सिञ्च, अपि स्तुहीति । अपिद्वयेन मिलितेन समुच्चयद्योतनात् प्रत्येकं कर्मप्रवचनीयत्वादुभयत्रापि षत्वाभावः । सिञ्च स्तुहि चेत्यर्थः ।"—*Bālamanoramā.* Under *sūtra* "चार्थे द्वन्द्वः" (II. 2. 29) Bhaṭṭoji explains समुच्चय as "परस्परनिरपेक्षस्यानेकस्य एकस्मिन्नन्वयः समुच्चयः". This समुच्चय may, again, be of क्रिया, द्रव्य and गुण as in देवदत्तः पचति हसति च, राज्ञो गजाश्चाश्वाश्च and पटः शुक्लो रक्तश्चेति respectively. In this particular context the समुच्चय meant is of the type "क्रियासमुच्चय" as distinct from the other two types illustrated above.

§ 558. कालाध्वनोरत्यन्तसंयोगे—(II 3.5)

दीक्षितः ।। इह द्वितीया स्यात् । मासं कल्याणी । मासमधीते । मासं गुड़धानाः । क्रोशं कुटिला नदी । क्रोशमधीते ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्रोशं गिरिः । अत्यन्तसंयोगे किम्—मासस्य द्विरधीते, क्रोशस्यैकदेशे पर्वतः ॥

Exposition

The term अत्यन्तसंयोग (*duration*) has been explained by the *Kāśikā* as follows: "क्रियागुणद्रव्यैः साकल्येन कालाध्वनोः सम्बन्धोऽत्यन्तसंयोगः ।" In the *sūtra* द्वितीया is enjoined after words denoting *time* (काल) and *space* (अध्वन्) when the relation of अत्यन्तसंयोग is meant to be expressed between them on the one hand and गुण (*quality*), and द्रव्य (*substance*) on the other. As regards अत्यन्तसंयोग between काल and अध्वन् on the one hand and क्रिया (*action*) expressed by intransitive roots (अकर्मकधातु) on the other, द्वितीया is enjoined by the इष्टि (ruling) of the Bhāṣyakāra-viz. "अकर्मकधातुभिर्योगे देशः कालो भावो गन्तव्योऽध्वा च कर्मसंज्ञक इति वाच्यम्," which has been already explained under the *sūtra* : 'अकथितञ्च' (I. 4. 52). As Bhāṣyakāra states under he present *sūtra* : "न तर्हीदानीमिदं सूत्रं वक्तव्यम् ? वक्तव्यं च । किं प्रयोजनम् ? यत्र अक्रियया अत्यन्तसंयोगस्तदर्थम् । क्रोशं कुटिला नदी । क्रोशं रमणीया वनराजिः ।"— So also Haradatta : "इदमपि अवश्यं वक्तव्यम्—द्रव्यगुणाभ्यामत्यन्तसंयोगे द्वितीया यथा स्यादिति ।"

In the *Sūtra* the words काल and अध्वन् do not stand for themselves as is to be expected by the rule "स्वं रूपं शब्दस्याशब्दसंज्ञा" (I. 1. 68), but they stand for words like मुहूर्त्त, मास, योजन, क्रोश etc. denoting particular divisions of time and space. As the *Tattvabodhinī* points out : "द्वितीया स्यादिति । श्रुतत्वात् कालाध्ववृत्तिभ्यामेव । स्वरूपग्रहणं त्विह न भवति । 'कालाः' (II. 1. 28), 'अत्यन्तसंयोगे च' (II. 1. 29) इति समासविधायके 'कालाः' इति वहुवचननिर्देशेन द्वितीयाविधौ स्वरूपविधिर्नेति ज्ञापनात् । अतएव 'मासप्रमितः, मुहूर्त्तसुखम्' इति द्वितीयासमासविधावुदाहरिष्यति ।"

॥ इति द्वितीया ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

॥ अथ तृतीया ॥

§ 559. स्वतन्त्रः कर्त्ता—(I.4.54.)

दीक्षितः ॥ क्रियायां स्वातन्त्र्येण विवक्षितोऽर्थः कर्त्ता स्यात् ।

Exposition

§ Here the term स्वतन्त्र is रूढ़ in the sense of प्रधान. As the *Bhāṣya* states : किं यस्य स्वं तन्त्रं स स्वतन्त्रः । किं ततः । तन्तुवाये प्राप्नोति । नैष दोषः । अयं तन्त्रशब्दोऽस्त्येव विताने वर्त्तते । तद्यथा, आस्तीर्णं तन्त्रम् । प्रोतं तन्त्रम् । वितान इति गम्यते । अस्ति प्राधान्ये वर्त्तते । तद्यथा, स्वतन्त्रोऽसौ ब्राह्मण इत्युच्यते स्वप्रधान इति गम्यते । तद् यः प्राधान्ये वर्त्तते तन्त्रशब्दः तस्येदं ग्रहणम् ।"[1] By प्राधान्य is implied अ-गुणभाव (i. e., *absence of subordination*). Thus, the agent (कर्तृ) is the principal (प्रधान) element in a judgement with respect to some action (क्रिया) and it is not subordinate (अ-गुण) to any other factor. This प्राधान्य again depends upon the intention (विवक्षा) of the speaker as in 'स्थाली पचति'. All this has been clearly pointed out in the *Padamañjarī* : "तेन यस्य गुणभावो नास्ति स कर्त्ता । कारकान्तराविवक्षायामपि चागुणभावो ऽस्त्येव । कः पुनरत्र कारकाणां गुणगुणिभावः ? यदा एकापायेऽपि क्रिया न निर्वर्त्तते । उक्तमत्र—

'प्रागन्यतः शक्तिलाभान्न्यग्भावापादनादपि ।
तदधीनप्रवृत्तित्वात् प्रवृत्तानां निवर्त्तनात् ॥
अदृष्टत्वात् प्रतिनिधेः प्रविवेकेऽपि दर्शनात् ।
आरादप्युपकारित्वात् स्वातन्त्र्यं कर्तुरिष्यते ॥'[2]

काष्ठादीनि कर्त्रा प्रवर्त्तितानि करणादिशक्तिं प्रतिलभन्ते, कर्त्ता तु प्रागेव । कर्तृसन्निधौ च करणादीनि न्यग्भवन्ति, तदधीने च तेषां प्रवृत्तिनिवृत्ती ।

---

1 *Vide* : 'तन्त्रं प्रधाने सिद्धान्ते सूत्रवाये परिच्छदे'—*Amara*° III. 3. 185

2 *Vākyapadīya*, III. 7. 101-102

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रधानकर्तुश्च प्रतिनिधिर्न दृष्टः। करणादीनां तु दुष्टः—व्रीह्यपचारे नीवारैरिज्यते। प्रविवेकः—अभावः। करणाद्यभावेऽप्यास्ते शेते इत्यादौ केवलः कर्त्ता दृश्यते। न तु कर्तुरभावे करणादीनि दृश्यन्ते। आरादप्युपकारित्वादिति। यद्यप्यसौ तटस्थः फलसिद्धावुपकरोति, न तु करणादिवदनुप्रविश्य तथापीत्यर्थः। एतच्च प्रायेण चेतनेष्वेव सम्भवति, नाचेतनेषु—रथो यातीत्यादौ। नैष दोषः। उक्तलक्षणे कर्त्तरि द्वयं दृष्टम् प्राधान्यमगुणभावश्च। तत्र अगुणभावः अचेतनेषु चेतनेष्वपि सम्भवति। स चायमगुणभावो न प्रतिनियतविषयः, यस्यैव तु विवक्ष्यते तस्यैव इति।"—For an explanation in English of the two *kārikās* cited above from Bhartṛhari's *Vākyapadīya* vide K. P. Trivedi's *Notes on the Vaiyākaraṇabhūṣaṇa*, pp. 653-54 (*Bombay Skt. Series*, No. LXX).

§ 560. साधकतमं करणम्—(I. 4. 42)

दीक्षितः। क्रियासिद्धौ प्रकृष्टोपकारकं कारकं करणसंज्ञं स्यात्। तमब्ग्रहणं किम्। गङ्गायाँ घोषः।

Exposition

§ *Vide* the following *Kārikās* of Bhartṛhari that define the nature of करण—

"क्रियायाः परिनिष्पत्तिर्यद्व्यापारादनन्तरम्।
विवक्ष्यते यदा तत्र करणत्वं तदा स्मृतम्॥
वस्तुतस्तदनिर्देश्यं न हि वस्तु व्यवस्थितम्।
स्थाल्या पच्यत इत्येषा विवक्षा दृश्यते यतः॥"

—*Vākyapadīya*, III. 7. 90-91

—i e. "of all the accessories of action that which is intended to be described is one the immediate operation of which leads to the accomplishment of action. Really speaking it is not possible to say that this is करण ; for though स्थाली is an

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अधिकरण of cooking, the speaker may desire to express it as an instrument and we may have the प्रयोग—स्थाल्या पच्यते instead of स्थाल्यां पच्यते"—K. P. Trivedi on *Vaiyākaraṇabhūṣaṇa*. p. 655.

§ **तमब्ग्रहणं किम् ? गङ्गायां घोषः**—(Dīkṣita). The question is —all the *Kārakas* (कारक) being efficient (साधक) with regard to the completion of the action in question, what is the use of adding the superlative suffix (तमप्) in 'साधकतमम्' ? For even without the addition of the said suffix, a करण would have been regarded as साधक *par excellence* (i. e., साधकतम) just as when one says 'अभिरूपाय कन्या देया' (the daughter should be given in marriage to a *desirable* bride-groom) what he actually means thereby is 'अभिरूपतमाय कन्या देया' (the daughter should be given in marriage *to the most desirable* bride-groom). So what is the use of adding the suffix तमप् for demarcating करण from all other कारक's like अपादान, अधिकरण etc. that are merely साधक's and not साधकतम's ? To this the reply is as follows : If in the present *sūtra, excellence* (प्रकर्ष) be conveyed even without the aid of the superlative suffix, by the same logic in the case of other *kārakas*, too, like अपादान, अधिकरण etc. excellence (प्रकर्ष) would have to be perforce taken into account even if there be no use of the suffix तमप्. Thus when Pāṇini defines अपादान in the *sūtra* : 'ध्रुवमपायेऽपादानम्' the definition would have applied to the case of अपादान *par excellenee*, viz. where actual *physical separation* (अपाय) is meant and it would not cover cases of गौण अपादान where mere *intellectual separation* (बुद्धिपरिकल्पित अपाय) is meant. So also the definition of अधिकरण (आधारोऽधिकरणम्) would have applied only to मुख्य आधार (आधार *par excellence*) where there is complete pervasion (व्याप्ति) of the *substratum* by the *substrate* and not included cases of गौण आधार, where the sense of actual pervasion is absent. Pāṇini by adding the suffix तमप् in the present

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

case, seeks to imply that in the *kāraka*-section (कारकाधिकार), no idea of प्रकर्ष is to be conveyed without the actual addition of the suffixes तरप् and तमप्. As a result of this, मुख्य and गौण अपादान's are both included under the definition of अपादान just as मुख्य and गौण आधार's are both equally subsumed under the definition of अधिकरण. All this has been clearly pointed out by the Bhāṣyakāra himself:'—"तमब्ग्रहणं किमर्थम्, न साधकं करणमित्येवोच्येत? साधकं करणमितीयत्युच्यमाने सर्वेषां कारकाणां करणसंज्ञा प्रसज्येत। सर्वाणि हि कारकाणि साधकानि, तमब्ग्रहणे पुनः क्रियमाणे न दोषो भवति।....एवं तर्हि लोकत एतत् सिद्धम्। तद् यथा। लोकेऽभिरूपाय उदकमानेयमभिरूपाय कन्या देयेति न चानाभरूपे प्रवृत्तिरिति तत्राभिरूपतमायेति गम्यते। एवमिहापि साधकं करणमित्युच्यते; सर्वाणि च कारकाणि साधकानि न चासाधके प्रवृत्तिरस्ति—तत्र साधकतममिति विज्ञास्यते॥ एव तर्हि सिद्धे सति यत् तमब्ग्रहणं करोति तज्ज्ञापयत्याचार्य्यः कारकसंज्ञायां तरतमयोगो न भवतीति। किमेतस्य ज्ञापने प्रयोजनम्? अपादानमाचार्य्यः किं न्याय्यं मन्यते यः संप्राप्य निवृत्तिः। तेनेहैव स्यात्—ग्रामादागच्छति नगरादागच्छतीति। सांकाश्यकेभ्यः पाटलिपुत्रका अभिरूपतरा इत्यत्र न स्यात्। कारकसंज्ञायां तरतमयोगो न भवतीत्यत्रापि सिद्धं भवति। तदाधारमाचार्य्यः किं न्याय्यं मन्यते यत्र कृत्स्न आधारात्मा व्याप्तो भवति। तेनेहैव स्यात्—तिलेषु तैलम्, दध्नि सर्पिरिति। गङ्गायां गावः, कूपे गर्गकुलमित्यत्र न स्यात्। कारकसंज्ञायां तरतमयोगो न भवतीत्यत्रापि सिद्धं भवति।"—अधिकरण is of three kinds: अभिव्यापक, वैषयिक, and औपश्लेषिक, of which first is the मुख्य अधिकरण (i. e. अधिकरण *par excellence*) and the other two are गौण or secondary. *Vide* also *Bhāṣya* on I. 3. 11: "अधिकरणमाचार्य्यः किं न्याय्यं मन्यते यत्र कृत्स्न आधारात्मा व्याप्तो भवति।" 'गङ्गायां घोषः' is a case of औपश्लेषिकाधिकरण.

§ 561. कर्तृकरणयोस्तृतीया—(II. 3. 18.)

दीक्षितः॥ अनभिहिते कर्तरि करणे च तृतीया स्यात्। रामेण बाणेन हतो वाली। 'प्रकृत्यादिभ्य उपसंख्यानम्' (वा०)। प्रकृत्या

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चारुः । प्रायेण याज्ञिकः । गोत्रेण गार्ग्यः । समेनैति । विषमेणैति । द्विद्रोणेन धान्यं क्रीणाति । सुखेन दुःखेन वा यातीत्यादि ।

Exposition

§ 'अनभिहिते' follows from the rule P.II.3.1 already explained, which is a governing rule (i. e. अधिकारसूत्र).

§ **'प्रकृत्यादिभ्य उपसंख्यानम्'**—This is a *Vārttika*.[1] In the *Gaṇapāṭha* प्रकृति, प्राय, गोत्र सम, विषम, द्विद्रोण, पञ्चक and साहस्र only are included in the list प्रकृत्यादि. But the scholiasts assert that the said list is not exhaustive. It is merely an illustrative one—'आकृतिगणोऽयम्', as the *Tattva-bodhinī* states. To indicate this Dīkṣita cites the example 'सुखेन दुःखेन वा यातीत्यादि' though सुख and दुःख are not read in the प्रकृत्यादिगण.[2] Similarly तृतीया in such usages as 'नाम्ना सुतीक्ष्णश्चरितेन दान्तः' (*Raghu*° XIII.41) is justified. The तृतीया in such instances is a case of उपपदविभक्ति : 'उपपदविभक्तिरियम्' —*Bālamanoramā*.

The Bhāṣyakāra, and following him later commentators, dispense with the above *Vārttika* and justify the third case-ending in प्रकृत्या चारुः etc. according to करणे तृतीया on the basis of the dictum : 'गम्यमानापि क्रिया कारकविभक्तौ प्रयोजिका.' So according to Bhāṣyakāra and his followers तृतीया in प्रकृत्या चारुः etc. is a case of कारकविभक्ति and not उपपदविभक्ति, as प्रकृति etc. are करण's with reference to the action (क्रिया) conveyed by such roots as √कृ etc. that are left unexpressed. Cf "तर्त्हि वक्तव्यम् ? न वक्तव्यम् । कर्तृकरणयोस्तृतीयेत्येव सिद्धम् । इह तावत् प्रकृत्याभिरूपः, प्रकृत्या दर्शनीयः इति प्रकृतिकृतं तस्याभिरूप्यम् । ...."etc. —*Bhāṣya* on II. 3. 18. *See* also "प्रत्याख्यानं तु—इह

1. It is read as 'तृतीया विधाने प्रकृत्यादिभ्य उपसंख्यानम्' in the *Bhāṣya*.

2. Purnṣottama cites 'तत्रागारं धनपतिगृहानुत्तरेणास्मदीयम्' as an instance of प्रकृत्यादित्वात् तृतीया.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तावत् प्रकृत्याऽभिरूप इति गम्यमानाऽपि क्रिया करणादिव्यपदेशस्य निमित्तम् । इह च करोतिक्रिया गम्यते । करणान्तरव्युदासाय च प्रकृतेः करणत्वं विवक्षितं स्वभावेनायमभिरूपः कृतो न वस्त्रालङ्कारादिना इत्यर्थः ॥"—Haradatta.

§ 562. दिवः कर्म च—(I. 4. 43.)

दीक्षितः ॥ दिवः साधकतमं कारकं कर्मसंज्ञं स्यात्, चात् करण-संज्ञम् । अक्षैरक्षान्वा दीव्यति ।

Exposition

§ "दिवु क्रीड़ा-विजिगीषा-अभ्यवहार-द्युति-स्तुति-मोद-मद-स्वप्न-कान्ति-गतिषु". Here the sense of क्रीड़ा is meant. The *Kāśikā* on the present *sūtra* runs as follows :—"पूर्व्वेण करणसंज्ञायां प्राप्तायां कर्म-संज्ञा विधीयते । दिवः साधकतमं यत् कारकं तत् कर्मसंज्ञं भवति, चकारात् करणसंज्ञञ्च ।"—दीव्यति means क्रीड़ति and not पातयति. As the *Padamañjarī* points out : "अक्षैः क्रीड़ति इत्यस्यामेव विवक्षायाम् 'अक्षान् दीव्यति' इति इष्यते, अत्र च करणसंज्ञैव प्राप्नोति । अक्षान् पातयतीत्यत्र चार्थे अक्षैर्दीव्यति इति नेष्यते । अतः साधकतमस्यैव करण-संज्ञायां प्राप्तामयमारम्भ इत्यर्थः ।"

§ **चात् करणसंज्ञम् :** (Dīkṣita)— The particle 'च' indicates the *simultaneity* (यौगपद्य or समुच्चय) of करणसंज्ञा and कर्मसंज्ञा with reference to 'अक्ष' and not *alternance* (पर्याय)—i. e., अक्ष is regarded both as a करण and a कर्म *at the same time* in relation to the verb दीव्यति. Otherwise, if Pāṇini had intended *option* (पर्याय), he would have added the term 'अन्यतरस्याम्' in the present *sūtra* instead of in the subsequent *sūtra* ('परिक्रयणे सम्प्रदानमन्यतरस्याम्'—I. 4. 44) in place of the particle 'च'. As the *Padamañjarī* explicity points out : "अथ किमर्थश्चकारः ? करणसंज्ञापि यथा स्यात् । नैतदस्ति प्रयोजनम् । वक्ष्यमाणमन्यतरस्यांग्रहण-मिहव करिष्यामि तत्राह—चकारात् करणसंज्ञा चेति । युगपत् संज्ञाद्वयं यथा स्यादिति। अन्यतरस्यांग्रहणे तु पर्य्यायः स्यात्—यदा कर्म न तदा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

करणम्, यदा करणं न तदा कर्म । चकारात् तु युगपत् संज्ञाद्वयं भवती-त्यर्थः । यौगपद्यप्रयोजनं मनसा दीव्यतीति कर्मत्वात् अण् प्रत्ययः, करण-त्वाच्च तृतीया, 'मनसः संज्ञायाम्' (VI. 3.4) इत्यलुक् मनसादेवः । इह चाक्षैर्देवयते देवदत्तो यज्ञदत्तेनेति, अक्षैरिति. तृतीयायोगेऽपि धातोः सकर्मकत्वात् 'गति-बुद्धि—' (I, 4. 52) इत्यादिना ण्यन्तावस्थायां कर्तुर्यज्ञदत्तस्य कर्मसंज्ञा न भवति, 'अणावकर्मकात्—'(I. 3.88) इति परस्मैपदञ्च ।"—Now, it might be stated that if the principle of यौगपद्य be accepted such usages as दीव्यन्ते अक्षाः and देवना अक्षाः, would be erroneous, as in the former, we should have दीव्यन्ते अक्षैः (the कर्मत्व of अक्ष being alone *expressed* अभिहित by the लट् in दीव्यन्ते), while in the latter देवना अक्षान् would be the correct form (the करणत्व alone of अक्ष being expressed (अभिहित) by the suffix ल्युट्. To this Haradatta proposes the following solution: "..अयं तर्हि समावेशे दोषः। दीव्यन्ते अक्षाः इति अभिहितेऽपि कर्मणि करणस्य अनभिहितत्वात् तृतीया स्यात् । तथा देवना अक्षाः इति ल्युटा करणस्याभिधानेऽपि कर्मणोऽनभिधानेन द्वितीया स्यात् । नैष दोषः । एकैव कारकशक्तिः संज्ञाद्वययोगिनी । ततश्च एकस्मिन् कारकेऽभिहिते कारकान्तरमपि अभिहितं भवति, शक्तेरेकत्वात् ।" The *Tattvabodhinī* records *verbatim* the arguments of Haradatta.

§ 563. अपवर्गे तृतीया—(II. 3. 6)

दीक्षितः ।। अपवर्गः फलप्राप्तिः, तस्यां द्योत्यायां कालाध्वनो-रत्यन्तसंयोगे तृतीया स्यात् । अह्ना क्रोशेन वा अनुवाकोऽधीतः । अपवर्गे किम्—मासमधीतो नायातः ।

Exposition

§ The previous *sūtra* 'कालाध्वनोरत्यन्तसंयोगे' (II. 3. 5) also follows in the present *sūtra* and is construed with it. Here the term अपवर्ग implies क्रियापवर्ग, and not साधनापवर्ग. As Patañjali points out : "क्रियापवर्ग इति वक्तव्यम्। साधनापवर्गे मा भूत्। मास-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मधीतोऽनुवाकः, न चानेन गृहीतः ।" The *Kāśikā* states this clearly : "अपवर्गः फलप्राप्तौ सत्यां क्रियापरिसमाप्तिरिति ।"—on which *Padamañjarī* comments : "तत्रैव अपवर्गशब्दो लोके प्रसिद्ध इति भावः ।' अपवर्ग is the result or fruit (फल) of अत्यन्तसंयोग (i. e., with क्रिया), and it qualifies the अत्यन्तसंयोगे that follows from the previous rule. The *Nyāsa* is very explicit here : "अपवर्ग इति । अत्यन्तसंयोगस्य फलरूपमेतद् विशेषणमुपात्तम् । तच्च क्रियाऽत्यन्त-संयोगस्यैव सम्भवति—नान्यस्येति सामर्थ्यादत्र क्रियात्यन्तसंयोग एव गृह्यते । सर्वस्याश्च क्रियायाः परिसमाप्तिरस्ति । तस्माद् विशेषणोपादानसामर्थ्यात् फलप्राप्तौ सत्यां क्रियायाः परिसमाप्तिरिहापवर्गो विज्ञायते ।"

§ 564. सहयुक्तेऽप्रधाने—(II. 3. 19)

दीक्षितः ।। सहार्थेन युक्तेऽप्रधाने तृतीया स्यात् । पुत्रेण सहागतः पिता । एवं साकंसार्द्धंसमंयोगेऽपि । विनापि तद्योगं तृतीया । 'वृद्धो यूना—' इत्यादिनिर्देशात् ।

Exposition

§ The addition of the term युक्त to सह indicates that the rule applies in the case of words having the same sense as सह—viz., साकम्, सत्रा, समम्, सार्धम् etc. As the *Kāśikā* says : "सहार्थेन च योगे तृतीयाविधानात् पर्यायप्रयोगेऽपि भवति । पुत्रेण सार्धमिति ।" Also : "युक्तग्रहणात् अर्थग्रहणं लभ्यते ; अन्यथा 'सहेऽप्रधाने' इत्येव वाच्यं स्यात् ।"—*Padamañjarī*. "कुतः पुनरेतदवगतं सहार्थेन योगे तृतीयाविधानमिति, युक्तग्रहणात् । तस्य च एतदेव प्रयोजनम्—सहार्थेन योगे तृतीया यथा स्यात्, नान्यत् ।"—*Nyāsa*. By सहार्थ is meant either तुल्ययोग (i.e., relation of an identical गुण, द्रव्य, or क्रिया with more than one thing) or विद्यमानता (i. e. mere accompaniment). As Viṭṭhala in his commentary *Prasāda* on Rāmacandra's *Prakriyākaumudī* observes : "सहार्थो नाम क्रियागुणद्रव्यैस्तुल्ययोगो, विद्यमानता च । गुणद्रव्याभ्यां तुल्ययोगस्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उदाहरणं तु 'पुत्रेण सह स्थूल:। पुत्रेण सह गोमान्।' विद्यमानतायां तु 'सहैव दशभिः पुत्रैर्भारं वहति गर्दभी'-ति विद्यमानैरित्यर्थ:।" *See* also *Padamañjarī*: "क्रियागुणद्रव्यैर्द्वयोः सम्बन्धे सति सहशब्दस्य प्रयोगो भवति। अतः 'पुत्रेण सहागतः पिता' इत्यादीनि क्रियादिसम्बन्धे यथाक्रममुदाहरणान्युपस्तानि।"

अप्रधान is that which is not *directly* related with a क्रिया etc. In पुत्रेण सहागतः पिता etc. पिता alone is directly related with आगतः etc. while the relation of पुत्र therewith is *implied* and as such indirect. So पुत्र is called अप्रधान. Thus the *Kāśikā* observes: "पितुरत्र क्रियादिसम्बन्धः शब्देनोच्यते, पुत्रस्य तु प्रतीयमान इति तस्य प्राधान्यम्।"—on which the *Padamañjarī* observes: "पूर्वं प्रज्ञातोऽप्रज्ञातो वा यस्य क्रियादिसम्बन्धः शब्देनोच्यते तस्य प्राधान्यम्। यस्य तु सहार्थान्यथानुपपत्त्या प्रतीयते तस्याप्राधान्यम्। कस्य पुनः शब्देनोच्यते, कस्य वा प्रतीयते यस्य विवक्ष्यते। एतदुक्तं भवति—द्वयोस्तावत् क्रियासम्बन्धे सति सहशब्दस्य प्रयोगः। तत्र यदा द्वयोरपि क्रियादिसम्बन्धः शब्देनोच्यते सहागतौ पितापुत्रौ इति, तदा द्वयोरपि प्राधान्यात् न भवति। यदा तु एकस्य क्रियादिसम्बन्धं शब्देन प्रतिपिपादयिषति अपरस्य सहार्थान्यथानुपपत्त्या तदा तस्य अप्राधान्यात् तद्वाचिनस्तृतीया इति।"

The Vārttikakāra, as also the *Bhāṣyakāra*, points out that the word अप्रधाने can be dispensed with in the present *sūtra* thus saving the use of four syllables (Comp. "अर्द्धमात्रालाघवेन पुत्रोत्सवं मन्यन्ते वैयाकरणाः"). "सहयुक्तेऽप्रधानवचनमनर्थकम्। उपपदविभक्तेः कारकविभक्तिबलीयस्त्वादन्यत्रापि।"—*Vārttika*. It is on this *varttika*, that the following observations of *Tattvabodhinī* are based: "अप्रधानग्रहणं त्यक्तुं शक्यम्। न चैवं पितुरपि तृतीयापत्तिः। तत्र प्रातिपदिकार्थमात्रे अन्तरङ्गत्वात् प्रथमोपपत्तेः। न च यत्र प्रथमा न प्राप्नोति पुत्रेण सह पितुरागमनमित्यादौ तत्र प्रधानात् पितुरपि तृतीया स्यादतः तद्वारणाय अप्रधानग्रहणमावश्यकमिति वाच्यम्। कारकविभक्तेर्बलीयस्त्वात् "कर्तृकर्मणोः कृति" (II. 3. 65) इति षष्ठ्या एव तत्र प्रवृत्तेरिति दिक्।" The author of the *Kāśikā*, however, justifies the use of 'अप्रधाने' by the following remark: "अप्रधाने इति किम्? शिष्येण सह उपाध्यायस्य गौः।"—the significance of which is explained as

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

follows : "अत्र द्रव्यसम्बन्धः षष्ठ्यैव उपाध्यायस्य उच्यते इत्यस्य प्राधान्यम्। तत्र असति अप्रधानग्रहणे प्रधानेऽपि उपाध्याये स्यात्। ननु च परत्वात् षष्ठी भविष्यति। न भविष्यति। अशेषत्वात्। सति तु अप्रधानग्रहणे शेषोऽयं सम्पद्यते इति षष्ठी।"—*Nyāsa.* Against this vide the *Padamañjarī* : "अत्राहुः,—यथा ग्रामं न गच्छतीत्यादौ ग्राम-गमनयोः पूर्वमभिसम्बन्धः पश्चात् नञा प्रतिषिध्यते। एवमुपाध्यायस्य पूर्वं गवा सम्बन्धः पश्चात् तत्सम्बन्धविशिष्टस्य गोः सहार्थेन योगः। अन्यथा कस्य सहत्वं प्रतिपाद्येत। अतो गवा सम्बन्धस्य अन्तरङ्गत्वात् उपाध्यायात् षष्ठी भविष्यति इति नार्थ एतेनं।"

§ 565. येनाङ्गविकारः—(II. 3. 20)

दीक्षितः ।। येनाङ्गेन विकृतेनाङ्गिनो विकारो लक्ष्यते ततः तृतीया स्यात्। अक्ष्णा काणः। अक्षिसम्बन्धिकाणत्वविशिष्ट इत्यर्थः। अङ्गविकारः किम्—अक्षि काणमस्य।

Exposition

The expression अङ्गविकार actually means अङ्गिविकारः, for the term अङ्ग here stands for अङ्गिन् (by the addition of the suffix अच्) or अङ्गसमुदाय (i. e., शरीर). See *Bālamanoramā.* Vide also *Kāśikā* : "अङ्गशब्दोऽत्र अङ्गसमुदाये शरीरे वर्त्तते। येनेति च तदवयवो हेतुत्वेन निर्दिश्यते। येन अङ्गेन विकृतेन अङ्गिनो विकारो लक्ष्यते ततस्तृतीया विभक्तिर्भवति। अक्ष्णा काणः। पादेन खञ्जः। पाणिना कुणिः। अवयवधर्मेण समुदायो व्यपदिश्यते।"—on which *Haradatta* comments : "अङ्गशब्दोऽवयववाची प्रसिद्धस्ततश्चायं सूत्रार्थः स्यात्—येन गुणेन अङ्गस्य अक्ष्यादेर्विकारस्ततस्तृतीयेति। ततश्च अक्षि काणमस्य इत्यादौ एव तु स्यात् काणादेर्गुणवचनादेव च स्यात्। अक्ष्णा काण इत्यादौ अक्ष्यादेर्न स्यादित्यालोच्य अन्यथा व्याचष्टे। अङ्गशब्दोऽत्रे-त्यादि। अर्शआद्यच्प्रत्ययान्तः शरीरवचनोऽङ्गशब्दः सूत्रे उपात्त इत्यर्थः। येन इति यदपेक्षमङ्गिनोऽङ्गित्वं स हेतुत्वेन निर्दिश्यते। विकृतेनेति। सामर्थ्यादेवैतल्लभ्यते—न हि अविकृतमङ्गमङ्गिनो विकारं प्रति हेतुः।"—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Now it may be asked: What is the use of the mention of 'अक्ष्णा' in the expression अक्ष्णा काणो देवदत्तः, as the expression 'काणो देवदत्तः' by itself is sufficient to convey the same idea of the deformation caused by thc blindness of the eye. To this the *Nyāsa* has the following answer: "कथं पुनरत्र अक्षिशब्दस्य प्रयोगः क्रियते ? यावता विनापि तेन काणत्वं गुणः समुदायस्य प्रतीयत एव ? सत्यमेतत् । लौकिके शब्दप्रयोगे गुरुलाघवं प्रत्यनादरात् । यस्तु तदाद्रियते सोऽक्षिशब्दं न प्रयुङ्क्त एव।" Haradatta too remarks: "कथं पुनरक्षिशब्दः प्रयुज्यते यावता काणशब्दोऽक्षिगतमेव विकारमाचष्टे। तत्र काणो देवदत्त इत्युक्ते नैव सन्देहो भवति किं स्वयमेव काणः, किं वाक्ष्णः काणतयेति। नाप्येवं सन्देहः किमक्ष्णः काणतयाऽसौ काणः किं वा पादस्येति। तदनर्थकोऽक्षिशब्दस्य प्रयोगः। एवं पादेन खञ्जः, पाणिना कुणिरित्यादौ पादादीनाम् ? उच्यते। अक्ष्याद्युपक्रमे वाक्ये अक्ष्णेत्युक्ते न ज्ञायते किं निरूपयति ? किं वा काण इति। तत्र विरूपत्वादिनिवृत्तये काणशब्दप्रयोगः, यथा द्वावानय कौ तौ द्वौ इत्युक्ते ब्राह्मणाविति।"—*Padamañjarī*. On this point, Viṭṭhala in °*Prasāda*, cites a verse from the *Pāṇinīyamata-darpaṇa*, a lost work on the Pāṇinian system:

"अक्ष्यादिशब्देन विनापि देहः स्यादेव काणादिगुणप्रतीतितः ।
अथापि लोको गुरुलाघवं प्रत्यनादरात् शब्दमपि प्रयुङ्क्ते ।।"

In this connexion the following *sūtra* from Vāmana's *Kāvyālaṃkāra* should be taken note of: "हानिवदाधिक्यमपि अङ्गानां विकारः।" येनाङ्गविकार इति सूत्रे यथा अङ्गानां हानिस्तथाधिक्यमपि विकारः। यथा, अक्ष्णा काण इति भवति तथा मुखेन त्रिलोचन इत्यपि भवति"—*Kāvyālaṃkārasūtra*, V. 2. 24 and *vṛtti* thereon.

§ 566. इत्थम्भूतलक्षणे—(II. 3. 21)

दीक्षितः ।। कञ्चित् प्रकारं प्राप्तस्य लक्षणे तृतीया स्यात् । जटाभिस्तापसः । जटाज्ञाप्यातापसत्वविशिष्ट इत्यर्थः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Exposition

§ Dīkṣita explains the meaning of the expression "इत्थम्भूत" by 'कञ्चित् प्रकारं प्राप्तस्य'. So also *Kāśikā* : "कञ्चित् प्रकारं प्राप्त इत्थम्भूतस्तस्य लक्षणम्—इत्थम्भूतलक्षणम्। ततस्तृतीयाविभक्तिर्भवति।"—which has been very clearly explained in the *Nyāsa* as follows : 'कञ्चित् प्रकारमित्यनेन इत्थमित्यस्य अर्थमाचष्टे। तथाहि प्रकारवचने 'इदमस्थमुः' (V. 3. 24) इति थमुप्रत्यये विहिते इत्थमित्येतत् रूपं भवति। सामान्यस्य भेदको विशेषः प्रकार उच्यते। आपन्न इत्यनेन भूतशब्दस्य अर्थमाचष्टे। तथाहि 'भू प्राप्तौ आत्मनेपदी' इत्यस्य चौरादिकस्य 'आ धृषाद्वा' इति यदा णिज् नास्ति तदा क्त-प्रत्यये भूत इति रूपं भवति। तस्य इत्थम्भूतस्य लक्षणमिति। लक्ष्यते चिह्न्यते अनेनेति लक्षणम्—चिह्नम्। अपि भवान् कमण्डलुना छात्रमद्राक्षीदिति। अत्र **मनुष्यत्वं** सामान्यम्। तस्य छात्रत्वं प्रकारः। तं प्राप्तस्य छात्रस्य कमण्डलुर्लक्षणम्। छात्रेणोपाध्यायमिति। **मनुष्यत्वं** सामान्यम्। तस्य उपाध्यायत्वं प्रकारः। तं प्राप्तस्य उपाध्यायस्य लक्षणं छात्रः। शिखया परिव्राजकमिति। **मनुष्यत्वं** सामान्यम्। **परिव्राजकत्वं** प्रकारः। तं प्राप्तस्य परिव्राजकस्य लक्षणं शिखा।" *Vide* also *Padamañjarī*. "कमण्डलुना छात्रमद्राक्षीति। छात्रोपाध्याययोर्गच्छतोश्छात्रस्य हस्ते कमण्डलुर्भवति। कमण्डलुना छात्रोऽयमिति ज्ञातवान् इत्यर्थः।" We are to note, however, that when the word indicative of the लक्षण (viz. कमण्डलु) enters into a बहुव्रीहि compound as in 'कमण्डलुपाणिश्छात्रः' the third case-ending is not used after the compound. As the *Kaśikā* says : "इह न भवति—कमण्डलुपाणिश्छात्र इति। लक्षणस्य समासेऽन्तर्भूतत्वात्।"—The following two *vārttikas* and the Bhāṣyakāra's remarks thereon are worth notice on this point as the *Kāśikā* only follows the *Bhāṣya* here : "**इत्थम्भूतलक्षणे तत्स्थे प्रतिषेधः**।' (*Vār.* § 1.)—इत्थम्भूतलक्षणे तत्स्थे प्रतिषेधो वक्तव्यः। अपि भवान् कमण्डलुपाणिं छात्रमद्राक्षीदिति।

'**न वेत्थम्भूतस्य लक्षणेनापृथग्भावात्**—' (*Vār.* § 2)—न वा वक्तव्यम्। किं कारणम्? इत्थम्भूतस्य लक्षणेनापृथग्भावात। यत्र इत्थम्भूतस्य पृथग्भूतं लक्षणम् तत्र भवितव्यम्। न चात्र इत्थम्भूतस्य पृथग्भूतं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लक्षणम् । किं वक्तव्यमेतत् । न हि । कथमनुच्यमानं गंस्यते । तथा ह्ययं प्राधान्येन लक्षणं प्रतिनिर्दिशति । इत्थम्भूतस्य लक्षणमित्थम्भूतलक्षणम् तस्मिन् इत्थम्भूतलक्षणे इति ।" Some might object, that in instances like जटाभिस्तापसः, कमण्डलुना. छात्रमद्राक्षीत् etc. the तृतीया might be regarded as a case of करणे तृतीया so that the present *sūtra* becomes useless. To this the *Padamañjarī* observes :—"यद्येवमीदृशे ज्ञाने कमण्डलोः करणत्वादेव तृतीया सिध्यति । एवं तर्हि यदाऽयं प्रमाता प्रमितिदशायामेवात्मनः प्रमितिविशेषं प्रतिपादयितुं वाक्यं प्रतुङ्क्ते—कमण्डलुना अयं छात्र इति, तदा ज्ञानक्रियायाः अप्रतिभासादप्रतिपाद्यत्वाच्च करणत्वामम्भवः । उदाहरणं तु एवं व्याख्येयम्—कमण्डलुना 'छात्र' इत्येवंरूपं ज्ञानमभूदिति । कोऽर्थः ? अद्राक्षीदिति निर्दिष्टस्य द्रष्टुर्ज्ञानविशेषोऽत्र कथ्यते—न प्रयोक्तुरित्यर्थः ।"

§ 567. संज्ञोऽन्यतरस्यां कर्मणि—(II.3.22)

दीक्षितः ।। संपूर्वस्य जानातेः कर्मणि तृतीया वा स्यात् । पित्रा पितरं वा संजानीते ।

Exposition

§ The root सम्-√ज्ञा governs both the accusative and the instrumental cases *optionally.* Here the third case-ending is optionally taught as an अपवाद of the second case-ending. As the *Bālamanoramā* observes : "द्वितीयापवादोऽयं तृतीयाविकल्पः". We have आत्मनेपद in संजानीते according to the rule "संप्रतिभ्यामनाध्याने" (I. 3. 45). When सम्-√ज्ञा means आध्यान (remembering) it is used in the परस्मैपद and governs the sixth case-ending according to the rule "अधीगर्थदयेशां कर्मणि" (II. 3. 52). *Vide Padamañjarī* 'संजानीते इति । संप्रतिभ्यामनाध्याने' इत्यात्मनेपदम् ।....आध्याने तु 'अधीगर्थदयेशाम्' इति षष्ठी भवति—सांजानातीति । कृत्प्रयोगे तु अनाध्यानेऽपि परत्वात् "कर्तृकर्मणोः कृति" इति षष्ठी भवति—मातुः संज्ञातेति ।"—So also *Nyāsa.*

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

§ 568 हेतौ—(II. 3. 23.)

दीक्षितः ।। हेत्वर्थे तृतीया स्यात् । द्रव्यादिसाधारणं निर्व्यापारसाधारणञ्च हेतुत्वम् । करणत्वं तु क्रियामात्रविषयं व्यापारनियतञ्च । दण्डेन घटः । पुण्येन दृष्टो हरिः । फलमपीह हेतुः । अध्ययनेन वसति । 'गम्यमानाऽपि क्रिया कारकविभक्तौ प्रयोजिका' । अलं श्रमेण । श्रमेण साध्यं नास्तीत्यर्थः । इह साधनक्रियां प्रति श्रमः करणम् । शतेन शतेन वत्सान् पाययति पयः । शतेन परिच्छिद्येत्यर्थः । 'अशिष्टव्यवहारे दाणः प्रयोगे चतुर्थ्यर्थे तृतीया' (वा ५०४०) । दास्या संयच्छते कामुकः । धर्म्ये तु भार्यायै संयच्छति ।

Exposition

§ The term 'हेतु' here is used in its popular (लौकिक) sense and not in the technical (शास्त्रीय) sense. As the *Nyāsa* points out : "हेतुर्द्विविधः—शास्त्रीयः लौकिकश्च । तत्र शास्त्रीयः 'तत्प्रयोजको हेतुश्च ।' लौकिकः फलसाधनयोग्यः पदार्थः । तत्र शास्त्रीये हेतौ 'कर्तृकरणयोस्तृतीया' (II. 3. 18.) इत्येवं सिद्धा तृतीया । तस्मात् लौकिकस्य हेतोरिदं ग्रहणमित्यत आह फलसाधनयोग्य इत्यादि । अनिष्पादयन्नपि फलं तत्साधनयोग्यः पदार्थो लोके हेतुरित्युच्यते इति योग्यग्रहणम् । धनेन कुलमित्यादौ कुलादीनि अकुर्वन्त्यपि धनादीनि तत्करणयोग्यतया लोके हेतुव्यपदेशमासादयन्तीति तेभ्यस्तृतीया ।" So also Haradatta in *Padamañjarī* : "तत्प्रयोजको हेतुश्चेति शास्त्रीयस्य हेतोश्चकारेण कर्तृसंज्ञाविधानात् कर्तृकरणयोरित्येव तृतीयायाः सिद्धत्वात् लोकिको हेतुर्गृह्यते ।"

§ "द्रव्यादि....व्यापारनियतञ्च" (*Dīkṣita*)—Here Dīkṣita draws a distinction between a करण and a हेतु. A करण is an instrument having an intermediate व्यापार (which is defined as 'तज्जन्यत्वे सति तज्जन्यजनको व्यापारः') giving rise to some resultant *action* (क्रिया). Cf. the definition of करण—viz. 'व्यापारवत् कारणं करणम्'. But a हेतु is a cause, whether it be some *action* (क्रिया), *quality* (गुण) or *substance* (द्रव्य), having an inter-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

mediate व्यापार or not. This distinction is based upon the following *kārikā* of Bhartṛhari :

"द्रव्यादिविषयो हेतुः कारकं नियतक्रियम् ।"
"अनाश्रिते तु व्यापारे निमित्तं हेतुरिष्यते ॥"
—*Vākyapadīya*, III. 7. 25[a] & 24[a]

Thus, the conception of a हेतु is much wider than that of a करण. That is why it has been defined in the *Kāśikā* as : 'फलसाधनयोग्यः पदार्थो लोके हेतुरुच्यते ।'—where फल (result) includes क्रिया, गुण and द्रव्य. In Dīkṣita's statement by 'द्रव्यादि' is meant द्रव्य, गुण and क्रिया. The *Kāśikā* cites धनेन कुलम्, कन्यया शोकः, and विद्यया यशः as illustrations of the present *sūtra*. Vide *Padamañjarī* : "फलसाधनयोग्य इति । लोके हि अङ्कुरादिकार्योत्पादने योग्यतामात्रप्रयुक्तोऽनाश्रितव्यापारो द्रव्यगुणक्रियाविषयो बीजादिर्हेतुः । उक्तञ्च—

'द्रव्यादिविषयो हेतुः कारकं नियतक्रियम् ।'
'अनाश्रिते तु व्यापारे निमित्तं हेतुरुच्यते ॥' इति च ।

उदाहरणेषु क्रियाया अभावात् करणत्वमनाशङ्कनीयम् । यूपाय दारु इत्यत्र तादर्थ्यं विवक्षितम् । न तु सदपि हेतुत्वमिति दारुशब्दात् प्रथमैव भवति ।"[1]

(i) दण्डेन घटः—here दण्ड is निमित्त or हेतु of घट which is a द्रव्य ; (2) पुण्येन दृष्टो हरिः—here पुण्य is the हेतु of दर्शन which is a क्रिया ; (3) as regards the हेतु with reference to a *quality* (गुण) 'पुण्येन गौरवर्णः', 'पुण्येन ब्रह्मवर्चसम्' etc. should be cited as examples. This is made quite clear by Kaiyaṭa in his gloss on the *Mahābhāṣya* under the present *sūtra*.

§"**फलमपीह हेतुः । अध्ययनेन वसति ।**"—(Dīkṣita).—The result (फल) is also to be regarded as a हेतु in this *sūtra*.[2] 'हेतु' is to be

---

1. Cf. "द्रव्यगुणक्रियासाधनसमर्थं वस्तु द्रव्यादीनां हेतुः । तद् यथा बीजेनाङ्कुरः, धनेन कुलम्, कन्यया शोकः, विद्यया यशः, शिल्पाभ्यासेन नैपुण्यम्, अग्निना पाकः ।"—Helārāja on *Vakyapadiya, loc cit-*

2. Cf. "अध्ययनेन वसतीति तु वसतिक्रियाऽऽख्यातात् प्राधान्येन प्रतीयमाना वस्तुसामर्थ्यादध्ययनाख्यहेतुपरतन्त्रा । तथा ह्यध्ययनार्थो ममात्र वास इति वक्तारो भवन्ति ।"—Helārāja on *Vākyapadīya*, III. 7. 26.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

considered here as synonym of निमित्त. *Vide Vārttika* under the present *sūtra* : 'निमित्त-कारण-हेतुषु सर्वासां प्रायदर्शनम्'. On the *Vārttika* under II. 3. 36, ('निमित्तात् कर्मसंयोगे') Kaiyaṭa observes: "'क्रियाफलमिह निमित्तशब्देन विवक्षितम्। यत् क्रियायाः प्रयोजकं यदर्थः क्रियारम्भेस्ततो 'हेतौ' इति तृतीयायां प्राप्तायां सप्तमी विधीयते।"—°*Pradīpa*, on which Nāgeśa comments : "क्रियाफलमिति। व्याख्यानादिति भावः।"—Consult also the *Vārttika* ('हेतुनिर्देशश्च निमित्तमात्रे भिक्षादिषु दर्शनात्') under 'हेतुमति च' (III. 1. 26) and *Bhāṣya* thereon.

§ '**गम्यमानापि क्रिया कारकविभक्तौ प्रयोजिका**' (*Dīkṣita*) :

In 'अलं श्रमेण', the तृतीया in 'श्रमेण' is a case of करणे तृतीया, since श्रम is the करण towards the action of साधन as conveyed by the word साध्य which is left unexpressed (गम्यमान). Thus, it is properly a case of **कारकविभक्ति** and not of **उपपदविभक्ति**. Rāmacandra, in his *Prakriyākaumudī*, however, states : "वारणार्थयोगे तृतीया। अलं विलम्बेन।"—on which Viṭṭhala comments : "एतच्च प्रकृत्यादिभ्य उपसंख्यानम् इति सिद्धम्। अथवा करणविवक्षया। विलम्बेन न किञ्चित् साध्यम् इत्यर्थाविगमात्॥"—°*Prasāda*. 'अलम्' is a वारणार्थक अव्यय. Cf. "अलं भूषणपर्याप्तिशक्तिवारणवाचकम्"—*Amara*°" iii. 3. 252.

§ "**शतेन शतेन वत्सान् पाययति पयः। शतेन परिच्छिद्येत्यर्थः।**—(Dīkṣita). This is also a case of करणे तृतीया according to Dīkṣita. 'शतं शतं....' is also admissible. As Rāmacandra Dīkṣita points out : "मानाद् वीप्सायां कर्मणि तृतीया वेति केचित्। शतं शतं वत्सान् पाययति पयः। शतेन शतेन वा।"—on which Viṭṭhala observes : "मानादित्यादि। मीयते अनेनेति मानम्। तथोक्तं मुग्धबोधे 'मानाद् वीप्सायां च'—इति।"

§ '**अशिष्टव्यवहारे दाणः प्रयोगे चतुर्थ्यर्थे तृतीया। दास्या संयच्छते कामुकः। धर्म्ये तु भार्यायै संयच्छति**" (Dīkṣita).—The portion 'दाणः प्रयोगे.........तृतीया' is indicated by the rule "दाणश्च सा चेच्चतुर्थ्यर्थे" (I. 3. 55) which prescribes आत्मनेपद of the root सम्-√दा when it governs a तृतीया used in the sense of चतुर्थी-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

while the portion अशिष्टव्यवहारे is added on the authority of the Bhāṣyakāra who adds : "कथं नाम तृतीया चतुर्थ्यर्थे स्यात्। एवं तर्हि अशिष्टव्यवहारे अनेन तृतीया च विधीयते, आत्मनेपदं च। दास्या संयच्छते। वृषल्या संप्रयच्छते। यो हि शिष्टव्यवहारो ब्राह्मणीभ्यः संप्रयच्छतीत्येव तत्र भवितव्यम्।"—*Bhāṣya* on I. 3. 55. So the *Tattvabodhinī* observes : "केचिदिह परिष्कुर्वन्ति—'अशिष्टव्यवहारे— इत्यंशो वाचनिक एव। अन्यांशस्तु ज्ञापकसिद्धः' इति।"—The significance of the illustratton दास्या संयच्छते कामुकः is thus explained in the °*Prasāda* commentary : "यो धर्मशास्त्रविरुद्धं दासीं कामयितुं तस्यै ददाति तस्यासौ अशिष्टव्यवहारो भवति इत्यत्राशिष्टव्यवहारः।"— But the Bhāṣyakāra seems to explain it in another way while discarding the *sūtra* I. 3. 55. as superfluous : "यद्येवं नार्थोऽनेन योगेन।' केनेदानीं तृतीया भविष्यति आत्मनेपदं च। '**सहयुक्ते तृतीया स्याद् व्यतिहारे तङो विधिः**'।—'सहयुक्तेऽप्रधाने' (II. 3. 19) इत्येव तृतीया भविष्यति, 'कर्तरि कर्मव्यतिहारे' (I. 3. 14) इत्यात्मनेपदम्।" —Haradatta in his *Padamañjarī* also follows Bhāṣyakāra's interpretation : "अशिष्टानां सङ्कीर्णाचाराणां यो व्यवहार आचारः तस्मिन्नित्यर्थः। **दास्या सम्प्रयच्छते** इति। यो दास्या सह भुञ्जानस्तया दत्तं स्वयं भुङ्क्ते, स्वयं च तस्यै ददाति, तद्विषयोऽयं प्रयोगः इत्याहुः।" —*Padamañjarī* on I. 3. 55.

Some other cases of तृतीया, not mentioned by Dīkṣita, but pointed out by Rāmacandra in his *Prakrīyākaumudī*, are as follows : "तृतीया तत्कृतार्थेन—" इति तृतीयासमासोक्तेरर्थशब्दयोगे तृतीया। सतामर्थो हरिभक्त्या। पूर्वावरोनार्थादियोगेऽपि। मासेन पूर्व्वः। मासेन अवरः। पुण्येन हीनः। शास्त्रेण कलहः। गुड़ेन मिश्रः।"—all of which are ज्ञापकसिद्ध. Cf. "अत्रापि 'पूर्वसदृशसमोनार्थकलह-निपुणमिश्रश्लक्ष्णैः' (II. 1. 31 —*Vārttiika*)-इत्येभिर्योगे तृतीयासमास-विधानं ज्ञापकं तृतीयाविधेः।"—°*Prasāda*.

॥ इति तृतीया ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

॥ अथ चतुर्थी विभक्तिः ॥

§ 569. कर्मणा यमभिप्रैति स सम्प्रदानम् —(I. 4. 32.)

दीक्षितः ॥ दानस्य कर्मणा यमभिप्रैति स सम्प्रदानसंज्ञः स्यात् ॥

Exposition

§ Here कर्मन् refers to the object of the root √दा. So Dikṣita says: 'दानस्य कर्मणा'. *Vide Kāśikā*: "कर्मणा करणभूतेन कर्त्ता यमभिप्रैति तत् कारकं सम्प्रदानसंज्ञं भवति। अन्वर्थसंज्ञाविधानात् ददातिकर्मणेति विज्ञायते।"—which has been explained in the *Nyāsa* as follows: "यदि कर्मणा यमभिप्रैति स सम्प्रदानसंज्ञो भवति। एवमजां नयति ग्रामम् इत्यजादिभिर्नयनक्रियाकर्मभिः सम्बध्यमानस्य ग्रामस्य सम्प्रदानसंज्ञा प्रसज्येत इत्यत आह अन्वर्थसंज्ञाविधानादित्यादि। सम्प्रदानमिति महत्याः संज्ञायाः करणस्य एतत् प्रमोजनमन्वर्थसंज्ञा यथा विज्ञायेत—सम्यक् प्रकर्षेण दीयते यस्मै तत् सम्प्रदानमिति। तेन ददातेः कर्मणा यमभिप्रैति तत् सम्प्रदानमिति विज्ञायते। नन्वेवमपि 'रजकस्य वस्त्रं ददाति', 'घ्नतः पृष्ठं ददाति' इत्यत्र प्राप्नोति। नैतदस्ति। दानं हि नाम पूजानुग्रहकाम्यया स्वकीयद्रव्यपरित्यागः परस्वत्वापत्तिः। तच्चेह नास्ति। अतो न भविष्यति।"—For the significance of each of the words of the *sūtra* vide *Mahābhāṣya*. The Bhāṣyakāra, however, does not explain कर्म as ददातिकर्म, since others also are frequently met with. Compare: "भाष्ये तु 'ददातिकर्मणा' इति नाश्रितं प्रयोगाश्च बहवः। अर्यम्णे चरुं निर्वपेत्, देवेभ्यो ब्रह्मौदनमपचत्। देवेभ्यो हव्यं वहन्तः छन्दांसि वै देवेभ्यो हव्यमूर्द्धा। यदङ्ग दाशुषे त्वम्, शं नः करत् पर्वते इत्यादयः।"—*Padamañjarī* under I. 4. 32.

According to Bhartṛhari, सम्प्रदान may be of three types —viz. अनिराकर्तृ, प्रेरक and अनुमन्तृ. Cf.

> 'अनिराकरणात् कर्तुस्त्यागाङ्गं कर्मणेप्सितम्।
> प्रेरणानुमतिभ्यां वा लभते सम्प्रदानताम्॥
>
> —*Vākyapadīya*, III. 7. 129

(i) सूर्य्याय अर्घ्यं ददाति is an example of अनिराकर्तृ सम्प्रदान, for here the sun neither solicits nor does he permit the oppering

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

nor reject it; (ii) प्रेरक i. e., he who incites someone to give anything to himself as in विप्राय गां ददाति, where a Brahmin incites the giver to give a cow (विप्रेण मह्यं देहीति प्रवर्त्तितो ददाति) ; and (iii) अनुमन्तृ—i. e., he who permits a person to give him something as in उपाध्यायाय गां ददाति, where the preceptor permits the giver to give him a cow (उपाध्यायेन न प्रार्थ्यते—अपि तु अनुमन्यते).

§ 570. चतुर्थी सम्प्रदाने—(II. 3. 13)

दीक्षितः ।। विप्राय गां ददाति । अनभिहित इत्येव । दीयतेऽस्मै दानीयो विप्रः । 'क्रियया यमभिप्रैति सोऽपि सम्प्रदानम्' (वा १०८५) । पत्ये शेते । 'कर्मणः करणसंज्ञा सम्प्रदानस्य च कर्मसंज्ञा' (वा १७८६) पशुना रुद्रं यजते । पशुं रुद्राय ददातीत्यर्थः ।

Exposition

§ "अनभिहित इत्येव, दीयतेऽस्मै दानीयो विप्रः"— (Dīkṣita) : The *sūtra* 'अनभिहिते' (II. 3. 1) governs the present *sūtra* as well. Thus, in दानीयो विप्रः, the सम्प्रदानत्व of विप्र being already expressed (उक्त) by the कृत्य suffix अनीयर् added to the root √दा (according to the *sūtra* 'कृत्यल्युटो बहुलम्'—*vide* the dictum : 'अभिधानञ्च प्रायेण तिङ्कृत्तद्धितसमासैः'), the fourth-case-ending is not added to the stem विप्र, but it takes प्रथमा according to the rule : 'प्रातिपदिकार्थे—'(II. 3. 46).

§ 'क्रियया यमभिप्रति सोऽपि सम्प्रदानम्'—This is found as a ruling (इष्टि) in the *Bhāṣya* though it is discarded at the end by the Bhṣāyakāra, since its purpose is fulfilled by the *sūtra* itself (I. 4. 32). कर्म may mean both a क्रिया and an object as defined in the *sūtra* 'कर्तुरीप्सिततमं कर्म' (I. 4. 49). So 'कर्मणा यमभिप्रैति—' may also mean 'क्रियया यमभिप्रैति—'. We quote here the relevant portion of the *Bhāṣya* on this point : "क्रियाग्रहणमपि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कर्तव्यम्। इहापि यथा स्यात्। श्राद्धाय निगर्हते। युद्धाय संनह्यते। पत्ये शेत इति। तत्तर्हि वक्तव्यम्? न वक्तव्यम्। कथम्? क्रियां हि लोके कर्मेत्युपचरन्ति। कां क्रियां करिष्यसि? किं कर्म करिष्यसीति। एवमपि कर्त्तव्यम्। कृत्रिमाकृत्रिमयोः कृत्रिमे संप्रत्ययो भवति। क्रियापि कृत्रिमं कर्म। न सिध्यति। 'कर्तुरीप्सिततमं कर्म' (I. 4. 49) इत्युच्यते। कथं च नाम क्रियया क्रिया ईप्सिततमा स्यात्? कियापि क्रियया ईप्सित-तमा भवति। कया कियया? सन्दर्शनक्रियय वा प्रार्थयतिक्रियया वा अध्यवस्यतिक्रियया वा। इह य एषः मनुष्यः प्रेक्षापूर्वकारी भवति स बुद्ध्या तावत् कञ्चिदर्थं संपश्यति, सन्दृष्टे प्रार्थना, प्रार्थनायामध्यवसायः, अध्यवसाये आरम्भः, आरम्भे निर्वृत्तिः, निर्वृत्तौ फलावाप्तिः। एवं क्रियापि कृत्रिमं कर्म॥"—It should be noted, however, that क्रिया in the above ruling refers to अकर्मक क्रिया only. That is why, the instances cited by the Bhāṣyakāra are all cases of सम्प्रदान in connexion with अकर्मकक्रिया. A सकर्मक क्रिया on the other hand governs द्वितीया according to 'कर्मणि द्वितीया'. *Vide Tattva-bodhinī* : "नन्वेव कटं करोति, ओदनं पचतीत्यादावपि सम्प्रदानत्व-प्रसङ्गस्तथा च वचनद्वयबलात् कर्मसम्प्रदानयोः पर्यायत्वे कटाय करोतीत्याद्य-निष्टप्रयोगोऽपि स्यादिति चेत्, अत्राहुः—पत्ये शेते इत्यकर्मकस्थले सावकाशायाः निरवकाशया कर्मसंज्ञया बाधितत्वात् नैवानिष्टप्रसक्तिः'. See also *Bālamanoramā*. Haradatta in his *Padamañjarī* observes that the application of the ruling "क्रियया ययभिप्रैति—" is to the field of actually found शिष्टप्रयोग's alone : "यदि तर्हि क्रिययाऽभिप्रेयमाणस्यापि भवति कटं करोतीत्यादावपि प्राप्नोति, वचनाद्धि कर्मसम्प्रदानसंज्ञयोः पर्य्यायः स्यात्। नैतत् सार्वत्रिकं, किं तर्हि प्रयोगदर्शन-वशेन नियतविषयम्।"

§ **'कर्मणः करणसंज्ञा सम्प्रदानस्य च कर्मसंज्ञा'**—This is not a *Vārtika* but an इष्टि (ruling) of Bhāṣakāra, occuring under I. 4. 32 : "एवमपि कर्मणः करणसंज्ञा वक्तव्या सम्प्रदानस्य च कर्मसंज्ञा। पशुना रुद्रं यजते। पशुं रुद्राय ददातीत्यर्थः। अग्नौ किल पशुः प्रक्षिप्यते—तद्रुद्राय उपह्रियते इति॥"—This ruling is applicable to Vedic injunctions only. As Haradatta points out : "एतच्छन्दो-विषयम्। 'सर्वे विधयश्छन्दसि विकल्पन्ते' इति यथाप्राप्तमपि प्रयोगो

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भवति ।"—*Padamañjarī* on I. 4. 32. Also : "**कर्मणः करणसंज्ञेत्यादि**" —एतत् पशुना रुद्रं यजते इत्येतद्विषयमेव वेदितव्यम्। यजिः स्वरितेत्। एतच्च 'व्यत्ययो वहुलम्' (III. 1. 85) इति सुब्व्यत्ययेन सिद्धमेवेति न वक्तव्यम् ।"—*Nyāsa.* See also *Bālamanoramā.*

§ 571. रुच्यर्थानां प्रीयमाणः—(I. 4. 33)

दीक्षितः ।।—रुच्यर्थानां धातूनां प्रयोगे प्रीयमाणोऽर्थः सम्प्रदानं स्यात् । हरये रोचते भक्तिः । अन्यकर्त्तृकोऽभिलाषो रुचिः । हरिनिष्ठप्रीतेर्भक्तिः कर्त्री । प्रीयमाणः किम्—देवदत्ताय रोचते मोदकः पथि ।

Exposition

'रुच्यर्थाः' has been explained in the *Kāśikā* as 'रुचिना समानार्थाः' on which *Padamañjarī* comments : "वस्तुकथन-मेतत् । विग्रहस्तु रुचिरर्थो येषामिति । ते च रुचिना धातुना समानार्था भवन्ति ।'—Here रुचि has been used in the sense of अभिलाष and not of दीप्ति. Cf. : "यद्यपि रुचिर्दीप्तौ पठ्यते, तथापीह अभिलाषे वर्त्तते । अनेकार्थत्वाद् धातूनाम्। तत्रैव प्रीयमाणार्थस्य सम्भवात् । यस्य हि अभिलाषः स प्रीयमाणः । यस्तु अभिलषति स प्रीणाति। प्रीयमाण इति तृप्यमाण इत्यर्थः । 'प्रीञ् तर्पणे' इत्यस्मात् कर्मणि विहितस्य लस्य शानच् ।"—*Nyāsa.*

अन्यकर्तृकोऽभिलाषो रुचिः—(Dīkṣita). This is a quotation from the *Kāśikā*. Here the exact meaning of the term रुचि is given. रुचि is a special kind of अभिलाष (desire), of which the *subject* is something other than प्रीयमाणः. Vide *Padamañjarī* : "अन्यकर्तृक इति । योऽभिलाषस्याश्रयः प्रीयमाणस्ततोऽन्यकर्तृक इत्यर्थः ।" Also—"अन्यकर्तृक इत्यादिना तमभिलाषविशेषं दर्शयन् रुचिशब्दस्य अर्थमाचष्टे। प्रीयमाणापेक्षयाऽन्योऽर्थो वेदितव्यः । प्रीयमाणादन्यः कर्त्ता यस्य सोऽन्यकर्तृकः"—e.g., in हरये रोचते भक्तिः, the desire (or अभिलाष) for भक्ति is in हरि, but the *subject* of the verb रोचते is भक्तिः which is other than प्रीयमाण (i. e. हरि). So Dikṣita says—"हरिनिष्ठ-प्रीतेर्भक्तिः कर्त्री'—The following observations of Haradatta

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

are very illuminating: "कथं पुनरन्याश्रयस्याभिलाषस्यान्यः कर्ता भवति, यावत्ता यदाश्रयव्यापारं धातुः प्राधान्येनाचष्टे स कर्ता? नेदं कर्तृलक्षणम्, किन्तु स्वातन्त्र्यमेव। तच्च क्वचिद्वास्तवम्, क्वचिद्वैवक्षिकम्। तदत्र माधुर्यातिशयेन स्वविषयं देवदत्ताश्रयमभिलाषं जनयन् मोदकस्तत्र कर्तेति गीयते। न च एवं लषेरपि प्रसङ्गः। देवदत्तो मोदकमभिलष्यतीति? अभिधानशक्तिवशिष्ट्यात् आश्रयकर्तृकोऽभिलाषो लषेर्वाच्यः, रुचेस्तु विषयकर्तृकः। दृष्टश्चायमभिधानप्रकारनियमोऽन्यत्रापि। तद्यथा घटं पश्यति इति दृशेराश्रयकर्तृकं ज्ञानं वाच्यम्। घटः प्रकाशते इत्यत्र प्रकाशेर्विषयकर्तृकम्। विषय एव हि स्पष्टालोकमध्यवर्त्तित्वादिना सौकर्येण देवदत्ताश्रये ज्ञाने कर्तेति व्यपदिश्यते, न तु ज्ञानेन कश्चिदतिशयो विषये जन्यते। कोऽयं प्रकाशो नाम, यं प्राकट्यमाचक्षते भाट्टाः। तत्र कारकशेषत्वेन षष्ठीप्रसङ्गे वचनम्। अन्ये तु प्रीयमाणं देवदत्तं मोदकः प्रीणयतीति कर्मसंज्ञां प्राप्तां मन्यन्ते। अपरे त्वेवमाहुः—देवदत्तो रोचयति मोदकमिति हेतुत्वे प्राप्ते वचनमिति। देवदत्तं हि प्राप्य रोचते मोदको न सर्वान्, नानेच्छा हि प्राणिन इति। एवमुत्तरेष्वपि योगेषु द्रष्टव्यम्। उक्तञ्च—

हेतुत्वे कर्मसंज्ञायां शेषत्वे वाऽपि कारकम्।
रुच्यर्थादिषु शास्त्रेण सम्प्रदानाख्यमुच्यते॥ इति[1]

—*Padamañjarī*

§ 572. श्लाघह्नुङ्स्थाशपां ज्ञीप्स्यमानः—(I. 4. 34)

दीक्षितः॥ एषां प्रयोगे वोधयितुमिष्टः सम्प्रदानं स्यात्। गोपी स्मरात् कृष्णाय श्लाघते ह्नुते तिष्टते शपते वा। ज्ञीप्स्यमानः किम्—देवदत्ताय श्लाघते पथि।

Exposition

The *Kāśikā* explains 'ज्ञीप्स्यमानः' as follows: "ज्ञापयितुमिष्यमाणो बोधयितुमभिप्रेतः". So Dikṣita says: "बोधयितुमिष्टः" The formation of the word has been shown in the *Nyāsa* as follows: "ज्ञीप्स्यमान इति। 'मारणतोषणनिशामनेषु ज्ञा' इति घटादिषु पठ्यते। तस्मात् निशामने ज्ञाने वर्त्तमानाद् हेतुमणिच्। अथवा 'ज्ञप मिच्च' इति चुरादौ पठ्यते। तस्मात् चुरादिणिच्, मित्त्वाद् ह्रस्वत्वम्,

1 *Vākyapadīya*, III. 7. 130

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सन्, द्विर्वचनम्, 'आप्ज्ञप्यृधामीत्' इतीत्वम् (VII. 4. 55), 'अत्र लोपोऽभ्यासस्य' (VII. 4. 58) इत्यभ्यासलोपः, कर्मणि लकारः, शानच्, यक्, 'अतो लोपः' (VI. 4. 48)."

§ **गोपी स्मरात् कृष्णाय श्लाघते ह्नुते तिष्ठते शपते वा**—This is taken bodily from Rāmacandra's *Prakriyākaumudī*. °*Prasāda* explains the illustration as follows: "गोपी मदनावस्थया कृष्णं श्लाघमाना स्तुवती तां श्लाघां तमेव ज्ञापयितुमिच्छतीत्यर्थः। अथवा आत्मानमेव श्लाघमाना तां श्लाघां कृष्णं बोधयितुमिच्छति। आत्मानं सगुणां बोधयतीति यावत्। ह्नुते। सन्निहितमेव कृष्णं सपत्नीभ्यो निह्नुवाना तामेव निह्नुतिं तमेव ज्ञापयतीत्यर्थः। अथवा ह्नोतव्यवस्तु इदमहं ह्नुवे इति कृष्णं ज्ञापयतीत्यर्थः। तिष्ठते। स्वाभिप्रेतं कृष्णं प्रति प्रकाशयतीत्यर्थः। 'प्रकाशनस्थेयाख्ययोश्च' इत्यात्मनेपदम्। शपते। सत्यमेतदिति प्रकटयतीत्यर्थः।"—*Vide Padamañjarī*.

§ 573. धारेरुत्तमर्णः (I. 4. 35)

दीक्षितः॥ धारयतेः प्रयोगे उत्तमर्ण उक्तसंज्ञः यात्। भक्ताय धारयति मोक्षं हरिः। उत्तमर्णः किम्—देवदत्ताय शतं धारयति ग्रामे।

Exposition

The *Kāśikā* explains the term उत्तमर्ण as: "उत्तममृणं यस्य स उत्तमर्णः। कस्य च उत्तममृणम्? यदीयं धनम्। धनस्वामी प्रयोक्ता उत्तमर्णः। स सम्प्रदानसंज्ञो भवति।" Also—'प्रतिमासमशीतिभागादिवृद्ध्या उत्तमम् अधिकतां प्राप्तम् ऋणं यस्येति विग्रहः"—*Bālamanoramā*.

§ **भक्ताय धारयति मोक्षं हरिः**—See *Bālamoramā* for the elucidation of the idea of उत्तमर्णत्व of the devotee (भक्त) in this instance.

§ 574. स्पृहेरीप्सितः—(I. 4. 36.)

दीक्षितः॥ स्पृहयतेः प्रयोगे इष्टः सम्प्रदानं स्यात्। पुष्पेभ्यः स्पृहयति। ईप्सितः किम्—पुष्पेभ्यो वने स्पृहयति। ईप्सितमात्रे इयं संज्ञा। प्रकर्षविवक्षायां तु परत्वात् कर्मसंज्ञा, पुष्पाणि स्पृहयति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Exposition

§ **ईप्सितमात्रे इयं संज्ञा । प्रकर्षविवक्षायां तु परत्वात् कर्मसंज्ञा । पुष्पाणि स्पृहयति** (Dikṣita)—Compare: "यदा तु पुष्पादीनामीप्सिततमत्वं विवक्ष्यते तदा परत्वात् कर्मसंज्ञैव भवति । पुष्पाणि स्पृहयतीति ।"—*Nyāsa*. Dīkṣita's statement seems to be a quotation from Haradatta's *Padamañjarī* : "ईप्सितमात्रे इयं संज्ञा । प्रकर्षविवक्षायान्तु परत्वात् कर्मसंज्ञैव भवति । पुष्पाणि स्पृहयतीति । यदा तु ईप्सितम् ईप्सिततमं वा शेषत्वेन विवक्ष्यते तदा षष्ठी भवति ।" Thus पुष्पाणि स्पृहयति, पुष्पेभ्यः स्पृहयति and पुष्पाणां स्पृहयति—all these three usages are justified according to Haradatta. For the use of षष्ठी in connection with to the root स्पृह् *vide* 'कुमार्य इव कान्तस्य त्रस्यन्ति स्पृहयन्ति च'—cited in *Bālamanoramā*. For the contrary view of Bhartṛhari in his *Vākyapadīya* and the scholiast Helārāja *vide Bālamanoramā*. *Tattvabodhinī* while referring to all these views seems to support the view of Bhartṛhari and Helārāja. "परत्वादिति । तेन 'परस्परेण स्पृहणीयशोभम्' 'स्पृहणीयगुणैर्महात्मभिः'—इत्यादौ कर्मण्यनीयर् सिध्यति । शेषत्वविवक्षायान्तु 'कुमार्य इव कान्तस्य त्रस्यन्ति स्पृहयन्ति च' इत्यत्र षष्ठ्यपि सिध्यतीति हरदत्तादयः । वाक्यपदीय-हेलाराजीयग्रन्थयोस्तु स्पृहयतियोगे कर्मसंज्ञायाः शेषषष्ठ्याश्च वाधिकेयं सम्प्रदानसंज्ञेति स्थितम् । यद्यत्त्वैतत्-- क्रियया यमभिप्रैति--' इत्यनेनैं-वेष्टसिद्धेः 'स्पृहेरीप्सितः' इत्येतत्सूत्रस्य हरदत्तादिमते वैयर्थ्यप्रसङ्गात् । तस्मात् वाक्यपदीयादिग्रन्थानुरोधेन 'परस्परेण स्पृहणीयशोभम्' इत्यादौ 'दानीयो विप्रः' तिवत् बाहुलकात् सम्प्रदाने अनीयर् इति व्याख्येयम् । 'कुमार्य इव कान्तस्य' इत्यत्र तु त्रस्यन्तीत्येदर्थतया कृतार्थस्य कान्तस्येति षष्ठ्यन्तस्य विभक्तिविपरिणामेन कान्ताय स्पृहयति इति व्याख्येयमिति केचित् ।"

§ 575. क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः—(I. 4. 37)

दीक्षितः ।। क्रुधाद्यर्थानां प्रयोगे यं प्रति कोपः स उक्तसंज्ञः स्यात् । हरये क्रुध्यति, द्रुह्यति, ईर्ष्यति, असूयति वा । यं प्रति कोपः किम्—भार्यामीर्ष्यति । मैनामन्यो द्राक्षीदिति । क्रोधोऽमर्षः, द्रोहोऽपकारः । ईर्ष्या अक्षमा । असूया गुणेषु दोषाविष्करणम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्रोहादयोऽपि कोपप्रभवा एव गृह्यन्ते । अतो विशेषणं सामान्येन 'यं प्रति कोपः' इति ।

Exposition

§ क्रुधाद्यर्थानां.........द्राक्षीदिति (Dīkṣita) :—This is an exact quotation from Rāmacandra's *Prakriyā-kaumudī*. The संप्रदान संज्ञा enjoined by this *sūtra* and the consequent चतुर्थी is in lieu of the normal षष्ठी in connection with √क्रुध् or √द्रुह् which are intransitive and of द्वितीया in connection with the two other which are transitive. As *Prasāda* points out : 'क्रुधद्रुहोरकर्मकत्वात् षष्ठ्यां प्राप्तायामारम्भः। इतरयोः सकर्मकत्वाद् द्वितीयायाम् ।"—कोप is the generic state (सामान्य) of which क्रोध, द्रोह, ईर्ष्या and असूया are but special manifestations (विशेष). That is why, क्रोध etc. are qualified by their characteristic feature (viz. कोप) in order to distinguish them from other states of mind like द्वेष etc. that do not spring from कोप. *Vide* : "किमेते एकार्थाः, आहोस्वित् नानार्थाः ? किं चातः ? यद्येकार्थाः किमर्थं पृथङ् निर्दिश्यन्ते ? अथ नानार्थाः, कथं कुपिना शक्यन्ते विशेषयितुम् ? एवं तर्हि नानार्थाः, कुपौ ह्येषां सामान्यमस्ति । न हि अकुपितः क्रुध्यति, न वा अकुपितो द्रुह्यति, न वा अकुपित ईर्ष्यति, न वा अकुपितः असूयति'—*Mahābhāṣya*. So such usages as 'योऽस्मान् द्वेष्टि यं च वयं द्विष्मः' etc. are jus ified. Cf. "ननु चित्तदोषार्थानामित्येवास्तु, किं क्रोधादीनां विशिष्योपादानेन इति चेत् । अत्राहुः—द्वेषादौ अतिप्रसङ्गवारणाय विशिष्योपादानम् । तेन 'योऽस्मान् द्वेष्टि' इत्यत्र चतुर्थी न भवति ।"—*Tattvabodhinī*. Also: "ननु च 'योऽस्मान् द्वेष्टि' इत्यत्र कुतः सम्प्रदानत्वं न ? उच्यते । द्विषेरक्रोधार्थत्वात् । अप्रीतो ह्येनं स्मरन्ति । तथाच अचेतनेष्वपि प्रयुज्यते—औषधं द्वेष्टि । 'नाभिनन्दति' इति गम्यते ।"—°*Prasāda*.

§ 576. **क्रुधद्रुहोरुपसृष्टयोः कर्म**—(I. 4. 38)

दीक्षितः ।। सोपसर्गयोरनयोर्योगे यं प्रति कोपः तत् कारकं कर्मसंज्ञं स्यात् । क्रूरमभिक्रुध्यति । अभिद्रुह्यति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Exposition

उपसृष्ट means उपसर्गसम्बद्ध. The portion 'यं प्रति कोपः' follows from the preceding *sūtra*. 'पूर्वेण सम्प्रदानसंज्ञायां प्राप्तायां कर्मसंज्ञा विधीयते'—*Kāśikā*.

§ 577. राधीक्ष्योर्यस्य विप्रश्नः—(I. 4. 39)

दीक्षितः ।। एतयोः कारकं सम्प्रदानं स्यात्, यदीयो विविधः प्रश्नः क्रियते । कृष्णाय राध्यति ईक्षते वा । पृष्टो गर्गः शुभाशुभं पर्यालोचयतीत्यर्थः ।

Exposition

The *Nyāsa* observes that यस्य in the present *sūtra* can well be left out as the sense expressed by it can be conveyed by construing the present *sūtra* with 'यं प्रति' in 1.4.37—38. Cf. "यस्येति ग्रहणं विस्पष्टार्थम् । तथाहि यं प्रतीत्यनुवर्त्तते । तत्र यं प्रति विप्रश्न इत्येवमभिसम्बन्धे क्रियमाणे यस्येत्यस्यार्थोऽप्रयुज्यमानस्यापि गम्यत एव ।"—*Nyāsa*. So also *Haradatta* : यस्यग्रहणमनर्थकम् । यं प्रतीत्येव तत्र यं प्रति विप्रश्न इत्यन्वये किं नाम विवक्षितं न सिध्यति ।।"—*Padamañjarī*.

The root √राध्, which means शुभाशुभपर्यालोचन in the present instance, is here used as intransitive (अकर्मक), because the idea of the *object* (शुभ or अशुभ) is included within the meaning of the root itself ('धात्वर्थोपसंग्रहात्'). Cf. "राध संसिद्धौ । ईक्ष दर्शनाङ्कनयोः । एतौ अत्रोदाहरणे शुभाशुभपर्यालोचने वर्त्तेते इत्यभिप्रेत्याह--पृष्टः इत्यादि ।"--°*Prasāda*.

§ 578. प्रत्याङ्भ्यां श्रुवः पूर्वस्य कर्त्ता—(I. 4. 40)

दीक्षितः ।। आभ्यां परस्य श्रृणोतेर्योगे पूर्वस्य प्रवर्त्तनारूपस्य व्यापारस्य कर्त्ता सम्प्रदानं स्यात् । विप्राय गां प्रतिश्रृणोति आश्रृणोति वा । विप्रेण मह्यं देहीति प्रवर्त्तितस्तं प्रतिजानीत इत्यर्थः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Exposition

§**प्रवर्त्तनारूपस्य व्यापारस्य कर्त्ता** (Dīkṣita):—This is an elucidation of the expression 'पूर्वस्य कर्त्ता' in the *sūtra*. 'पूर्व' means the *previous action*—i. e., the action which precedes that of *promising* that is conveyed by the root √श्रु preceded by the preposition प्रति or आङ्. And the nature of that *previous action* is प्रवर्त्तना (or 'solicitation'). When one *promises* something to another person, it is mostly on the *solicitation* of the latter. Thus the latter is the agent (कर्त्तृ) of the previous action of *solicitation*. Consequently in connexion with the root प्रति—√श्रु or आ—√श्रु, the word expressive of the agent of the previous action of solicitation is called सम्प्रदान and put in the fourth case-ending. Vide *Kāśikā* :"पूर्वस्य कर्त्ता । प्रतिपूर्व आङ्पूर्वश्च शृणोतिरभ्युपगमे प्रतिज्ञाने वर्त्तते । स चाभ्युपगमः परेण प्रयुक्तस्य सतो भवति। तत्र प्रयोक्ता पूर्वस्याः क्रियायाः कर्त्ता सम्प्रदानसंज्ञो भवति". Thus the agent of the previous action being the प्रयोजककर्त्ता, the third case-ending is usually expected. The present *sūtra* makes provisions for चतुर्थी in lieu of तृतीया. Cf. "तत्र हेतुसंज्ञायां प्राप्तायां देवदत्तेन प्रतिशृणोति इति प्रयोगनिवृत्तये च वचनमित्याहुः । विवक्षान्तरे च देवदत्तो गां प्रतिश्रावयति इति भवत्येव ।"—*Padamañjarī*. Also : "यश्चासौ. पूर्वस्याः क्रियायाः कर्त्ता भवति, स प्रतिज्ञातुः प्रयोजको भवतीति हेतुसंज्ञायां प्राप्तायामिदं वचनम् । देवदत्ताय गां प्रतिशृणोति । अत्र पूर्वस्या याचन-क्रियायाः देवदत्तः कर्त्ता । देवदत्तेन हि मह्यं गां देहीति याचितः स यदा ददानीति प्रतिजानीते, तदा एवं प्रयुज्यते—देवदत्ताय गां प्रतिशृणोतीति ।"—*Nyāsa*.

§ 579. अनुप्रतिगृणश्च—(I. 4. 41)

दीक्षित ।। आभ्यां गृणातेः कारकं पूर्वव्यापारस्य कर्तृभूतमुक्तसंज्ञं स्यात् । होत्रेऽनुगृणाति प्रतिगृणाति वा । होता प्रथमं शंसति । तमध्वर्युः प्रोत्साहयतीत्यर्थः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Exposition

"पूर्वस्य कर्त्ता" here follows from the preceding *sūtra*. As the *Kāśikā* says: "पूर्वस्य कर्त्ता इति वर्त्तते". Here the root √गॄ belongs to the क्र्यादिगण, as it has been mentioned with the addition of the विकरण श्ना. Cf. " 'अनुप्रतिगृण' इति श्नाप्रत्ययेन निर्देशात् क्र्यादिपठितस्य 'गॄ शब्दे' इत्यस्य ग्रहणम्। न 'गॄ निगरणे' इत्यस्य तौदादिकस्य।"—*Nyāsa.*

§ होत्रेऽनुगृणाति...इत्यर्थ : (Dīkṣita)—This is based on the following text of the *Kāśikā*: "होत्रेऽनुगृणाति। होता प्रथमं शंसति। तमन्यः प्रोत्साहयति। अनुगरः, प्रतिगर इति हि शंसितुः प्रोत्साहने वर्त्तते। होतारं शंसन्तं प्रोत्साहयतीत्यर्थः"—on which *Pādamañjarī* comments: "अन्य इति अध्वर्युः।....अनुगीर्य्यते प्रोत्साह्यते येन शब्देन सोऽनुगरः। एवं प्रतिगरः। ओथामो दैवेत्येवमादिकः शब्दः। तेन हि प्रतिगीर्य्यते।"

§ 580. परिक्रयणे सम्प्रदानमन्यतरस्याम्—(I.4.44)

दीक्षित॥ नियतकालं भृत्या स्वीकरणं परिक्रयणं तस्मिन् साधकतमं कारकं संप्रदानसंज्ञं वा स्यात्। शतेन-शताय वा परिक्रीतः। 'तादर्थ्ये चतुर्थी वाच्या' (वा १४५८)। मुक्तये हरिं भजति। 'क्लृपि सम्पद्यमाने च' (वा १४५९)। भक्तिर्ज्ञानाय कल्पते सम्पद्यते जायते इत्यादि। 'उत्पातेन ज्ञापिते च' (वा १४६०)। वाताय कपिला विद्युत्। 'हितयोगे च' (वा १४६१)। ब्राह्मणाय हितम्।

Exposition

The word 'साधकतमम्' follows from I.4.42 (viz. 'साधकतमं करणम्'): 'साधकतममिति वर्त्तते। पूर्वेण करणसंज्ञायां प्राप्तायां सम्प्रदानसंज्ञा पक्षे विधीयते। परिक्रयणे साधकतमं कारकमन्यतरस्यां सम्प्रदानसंज्ञं भवति।"—*Kāśikā.*

§ नियतकालं भृत्या स्वीकरणं परिक्रयणम् (Dīkṣita)—This is based upon the following quotation from *Kāśikā*: "परिक्रयणं नियतकालं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वेतनादिना स्वीकरणम्; नात्यन्तिकः क्रय एव'—which is explained in the *Padamañjarī* as follows: "वेतनं भृतिः। नियतकालत्वमेव स्पष्टयति—नात्यन्तिकः क्रय एवेति। परिशब्दः सामीप्यं द्योतयति। क्रयो नामात्यन्तिकं स्वीकरणम्। नियतकालं तु तस्य समीपमेवेति परिशब्दस्यार्थः". Also: "वेतनादिनेति। आदिशब्देन बन्धकादीनां ग्रहणम्"—*Nyāsa.*

§ **तादर्थ्ये चतुर्थी वाच्या**—This is read as a *Vārttika* under II. 3. 13 in the *Bhāṣya* ('चतुर्थीविधाने तादर्थ्य उपसंख्यानम्'). The word 'तदर्थम्' is formed by चतुर्थी तत्पुरुष (तस्मै इदं तदर्थम्) and then by the addition of the suffix ष्यञ् (in भाव), the form तादर्थ्य is obtained. तादर्थ्य thus means a *relation* (सम्बन्ध) like *causality* etc. subsisting between two things, for according to the dictum: "कृत्तद्धितसमासेभ्यः सम्वन्धाभिधानं भावप्रत्ययेन", any भाववचन suffix like तल्, त्व etc. if added to a कृदन्त, तद्धितान्त or a समास, *expresses a particular relation.* As the author of the *Padamañjarī* points out "तच्छब्देन कार्य्यं प्रतिनिर्दिश्यते। तस्मा इदं तदर्थमिति समासेन विशिष्टकार्य्यप्रयोजनं कारणमभिधीयते। तदर्थस्य भावस्तादर्थ्यमिति ष्यञा कार्यकारणसम्बन्धोऽभिधीयते '**समासकृत्तद्धितेषु सम्बन्धाभिधानं भावप्रत्ययेनेति**' वचनात्। तत्र द्विष्ठत्वेऽपि सम्बन्धस्य षष्ठीवद् विशेषणादेव चतुर्थी भवति यूपाय दारु इति। हेतु-तृतीयाऽपि विशेष्यान्न भवति; हेतुहेतुमद्भावस्यापि चतुर्थ्यैव प्रत्यायितत्वात्। षष्ठीविषये च हेतुतृतीया। इह तु प्रातिपदिकार्थस्याव्यतिरेकात् प्रथमैव भवति।"—It is to be noted that though Haradatta limits the connotation of तादर्थ्य to कार्य्यकारणभाव only (apparently following Bhāṣyakāra's implication who cites 'यूपाय दारु' and 'कुण्डलाय हिरण्यम्' as instances of तादर्थ्य), later commentators extend the scope of the *Vārttika* by regarding other relations as well besides कार्य्यकारणभाव as connotation of तादर्थ्य. As *Tattvabodhinī* observes: "कृत्तद्धितसमासेभ्यः सम्बन्धाभिधानं भावप्रत्ययेन' इति सिद्धान्तात् ष्यञा सम्बन्धोऽभिधीयते। स च सम्बन्धोऽनेकविधः, न तु कार्य्यकारणभाव एव। तेन ब्राह्मणाय दधि इत्याद्यपि सिद्धम्। ब्राह्मणस्य दध्यजन्यत्वेऽपि तत्संस्कार्यत्वात्।"

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

The Bhāṣyakāra however discards the present *Vārttika* as superfluous, as चतुर्थी in such instances as 'यूपाय दारु' etc. is justifiable on the implications of the *sūtra* (II. I. 36) enjoining the compounding of a चतुर्थ्यन्त word with a word expressive of तदर्थ. As he says : "तत्तर्हि उपसंख्यानं कर्त्तव्यम्। न कर्त्तव्यम्। आचार्य्यप्रवृत्तिर्ज्ञापयति भवति तादर्थ्ये चतुर्थीति यदयं 'चतुर्थी तदर्थार्थ--' इति चतुर्थ्यन्तस्य तदर्थेन सह समासं शास्ति।"

§ **'क्लृपि सम्पद्यमाने च'**--(Dīkṣita)—This is *Vārttika* 2 under II.3.13. The Bhāṣyakāra cites 'मूत्राय कल्पते यवागूः' and 'उच्चाराय कल्पते यवान्नम्' as instances. Bhaṭṭoji's illustration—viz. 'भक्तिर्ज्ञानाय कल्पते', is taken from the *Prakriyā-kaumudī*. In the *Prakriyā-kaumudī*, the *vārttika* is read as 'क्लृप्त्यर्थे सम्पद्यमानेन च'. 'क्लृपि' in the *Vārttika* is in the seventh case-ending. 'क्लृपि इति सप्तमी'—*Bālamanoramā*. सम्पद्यमान means that *which is produced* as सम्पत्ति means the *production* (अभूतप्रादुर्भाव or परिणाम) of something out of some other thing. Thus the scope of the *vārttika* is limited to cases of *causality* (प्रकृतिविकृतिभाव), where a difference between the *cause* (प्रकृति) and the *effect* (विकृति) is intended. *Vide* °*Prasāda* : 'क्लृपित्यस्य धातोरर्थ एव अर्थो यस्य धातोस्तस्य प्रयोगे सम्पद्यमाने सम्पत्तिरिहाभूतप्रादुर्भावस्तत्र यद्रूपं सम्पद्यते ततो विकारात् चतुर्थी वाच्येत्यर्थः। **भक्तिर्ज्ञानाय कल्पते** इति। भक्तिर्ज्ञानलक्षणविकाररूपेण भवति। भक्तिर्ज्ञानं भवतीति यावत्। विकाररूपापत्तौ चतुर्थीविधानात् इह न भवति। देवदत्तस्य सम्पद्यन्ते शालय इति". The following observations of Haradatta are illuminating : "सम्पत्तिरभूतप्रादुर्भावरूपोत्पत्तिरिह गृह्यते, तत्र यद्रूपमुपजायते ततो विकारात् चतुर्थी। **'मूत्राय कल्पते यवागूरिति'**—प्रकृतिविकारयोर्भेदविवक्षायां चतुर्थी, अभेदविवक्षायान्तु मूत्रं सम्पद्यते यवागूरिति प्रथमैव भवतीति केचिदाहुः। अन्ये तु अभेदविवक्षायामेव चतुर्थीमिच्छन्ति। यदा तु 'जनिकर्तुः प्रकृतिः' (I. 4. 30) इत्यपादानत्वं विवक्ष्यते तदा विकारात् चतुर्थी न भवतीति केचिदाहुः मूत्रं सम्पद्यते यवाग्वा इति। अन्ये तत्रापि चतुर्थीमिच्छन्ति मूत्राय सम्पद्यते यवाग्वा इति". Thus 'मूत्राय कल्पते यवागूः',

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मूत्रं कल्पते यवागूः, मूत्रं कल्पते यवाग्वाः, and मूत्राय कल्पते यवाग्वाः are all justified, according to different viewpoints, in the same sense. The same is the case with भक्तिर्ज्ञानाय कल्पते. See also *Nyāsa* on this point.

§ **'उत्पातेन ज्ञापिते च'**—The reading of this *Vārttika* in the *Bhāṣya* is 'उत्पातेन ज्ञाप्यमाने'. उत्पात has been defined in the *Padamañjarī* as : "प्राणिनां शुभाशुभयोः सूचको भूतविकार उत्पातः"—*i.e., any disturbance of the elements indicative of good or of evil to living beings.* **'वाताय कपिला विद्युत्'**—This is the first *pāda* of a verse cited by Patañjali which runs as follows : "वाताय कपिला विद्युदुदातपायातिलोहिनी । पीता भवति सस्याय दुर्भिक्षाय सिता भवेत् ॥"—But the third *pāda* is read in the *Kāśikā* as 'पीता वर्षाय विज्ञेया'.—'अत्र कपिला विद्युदुत्पातः, तेन ज्ञापिते वाते चतुर्थी'—°*Prasāda.*

§ 581. क्रियार्थोपपदस्य च कर्मणि स्थानिनः—(II. 3. 14).

दीक्षितः ॥ क्रियार्था क्रिया उपपदं यस्य तस्य स्थानिनोऽप्रयुज्यमानस्य तुमुनः कर्मणि चतुर्थी स्यात् । फलेभ्यो याति । फलान्याहर्तुं यातीत्यर्थः । नमस्कुर्मो नृसिंहाय । नृसिंहमनुकूलयितुमित्यर्थः । एवं 'स्वयम्भुवे नमस्कृत्य' इत्यादावपि ।

Exposition

§ "The object governed by an infinitive mood, not actually used but implied, is put in the Dative. 'फलेभ्यो याति—i.e. (फलानि आहर्तुम्)', 'goes for (in order to bring) fruits'; नृसिंहाय नमस्कुर्मः (i. e., नृसिंहमनुकूलयितुम्) 'we bow down to Nṛsiṃha (to propitiate him)."—M. R. Kale : *The Higher Sanskrit Grammar* § 828 (1931).

§ **क्रियार्था क्रिया उपपदं यस्य तस्य स्थानिनोऽप्रयुज्यमानस्य तुमुनः**—(Dīkṣita) : The term उपपद in the *sūtra* is used in its

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

technical sense (पारिभाषिक) as defined in the *sūtra* 'तत्रोपपदं सप्तमीस्थम्' (III. 1. 92). According to that *sūtra* as construed with the rule 'तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्' (III. 3. 10) the suffixes तुमुन् and ण्वुल् require an उपपद which is also a क्रिया. So though 'तुमुन:' is not expressly mentioned in the *sūtra* itself it has been mentioned in the वृत्ति as the substantive qualified by the epithets स्थानिन: and क्रियार्थोपपदस्य as no other suffix can have a क्रियार्था क्रिया as उपपद. Commenting upon the statement of the *Kāśikā* : " 'तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्' (III. 3. 10) इत्येष विषयो गृह्यते". *Padamañjarī* notes : परिभाषितमुपपदं क्रियार्थमन्यत् न सम्भवति इत्ययमेव विषयो गृह्यते। अत्र च विषये क्रियैव क्रियार्था उपपदं तेनायमर्थो लभ्यते इति भाव:।"—The word स्थानी has been explained in the *Nyāsa* as follows : "शब्दास्तिष्ठन्ति अस्मिन् इति स्थानम्। तदस्यास्तीति स्थानी। एतदुक्तं भवति यस्यार्थ: प्रतीयते, न तु प्रयोगोऽस्ति स स्थानीत्युच्यते।"—Haradatta notes that the word स्थानी in the sense of अप्रयुज्यमान is current among the Pāṇinians (स्वनिकायप्रसिद्धि). This rule is restrictive as it provides for the fourth case-ending after the object of a तुमुन्नन्त root *only when the latter is not expressly stated*. Cf. "एधभ्यो व्रजतीति। आङ्पूर्वो हरतिरत्र स्थानी। तत्कर्म तु एधा:। एधानाहर्तुं व्रजतीत्यर्थ:। ननु चात्र तादर्थ्यमस्ति। अतस्तादर्थ्य इत्येवं सिद्धा चतुर्थी। तत् किमर्थमिदं वचनम्? नियमार्थम्। स्थानिनोऽप्रयुज्यमानस्यैव कर्मणि यथा स्यात्। प्रयुज्यमानस्य मा भूत्।"—*Nyāsa*. The *Kāśikā* points out the significance of each of the words employed in the *Sūtra* by citing counter-instances. E.g.: "क्रियार्थोपपदस्येति किम्? प्रविश पिण्डीम्। प्रविश तर्पणम्। भक्षिरत्र स्थानी, न तु क्रियार्थोपपद:। कर्मणीति किम्? एधेभ्यो व्रजति शकटेन। स्थानिन इति किम्? एधानाहर्तुं व्रजति।"

§ 582. तुमर्थाच्च भाववचनात्—(II. 3. 15)

दीक्षित:।। 'भाववचनाश्च' इति सूत्रेण यो विहितस्तदन्ताच्चतुर्थी स्यात्। यागाय याति यष्टुं यातीत्यर्थ:।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Exposition

The *Kāśikā* explains the *sūtra* as follows : "तुमुना समानार्थ-स्तुमर्थः । तुमर्थभाववचनप्रत्ययान्तात् प्रातिपदिकात् चतुर्थी विभक्तिर्भवति । 'भाववचनाश्च' (III. 3. II) इति वक्ष्यति । तस्येदं ग्रहणम् ।"––on which the *Padamañjarī* comments : "**तुमुना समानार्थस्तुमर्थ इति ।** वस्तु-व्याख्यायानमेतत् । विग्रहस्तु तुमर्थोऽस्येति । तुम्शब्देन तुमर्थो लक्ष्यते ।" The term 'भाववचन' qualifies प्रत्यय which is not expressly stated. भाववचन can be explained as 'भावः (क्रिया) उच्यते अनेन'—i.e. 'a suffix that expresses the sense of भाव'. The suffixes like घञ् etc. that are injoined in the sense of भाव according to the rules coming under the governing *sūtra* (i. e. अधिकारसूत्र)—'भावे' (II. 3. 18), are called भाववचन suffixes. Those suffixes are also added to roots in the sense of the suffix तुमुन् when they have क्रियार्थक्रिया as an उपपद according to the rule––'भाववचनाश्च' (III. 3. 11). *Vide Kāśikā* on the rule III. 3. 11.—"भाव इति प्रकृत्य ये घञादयो विहितास्ते भाववचनाः भविष्यति काले क्रियायामुपपदे क्रियार्थायां भवन्ति ।"—Thus a word formed with a भाववचन suffix enjoined in the sense of the suffix तुमुन् takes चतुर्थी. Now one may say that there is no use of framing the present rule as चतुर्थी in such instances as 'पाकाय याति', 'यागाय याति' etc. can be justified by तादर्थ्ये चतुर्थी. To this the *Padamañjarī* replies : "नन्वत्र तादर्थ्येनैव सिद्धम्.....एवं तर्हि भाववचनेनैव तादर्थ्यस्य द्योतितत्वात् चतुर्थी न सिध्यतीति सूत्रारम्भः । न ह्येतल्लक्षणनेत्रो ज्ञातुमर्हति घञादीनां चतुर्थीसापेक्षाणामेव तादर्थ्यप्रकाशने शक्तिरिति ।" Thus only when चतुर्थी is added to a word formed with a भाववचन suffix like घञ्, can it express the idea of तादर्थ्य, and not otherwise. So also the *Bālamanoramā* points out : "अत्र तादर्थ्यस्य तुमुनेव घञा द्योतितत्वात् 'उक्तार्थानामप्रयोगः' इति न्यायेन तादर्थ्यचतुर्थ्या अप्राप्तौ प्रथमायाः प्राप्तौ इदं वचनम् ।"—Haradatta suggests that the word तुमर्थात् qualifying भाववचनात् can be left out from the *sūtra* : "तुमर्थग्रहणं शक्यमकर्तुम् । कथं पाकः, त्यागः, राग इति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्रियार्थोपपदग्रहणमनुवर्त्तिष्यते । नन्वेतत् षष्ठीनिर्दिष्टम्; पञ्चमीनिर्दिष्टेन चेहार्थः। अर्थाद्विपरिणामो भविष्यति भाववचनादित्यनेन सम्बन्धात्। न वै भाववचनस्य क्रियार्थोपपदत्वं सम्भवति। किं तर्हि ? धातोः। धातोर्भाववचनस्यासम्भवादेवं विज्ञास्यते—कियार्थोपपदाद्धातोर्यो विहितो भाववचन इति ।"

§ 583. नमःस्वस्तिस्वाहास्वधालंवषड्योगाच्च–(II. 3. 16).

दीक्षितः ।। एभिर्योगे चतुर्थी स्यात् । हरये नमः । 'उपपदविभक्तेः कारकविभक्तिर्बलीयसी' (प० १०३) । नमस्करोति देवान् । प्रजाभ्यः स्वस्ति । अग्नये स्वाहा । पितृभ्यः स्वधा । 'अलमिति पर्य्याप्त्यर्थग्रहणम्' (वा १४६२) । तेन दैत्येभ्यो हरिरलं—प्रभुः—समर्थः—शक्त इत्यादि । प्रभ्वादियोगे षष्ठ्यपि साधुः । 'तस्मै प्रभवति—'(सू१७६५), 'स एषां ग्रामणीः'(सू१८७८) इति निर्देशात् । तेन 'प्रभुर्बुभूषुर्भुवनत्रयस्य' इति सिद्धम् । वषडिन्द्राय । चकारः पुनर्विधानार्थः, तेनाशीर्विवक्षायां परामपि 'चतुर्थी चाशिषि—' (सू ६३१) इति षष्ठीं बाधित्वा चतुर्थ्येव भवति । स्वस्ति गोभ्यो भूयात् ।

Exposition

§ हरये नमः—Other instances are "स्वस्ति प्रजाभ्यः । स्वाहाऽग्नये। स्वधा पितृभ्यः । अलं मल्लो मल्लाय ।"—*Kāśikā*. The fourth case-ending in connexion with स्वस्ति which is a कुशलार्थक अव्यय as enjoined in this *sūtra* overrules the option (विवक्षा) between चतुर्थी and षष्ठी in connexion with a कुशलार्थक अव्यय expressing the sense of आशीः (benediction) as enjoined by the the rule "चतुर्थी चाशिषि—" (II. 3. 73). Thus in connexion with स्वस्ति the चतुर्थी alone is justified according to the present rule whether it is used in the sense of आशीः or not. This is clarified in the *Vārttika* under the present *sūtra* and the *Bhāṣya* thereon. Cf. "स्वस्तियोगे चतुर्थी कुशलार्थैराशिषि वाविधानात् ॥"—*Vārttika*. So also the *Kāśikā* observes : "चकारः पुनरस्यैव समुच्चयार्थः । तेन आशीर्विवक्षायामपि षष्ठीं वाधित्वा चतुर्थ्येव

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भवति । स्वस्ति गोभ्यो भूयात् । स्वस्ति ब्राह्मणेभ्यः ।"—which has been explained in the *Padamañjarī* as follows : "**चकारः पुनरित्यादि ।** अन्यथा स्वस्तियोगे चतुर्थ्या अवकाशः स्वस्ति जाल्माय, जाल्मत्वादाशीरभावाद्भूतकथनमेतत् । कुशलार्थैराशिषि चतुर्थी चेत्यस्यावकाशोऽन्ये कुशलार्थाः । कुशलं देवदत्ताय, ,कुशलं देवदत्तस्य। स्वस्ति गोभ्यो भूयादुभयप्रसङ्गे परत्वात् पक्षे षष्ठी स्यात्।"

§ '**उपपदविभक्तेः कारकविभक्तिर्बलीयसी**'— This is *Paribhāṣā* No. 94 in Nāgojī Bhaṭṭa's *Paribhāṣenduśekhara* as edited by Dr. F. Kielhorn. Nāgojī explains the *Paribhāṣā* as follows : "ननु नमस्करोति देवान्, नमस्यति देवान् इत्यादौ 'नमः स्वस्ति—' (II. 3. 16) इति चतुर्थी दुर्वारा इत्यत आह—"उपपदविभक्तेः—' इति। कारकविभक्तित्वञ्च क्रियाजनकार्थकविभक्तित्वं, तच्च प्रथमाया अप्यस्ति इति सापि कारकविक्तिरिति 'सहयुक्ते—'(II. 3. 19) इत्यादिसूत्रेषु भाष्ये ध्वनितम् । इयं च वाचनिक्येव । अतएव 'यस्य च भावेन—' (II. 3. 97) इति सप्तम्यपेक्षया अधिकरणसप्तम्या बलवत्वम् अनेन न्यायेन 'तत्र च दीयते—' (V. 1. 96) इति सूत्रे भाष्ये ध्वनितं कैयटेन स्पष्टमुक्तम्". Kielhorn translates the *Paribhāṣā* as follows : "A case-termination which (if it were added to a base would show that the person or thing denoted by that base) is (instrumental in) bringing about the action (denoted by the verb of a sentence), possesses greater force than a case-termination (which might be added to the same base) because of the presence (in the same sentence) of a word (requiring the addition of that particular termination and it accordingly is added in preference to the latter." For further elucidation of the implication of the *Paribhāṣā* *vide* Kielhorn's notes thereon.

§ **नमस्करोति देदान्**—Here नमस् is directly construed with the root √कृ, which thus governs द्वितीया in देवान्. So also in नमस्यति देवान्. *Vide* the following excerpt from *Bhāṣya* on P. III. 1. 19 : "नमसः क्यचि द्वितीयानुपपत्तिः । नमसः क्यचि द्वितीया

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नोपपद्यते। नमस्यति देवानिति। किं कारणम्? नमःशब्देन योगे चतुर्थी विधीयते—सा प्राप्नोति। प्रकृत्यन्तरत्वात् सिद्धम्। नमः शब्देन योगे चतुर्थी विधीयते, नमस्यति शब्दश्चायम्। ननु च नमस्यतिशब्दे नमः-शब्दोऽस्ति। तेन योगे प्राप्नोति। नैष दोषः। अर्थवतो नमःशब्दस्य ग्रहणं, न च नमस्यतिशब्दे नमःशब्दोऽर्थवान्। अथवा उपपदविभक्तेः कारकविभक्तिर्बलीयसीति द्वितीयाविभक्तिर्भविष्यति।"—*Vide* also Śaraṇadeva's *Durghaṭavṛtti* on II. 3. 16.

§ **अलमिति पर्य्याप्त्यर्थग्रहणम्**—(Dīkṣita): This is *Vārttika* as *Bālamonoromā* notes: "वार्त्तिकमेतत्". *Vide* the *Nyāsa* for the explanation of the statement "**अलमिति पर्य्याप्त्यर्थस्य ग्रहणमिति**": 'तस्मै प्रभवति सन्तापादिभ्यः' (V. 1. 101) इत्यलंशब्दसमानार्थेन प्रभवति-शब्देन योगे चतुर्थीनिर्देशाल्लिङ्गात्। ननु च अस्माल्लिङ्गादर्थस्य इदं ग्रहणं, न तु शब्दस्य इत्येषोऽर्थः प्रतीयते। न तु पर्य्याप्त्यर्थस्य इत्येषोऽर्थः। तथा च भूषणप्रतिषेधयोरपि ग्रहणं स्यात्। एवञ्च कन्यामलंकुरुते। अलं बाले रोदनेन इत्यादवपि चतुर्थी स्यात्। नैष दोषः। सामर्थ्यात् पर्य्याप्त्यर्थ-स्यैव ग्रहणं भविष्यति। कथम्? कन्यामलंकुरुते इत्यत्र उपपदविभक्तेः कारकविभक्तिर्बलीयसीति 'कर्मणि द्वितीया' (II. 3. 2) इति द्वितीययैव भवितव्यम्। अलं बाले रोदनेन इत्यत्रापि। अतएव हेतोः करणे तृती-यैव। अत्र हि रोदनं करणभावमापन्नमेव प्रतिषेधेन सम्बध्यते इति सामर्थ्यात् पर्य्याप्त्यर्थस्य ग्रहणं सम्पद्यते॥" So also Haradatta in his *Padamañjarī*.

'प्रभुर्बुभूषुर्भुवनत्रयस्य'—This is a quotation from Māgha's *Śiśupālavadha* (I. 49).

§ 584 मन्यकर्मण्यनादरे विभाषाऽप्राणिषु—(II. 3. 17)

दीक्षितः॥ प्राणिवर्जे मन्यतेः कर्मणि चतुर्थी वा स्यात् तिरस्कारे। न त्वां तृणं मन्ये तृणाय वा। श्यना निर्देशात्ताना-दिकयोगे न। न त्वां तृणं मन्वे। 'अप्राणिष्वित्यपनीय नौका-कान्नशुकशृगालवर्जेष्विति वाच्यम्' (वा १४६४)। तेन 'न त्वां नावं मन्ये' इत्यत्राऽप्राणित्वेऽपि चतुर्थी न। 'न त्वां शुने मन्ये' इत्यत्र प्राणित्वेऽपि भवत्येव।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'मन्यकर्मणि'—'मन्यतेः कर्मणि'—*Kāśikā*. 'श्यना निर्देशात् तानादिकयोगे न' (Dīkṣita) : In the *sūtra* Pāṇini mentions the root √मन् with the addition of the विकरण श्यन्, which is the usual विकरण of the roots belonging to the दिवादि class, thereby indicating that the root √मन् which belongs to the तनादि class, taking the syllable 'उ' as their विकरण, is to be excluded. Vide *Nyāsa* : "विकरणनिर्देशः किमर्थं इति मनिकर्मणि इति कस्मान्नोक्तम् ? एवं हि लघु सूत्रं भवतीति। 'मन ज्ञाने' इत्यस्य दैवादिकस्य ग्रहणं यथा स्यात्, 'मनु बोधने' इत्यस्य तानादिकस्य ग्रहणं मा भूदित्येवमर्थो विकरणनिर्देश इति दर्शयितुमाह—न त्वां तृणं मन्ये इति।" Also : "'मन ज्ञाने' इत्यस्य दैवादिकस्य धातोः श्यना उपलक्षणं, नतु प्रयोगस्थस्य श्यनन्तस्यानुकरणमर्थः। तेन श्यनोऽभावेऽपि भवति 'तृणाय मत्वा रघुनन्दनोऽथ वाणेन रक्षः प्रधनान्निरास्थत्'° ॥ (*Bhaṭṭi*° II. 36) इति। श्यना तु तानादिकस्य 'मनु अवबोधने' इत्यस्य निरासः।"—*Padamañjarī*.

Patañjali in the *Mahābhāṣya* records a *vārttika* which reads : " 'मन्यकर्मणि प्रकृष्टकुत्सितग्रहणम्॥'—मन्यकर्मणि प्रकृष्टम कुत्सितग्रहणं कर्त्तव्यम्। इह मा भूत्। त्वां तृणं मन्ये इति।" Thus according to the Vārttikakāra when प्रकर्ष of कुत्सा (i.e., तिरस्कार or अनादर) is meant, then and then only is the object of the root √मन् (belonging to the दिवादि class) signifying anything other than a प्राणी (animal) put in the fourth case-ending *optionally* ; and as this प्रकर्ष of कुत्सा can be conveyed only if the root √मन् is construed with a negative particle like न, there would be no चतुर्थी in a positive statement like 'त्वां तृणं मन्ये' though it be pejorative in significance. But according to a *sūtra* of Āpiśali, a predecessor of Pāṇini, cited by Haradatta, there is no need of a negative particle for conveying कुत्सा and consequenty such usages as 'तणाय मत्वा रघुनन्दनोऽथ' (*Bhaṭṭi*° II. 36) are justified. We quote here the relevant portions from *Padamañjarī* : "मन्यकर्मणि प्रकृष्टकुत्सितग्रहणमिति वार्त्तिकम्। यद्वाचिनश्चतुर्थी विधीयते ततः प्रकर्षेण यदि कुत्सा प्रतिपादयितुमिष्यते तदा चतुर्थी भवति—न तु सामान्यविव-

6

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्षायाम् । तेन प्रतिषेधयुक्तायां कुत्सायां चतुर्थीविधानं सम्पद्यते इति मत्वाह—न त्वा तृणायेति ; **'मन्यकर्मण्यनादरे उपमाने विभाषा प्राणिषु'** इति आपिशलिरधीते स्म, न तत्र प्रतिषेधापेक्षा । तथा च भट्टिप्रयोगो निदर्शनीयः ।''—Haradatta. "अनादर इति किम् ?—"अश्मानं दृषदं मन्ये मन्ये काष्ठमुलूखलम् । अन्धायास्तं सुतं मन्ये यस्य माता न पश्यति ॥"— *Kāśikā,* on which *Haradatta* comments : 'तत्त्वाख्यानमेतत्'—i.e., it is a mere statement of facts (and as such has no pejorative significance).

§**'अप्राणिषु....................इति वाच्यम्'**—This is not a *Vārttika* but an इष्टि (ruling) of the Bhāṣyakāra. *Vide* : "अप्राणिषु इत्युच्यते । तत्रेदं न सिध्यति । न त्वा श्वानं मन्ये । न त्वा शुने मन्ये इति । एवं तर्हि योगविभागः करिष्यते । 'मन्यकर्मण्यनादरे विभाषा' ।—ततो-'ऽप्राणिषु' । अप्राणिषु च विभाषेति । इहापि तर्हि प्राप्नोति । न त्वा काकं मन्ये । न त्वा शुकं मन्ये इति । **'यदेतदप्राणिषु' इत्येतदनावादिषु इति वक्ष्यामि ।** इमे च नावादयो भविष्यन्ति । न त्वा नावं मन्ये—यावत्तीर्णं न नाव्यम् । न त्वाऽन्नं मन्ये यावद्भुक्तं न श्राद्धम् । **अत्र येषु प्राणिषु नेष्यते ते नावादयो भविष्यन्ति ॥**"— *Bhāṣya* on II.3.17. Thus the Bhāṣyakāra *actually reads* नौ, काक, अन्न, and शुक in the list of exeeptions, though he permits to include in this list other words also according to usage. In the *Kāśikā* the word शृगाल is read in the नावादि list. According to the author of the *Kāśikā* the विभाषा enjoined in this *sūtra* is a case of व्यवस्थितविभाषा : "**यदेतदप्राणिष्विति तदनावादिषु इति वक्तव्यम् । व्यवस्थितविभाषा च ज्ञेया ।**"—*Kāśikā*. But there is no need of resorting to व्यवस्थित-विभाषा in the present *sūtra,* if a complete list of नावादि is read as exceptions. As Haradatta observes : "**नावादित्वादेव सिद्धेः ।**"

§ 585. **गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि ।** —(II.3.12)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दीक्षित ।। अध्वभिन्ने गत्यर्थानां कर्मणि एते स्तश्चेष्टायाम् । ग्रामं ग्रामाय वा गच्छति । चेष्टायां किम्—मनसा हरिं व्रजति । अनध्वनि इति॰ किम्—पन्थानं गच्छति । गन्त्राधिष्ठितेऽध्वन्येवायं निषेधः । यदा तूत्पथात् पन्था एवाक्रमितुमिष्यते तदा चतुर्थी भवत्येव, उत्पथेन पथे गच्छति ।

Exposition

The author of the *Kāśikā* explains चेष्टा as परिस्पन्द or *physical effort* or *movement* : "गत्यर्थानां धातूनां चेष्टाक्रियाणां परिस्पन्दक्रियाणां कर्मणि कारके अध्ववर्जिते द्वितीयाचतुर्थ्यौ भवतः"—*Kāśikā*, on which the *Padamañjarī* comments : "परिस्पन्दन एव चेष्टाशब्दः प्रसिद्ध इति भावः।"—Also 'परिस्पन्दः शारीरव्यापारः'—*Nyāsa*.

§'अनध्वनि' इति किम् ? पन्थानं गच्छति'— This remark is based on the *vārttika* under the present *sūtra*—viz. "अध्वनि अर्थग्रहणम् । अध्वन्यर्थग्रहणं कर्त्तव्यम् । इहापि मा भूत् । पन्थानं गच्छति, वीवधं गच्छति ।"— In commenting upon this *vārttika*, the *Padamañjarī* observes : "अध्वन्यर्थग्रहणमिति । सप्तमीनिर्देशादिति भावः । सप्तमीनिर्देशे ह्यनध्वनि कर्मणि इत्यन्वयः । नानध्वनः प्रकृतेरिति अर्थ एव कर्म नाध्वशब्दः । तेन अध्वपर्यायेभ्योऽपि चतुर्थी न भवति, द्वितीया तु कर्मणि द्वितीयेति भवति ।"— So also *Nyāsa* : "अध्वन्यर्थग्रहणमिति । अर्थप्रधानत्वात् निर्देशस्य । सप्तमीनिर्देशाच्च । यदीह स्वरूपग्रहणं स्यात् 'अनध्वनः' इति कुर्यात् ।"

§"गन्त्राधिष्ठिते..............निषेधः.............पथे गच्छति" (Dīkṣita) : This statement aiso is based on another *vārttika* : 'आस्थितप्रतिषेधश्च', on which the Bhāṣyakāra comments : "आस्थितप्रतिषेधश्चायं वक्तव्यः । यो हि उत्पथेन पन्थानं गच्छति पथे गच्छतीत्येव तत्र भवितव्यम् ।"—आस्थित means सम्प्राप्त or गन्त्राधिष्ठित as explained by Haradatta. Jinendrabuddhi's remarks on this *vārttika* are worth quoting : आस्थितप्रतिषेधश्चायं विज्ञायते । येन देशविशेषेण प्राप्य ग्रामादिकं प्राप्यते

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

देशविशेषो लोके अध्वेति रूढ़ः। केन च प्राप्यं प्राप्यते ? यः पन्था आक्रान्तस्तेन, तस्मात् तस्यैवायं प्रतिषेधः। यदा तु स एव उत्पथेन प्राप्यते तदा तस्य पथोऽध्वव्यपदेशो न भवतीति भवत्येव तत्र चतुर्थी।'—*Nyāsa*. *Bālamanoramā* explains clearly the exact significance of the illustration : 'उत्पथेन पथे गच्छति'—"उज्जयिनीं प्राप्तुं प्रस्थितो मोहात्तन्मार्गात् प्रच्युतो मार्गान्तरं प्रविष्टः। तं परित्यज्य पुनरुज्जयिनीमार्गं आक्रमितुमिष्यते, तदा अनध्वनीति निषेधाभावाच्चतुर्थ्यपि भवत्येवेत्यर्थः। तादृशं लक्ष्यं दर्शयति।"

Now what is the use of saying 'गत्यर्थकर्मणि' instead of 'गतिकर्मणि' in the *sūtra* ? To this the *Nyāsa* says : "अथ अर्थग्रहणं किमर्थम् ? न गतिकर्मणीत्येव उच्येत। यावता गतिरर्थं एव ? नैतदस्ति। या गतिर्गमिनैव शब्दान्तरसन्निधानाद्यनपेक्षयोच्यते तत्र यथा स्यात्। पादविहरणात्मिका च या गतिः प्रधानभूता तस्या एव ग्रहणं यथा स्यादित्येवमर्थम्। तेनेह न भवति— स्त्रियं गच्छति, अजां ग्रामं नयति। अत्र हि गमेर्मैथुनमर्थः स्त्रीशब्दसन्निधानाद् गम्यते, न तु गमेः केवलात्। नयतेश्च प्रापणमेवार्थः प्रधानभूतः, तद्विशेषणन्तु पादविहरणमप्रधानम्।" As regards the absence of चतुर्थी in such instances as अजां नयति, स्त्रियं गच्छति *vide* also *Padamañjarī* : "इह कस्मान्न भवति अजां नयति ग्राममिति? अगत्यर्थत्वात्। प्रतीता ह्यत्र गतिर्न त्वसौ नयतेरर्थः। प्रापणवाचित्वात्। इह तर्हि स्त्रियं गच्छतीति चतुर्थी प्राप्नोति? सिद्धं त्वसम्प्राप्तवचनात्। असम्प्राप्तं यद्वस्तु गमनेन सम्प्रेप्स्यते तस्मिन् कर्मणीति वक्तव्यम्। स्त्री तु सम्प्राप्तैवेति चतुर्थ्यभावः। अध्वनश्चानपवादः। सम्प्राप्तो हि अध्वा, यदा तु असम्प्राप्तः सम्प्रेप्स्यते तदा भवितव्यमेव चतुर्थ्या"— The portion cited from Haradatta's *Padamañjarī* is based on the *vārttikas* § 3-5 on the present *sūtra* and the *Bhāṣya* thereon : 'चेष्टायामनध्वनि स्त्रियं गच्छति, अजां नयतीत्यतिप्रसङ्गः॥ सिद्धं तु असम्प्राप्तवचनात्॥ अध्वनश्चानपवादः॥'—*Vārttikas* § 3—5 on II. 3. 12.

Why mention द्वितीया in the *sūtra* instead of saying 'गत्यर्थकर्मणि चतुर्थी वा चेष्टायामनध्वनि' as द्वितीया is available by the *sūtra* 'कर्मणि द्वितीया', ग्राम etc. being the object of the root √गम् etc. meaning motion ? To this, the *Kāśikā*

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

says: "द्वितीयाग्रहणं किम् ? न चतुर्थ्येव विकल्प्येत. अपवादविषयेऽपि यथा स्यात्। ग्रामं गन्ता, ग्रामाय गन्ता। कृद्योगालक्षणा षष्ठी न भवति"—which has been explained in the *Padamañjarī* as follows: "**ग्रामाय गन्तेति**। द्वितीया तावत् कृद्योगे षष्ठीं बाधते। तया च तुल्यकक्षा चतुर्थी द्वन्द्वेन प्रतिपाद्यत इति चतुर्थ्यपि कृद्योगे भवतीति भावः". The Bhāṣyakāra seems to discard the present *sūtra* as its purpose can be served by the *sūtras* 'कर्मणि द्वितीया' (II. 3. 2) and 'चतुर्थी सम्प्रदाने" (II. 3. 13). As he says: "किमर्थं पुनरिदमुच्यते। चतुर्थी यथा स्यात्। अथ द्वितीया सिद्धा, कर्मणीत्येव। चतुर्थ्यपि सिद्धा। कथम् ? सम्प्रदान इत्येव। न सिध्यति। 'कर्मणा यमभिप्रेति स सम्प्रदानम्' (I.4.32) इत्युच्यते, क्रियया चासौ ग्राममभिप्रेति। कया क्रियया ? गमिक्रियया। क्रियाग्रहणमपि तत्र चोच्यते॥" *See* also *Padamañjarī* as regards the Bhāṣyakāra's view: "अयं योगः शक्योऽवक्तुम्। कथम् ? सन्दर्शनप्रार्थनाध्यवसायैराप्यमानत्वात् क्रियापि कृत्रिमं कर्म। तत्र यदा गमनस्य सन्दर्शनादीनाञ्च स्वरूपभेदो विवक्ष्यते तदा सन्दर्शनादिकर्मणा गमनेनाभिप्रेयमाणस्य ग्रामस्य सम्प्रदानत्वात् चतुर्थी, अभेदविवक्षायान्तु गमनस्य कर्मत्वाभावात् ग्रामः कर्मैव भवतीति द्वितीया सिद्धा, नार्थ एतेनेति **भाष्यकारस्य पक्षः**। तत्र कृत्प्रयोगे षष्ठ्येव भवति". Thus according to Bhāṣyakāra's view कृद्योगलक्षणा षष्ठी also is allowed and such usages as 'ग्रामस्य—' are justified alongside of 'ग्रामं गन्ता" and 'ग्रामाय गन्ता'.

[इति चतुर्थी]

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

॥ अथ पञ्चमी ॥

§ 586. ध्रुवमपायेऽपादानम्—(I.4.24)

दीक्षितः ॥ अपायो विश्लेषः । तस्मिन् साध्ये ध्रुवमवधिभूतं कारकमपादानं स्यात् ।

Exposition

'ध्रुव' in the above *sūtra* conveys the idea of *limit* (अवधि) in respect of which the action of separation (अपाय) takes place. Though in popular speech 'ध्रुव' usually means *fixed, static, constant,* yet according to the present *sūtra*, even *moving objects* like a *running horse*, a *moving chariot* etc. can be called ध्रुव, if they are intended to be conveyed as ध्रुव in respect of some action of separation, and if their *movement* (गति) as such be ignored. This has been made clear in course of the two *vārttikas* § 2-3 and the *Bhāṣya* thereon. Cf. "गतियुक्तेषु अपादानसंज्ञा नोपपद्यतेऽध्रुवत्वात् । (*vār*° §2) गतियुक्तेषू अपादानसंज्ञा नोपपद्यते। अश्वात् त्रस्तात् पतितः, रथात् प्रवीतात् पतितः । सार्थाद् गच्छतो हीन इति। किं कारणम् ? अध्रुवत्वात् ।

"न वाऽध्रौव्यस्याविवक्षितत्वात्" (*vār* °§3) । न चैष दोषः। किं कारणम्। अध्रौव्यस्याविवक्षितत्वात्, नात्राध्रौव्यं विवक्षितम् । किं तर्हि ? ध्रौव्यम् । इह तावत् अश्वात् त्रस्तात् पतित इति यत्तदश्वेऽश्वत्वमाशुगामित्वम्, तद् ध्रुवं तच्च विवक्षितम् । रथात् प्रवीतात् पतित इति यत्तद् रथे रथत्वं रमतेऽस्मिन् रथ इति तद् ध्रुवं तच्च विवक्षितम् । सार्थाद् गच्छतो हीन इति यत्तत् सार्थे सार्थत्वं सहार्थीभावस्तद् ध्रुवं तच्च विवक्षितम् । यद्यपि तावत् अत्रैतत् शक्यते वक्तुं ये त्वेतेऽत्यन्तगतियुक्तास्तत्र कथम् ? धावतः पतितः । त्वरमाणात् पतित इति । अत्रापि न वाऽध्रौव्यस्यावि-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वक्षितत्वात् इत्यव सिद्धम्। कथं पुनः सतो नामाविवक्षा स्यात् ? सतोऽपि अविवक्षा भवति। तद् यथा, अलोमिका एड़का। अनुदरा कन्येति। असतश्च विवक्षा भवति। समुद्रः कुण्डिका, विन्ध्यो वर्धितकमिति।" So also Haradatta in his *Padamañjārī* explains the term ध्रुव in the following words: "ध्रुवमित्येकरूपमुच्यते। ध्रुवमस्य शीलम्, ध्रुवमस्य रूपमिति। इह तदपायेन विशेष्यते अपाये यद् ध्रुवमिति, न तु सार्वत्रिकम्, तच्च अपाये ध्रुवमुच्यते—यदपायेन नाविश्यते, उपयुज्यते चापाय। तच्चार्थादवधिभूतमित्याह यदवधिभूतमिति। एवञ्च सार्थाद् हीनः, रथात् पतितः, धावतः पतित इत्यादौ सत्यपि क्रियान्तरावेशाच्चलत्वे तत्तद्धावनादिक्रियानावेशात् तन्निमित्तमपायं प्रति औदासीन्यादस्त्येव ध्रुवत्वमिति भवत्येव संज्ञा। उक्तञ्च—

अपाये यदुदासीनं चलं वा यदि वाऽचलम्।
ध्रुवमेवातदावेशात् तदपादानमुच्यते॥ इति।

पततः पतितः इत्यत्रापि परगतपातापेक्षया ध्रौव्यमेव। तथा हि—

पततो ध्रुव एवाश्वो यस्मादश्वात् पतत्यसौ।
तस्य त्वश्वस्य पतने कुड्यादिर्ध्रुव उच्यते॥

इह तु परस्परस्मान्मेषावसर्पत इति—

मेषान्तरक्रियापेक्षमवधित्वं पृथक् पृथक्।
मेषयोः स्वक्रियापेक्षं कर्तृत्वं च पृथक् पृथक्।
गतिर्विना त्ववधिना नापाय इति कथ्यते॥"

—The *kārikās* cited by Haradatta in the above extract from the *Padamañjarī* are from Bhartṛhari's *Vākyapadīya* (III.7). For a further elucidation of the *kārikās* of Bhartṛhari *vide* Koṇḍabhaṭṭa's *Vaiyākaraṇabhūṣaṇa* (p. 110), where they are cited, and K. P. Trivedi's notes thereon (pp. 657).

§ 587. अपादाने पञ्चमी ॥—(II.3.28)

दीक्षितः॥ ग्रामादायाति। धावतोऽश्वात् पतति। कारकं किम्—वृक्षस्य पर्णं पतति। 'जुगुप्साविरामप्रमादार्थानामुपसंख्यानम्' (वा° १०७९)। पापाज्जुगुप्सते, विरमति। धर्मात् प्रमाद्यति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Bhaṭṭoji cites two instances of अपादान to denote that a *moving object* (as in धावतोऽश्वात् पतति) can also be regarded as अपादान just like a *static object* (as in ग्रामादागच्छति), if it be regarded as a *limit* (अवधि) in respect of which *separation* (अपाय) takes place. Thus in commenting upon the significance of the second example (viz. धावतोऽश्वात् पतति) cited also by Rāmacandra in his *Prakriyākaumudī*, the author of the °*Prasāda* observes : "तेन चलेऽपि अपादानसंज्ञा सिद्धा स्यात्—इत्यभिप्रेत्य 'धावतोऽश्वात् पतति' इति द्वितीयमुदाहरणमाह ।"

§ **कारकं किम्—वृक्षस्य पर्णं पतति** (Dīkṣita)—In वृक्षस्य पर्णं पतति, वृक्ष is not *directly construed* with the action of falling (पतति) belonging to the *leaf* as a limit. So it is not a *kāraka* and as such not an अपादान which is a *kāraka*. So we have no पञ्चमी here. *Vide* : "It must be remembered that the word denoting the limit of separation must be a *kāraka* ; otherwise, it cannot be अपादान. We have thus वृक्षस्य पर्णं पतति where the sense intended to be expressed is that a leaf connected with a tree falls ; no separation of a tree is intended to be expressed. Hari says :—

'गतिर्विना त्ववधिना नापाय इति गम्यते ।
वृक्षस्य पर्णं पततीत्येवं भाष्ये निदर्शितम् ।'

—वाक्यप° ३. ८, p. 271.

On this Helārāja remarks : "वृक्षसम्बन्धिनः पर्णस्य पातो वाक्यार्थो विवक्षित इति वृक्षस्यावधिना विवक्षात्र नास्ति । तथाचापायोऽयं न भवति । अपायत्वेनावध्यपेक्षारूपेणाविवक्षितत्वात् अत्रापादानता वृक्षस्य न भवति । यदि अपायोऽत्र विवक्ष्यते तदा वृक्षस्यावधित्वात् वृक्षात् पर्णं पततीति भवति ।" The *Vākyapadīya* (Benares Edition. p. 271)." —K. P. Trivedi's *Notes, op. cit.*, p. 659.

§ **'जुगुप्साविरामप्रमादार्थानामुपासंख्यानम्'**— This is *vārttika* under I. 4. 24. The definition of अपादान as laid down in I. 4. 24 cannot strictly apply to these cases, as there is

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

no idea of *physical separation* in roots meaning जुगुप्सा, विराम or प्रमाद. Even the Sūtrakāra himself was forced to frame the subsequent rules (I. 4. 25-31) to defend पञ्चमी, as in those cases the primary notion of अपादान (i.e. विश्लेष) was wanting. The Vārttikakāra in the present *vārttika* supplements Pāṇini's *sūtra* referred to above by extending the scope of अपादान to include cases of roots signifying जुगुप्सा, विराम and प्रमाद as well. Thus the अपादान as defined in I.4.24. is a case of *primary* (मुख्य) अपादान, while that taught in the present *vārttika* and the subsequent rules —viz. I. 4.25-31, is a secondary (गौण) one. *Vide* Haradatta's *Padamañjarī* on the present *vārttika* : "जुगुप्सेति । प्रश्लेषपूर्वको विश्लेषोऽपायः, स चात्र नास्ति । बुद्धिपरिकल्पितत्वात्तु गौणः । न च मुख्ये सम्भवति गौणस्य ग्रहणं युक्तम् । अतएव 'भीत्रार्थानाम्—'इत्यादेरारम्भ इति वाक्यकारस्याभिप्रायः । अत्र च कारकशेषत्वात् षष्ठी प्राप्नोति— नटस्य शृणोतीति यथा ।"— The Bhāṣyakāra, however, discards the present *vārttika* on the ground that both primary (मुख्य) and secondary (गौण) cases of अपाय—i.e., actual and conceived respectively, can both be included within the scope of I. 4. 24. As *Nyāsa* remarks : "न हि कायसम्प्राप्तिपूर्वक एवापायो भवति । किं तर्हि ? चित्तसम्प्राप्तिपूर्वकोऽपि भवति ।"—since, as indicated by the addition of the suffix तमप् in I. 4. 42 (साधकतमं करणम्), the maxim known as गौणमुख्यन्याय is not applicable in the *kāraka* section (see our *notes* on § 560). Thus in Bhāṣyakāra's opinion the subsequent *sūtras*—viz. I. 4. 25-31, are also superfluous. As he observes under each of the above *sūtras* : 'अयं योगः शक्योऽवक्तुम् ।'—We cite below an extract from the *Bhāṣya* on the *vārttika* to show his position clearly as against Pāṇini and Kātyāyana. Cf. : "तत्तर्हि इदं वक्तव्यम् ? न वक्तव्यम् । इह तावत् अधर्मात् जुगुप्सते अधर्मात् बीभत्सते इति य एष मनुष्यः प्रेक्षापूर्वकारी भवति स पश्यति दुःखोऽधर्मो नानेन कृत्यमस्तीति । स बुद्ध्या सम्प्राप्य निवर्त्तते । तत्र 'ध्रुवमपाय-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ऽपादानम्' इत्येव सिद्धम् । इह च धर्माद् विरमति । धर्मात् निवर्त्तते इति धर्मात् प्रमाद्यति, धर्मान्मुह्यतीति य एष मनुष्यः संभिन्नबुद्धिर्भवति स पश्यति नेदं किञ्चित् धर्मो नाम, नैनं करिष्यामीति । **स बुद्धया सम्प्राप्य निवर्त्तते।** तत्र ध्रुवमपायेऽपादानमित्येव सिद्धम् । इह च सांकाश्यकेभ्यः पाटलिपुत्रका अभिरूपतरा इति यस्तैः साम्यं गतवान् भवति स एतत् प्रयुङ्क्ते"—*Mahābhāṣya* on 1.4.24 (*Vār°*). Bhāṣyakāra's opinion has also been clearly stated in the following passage of the *Padamañjarī*: "प्रत्याख्यानं तु साधकतममिति तमब्ग्रहणं लिङ्गं, कारकप्रकरणे यथासम्भवमेव साधकत्वमिति । तदिह अधर्माज्जुगुप्सते इत्यादौ जुगुप्सादिपूर्विकायां निवृत्तौ जुगुप्सादीनां वृत्तिरिति स्थिते य एष मनुष्यः प्रेक्षापूर्वकारी भवति, स पश्यति—दुःखहेतुरधर्मो नैनं करिष्यामीति । स बुद्धया तं प्राप्नोति, प्राप्य च ततो निवर्त्तते ।.... तत्र 'ध्रुवमपाये—' इत्येव सिद्धमिति ।"

It is important to note here that Bhartṛhari in his *Vākyapadīya* makes a threefold classification of अपादान according as (1) the idea of अपाय (separation) is *expressly conveyed* by a root as in ग्रामादागच्छति or अश्वात् पतति; (2) the sense of अपाय, though not expressly stated, is *implicit* in the meaning of the root as in बलाहकात् विद्योतते विदुचत् or धर्मात् प्रमाद्यति; (3) or the root expressive of अपाय is *not at all mentioned* in the sentence. These three varieties of अपादान are designated by him as (1) निर्दिष्टविषय, (2) उपात्तविषय and (3) अपेक्षितक्रिय respectively. In all these three cases, we may have पञ्चमी, according to the *sūtra* 'अपादाने पञ्चमी' (II.3.28) alone, if we discard the other subsequent *sūtras* and *vārttikas* as redundant relying on Bhāṣyakāra's view. We quote below Haradatta's exposition of Bhartṛhari's viewpoint :— "तच्चैतत्—

"निर्दिष्टविषयं किञ्चिदुपात्तविषयं तथा ।
अपेक्षितक्रियं चेति त्रिधाऽपादानमुच्यते ॥"[1]

---

2 *Vākyapadīya*, III. 7. 135

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यत्र धातुनापायलक्षणः संज्ञाविषयो निर्दिश्यते, यथा—ग्रामादागच्छतीति, तन्निर्दिष्टविषयम्। यत्र धातुर्धात्वन्तरार्थाङ्गं स्वार्थमाह। यथा—वलाहकाद् विद्योतते विद्युदिति, अत्र हि निःसरणाङ्गविद्योतने विद्युतिर्वर्त्तते—वलाहकात् निःसृत्य विद्योतते इत्येव; कुसूलात् पचतीत्यत्रादानाङ्गे पाके पचिर्वर्त्तते—कुसूलादादाय पचतीति, तदुपात्तविषयम्। अपेक्षितक्रियन्तु—यत्र क्रिया न श्रूयते, प्रमाणान्तरेण तु प्रतीयते, यथा आगच्छन्तं पुरुषं प्रत्यक्षेण पश्यन्नाह—कुतो भवानिति, सोऽपि तदेव प्रत्यक्षसिद्धमागमनमुपजीवन्नाह—पाटलिपुत्रादिति।"—*Padamañjarī* on I.4.24. See also *Vaiyākaraṇabhūṣaṇa*, p. 111 (*Bombay Sanskrit Series*).

§ 588. भीत्रार्थानां भयहेतुः—(I.4.25).

दीक्षितः ।। भयार्थानां त्राणार्थानाञ्च प्रयोगे भयहेतुरपादानं स्यात्। चोराद्बिभेति। चोरात् त्रायते। भयहेतुः किम्—अरण्ये बिभेति, त्रायते वा।

Exposition

Haradatta expounds the expression 'भीत्रार्थानाम्' as follows : "भयं भीः, त्राणं त्राः, सम्पदादित्वात् भावे क्विप्। भीत्रौ अर्थौ येषां ते भीत्रार्थाः, षष्ठी प्रयोगापेक्षया कारकापेक्षया च।"—*Padamañjarī.*

§ **चोराद्बिभेति, चोरात् त्रायते**—The reading 'चौरात्—' is also justifiable. As Haradatta notes : "चोरयतेः पचाद्यचि चोरः। क्वचित् 'चौरेभ्यः' इति पाठः। तत्र स्वार्थिकः प्रज्ञाद्यण्। छ ादिषु च चुराशब्दः पठ्यते, स चाप्रत्ययादित्यस्य 'ण्यासश्रन्थो युच्' इति युचि बाधके प्राप्ते तस्मादेव निपातनादकावप्रत्यये णिलुकि च व्युत्पाद्यते, ततश्चुरा स्तेयं शीलमस्येति णे कृते स एवार्थो भवति।"

According to Bhāṣyakāra this *sūtra* is not necessary as the idea of बुद्धिपरिकल्पित अपाय (i. e., ideal separation) is present here. Cf. : "अयं योगः शक्योऽवक्तुम्। कथं वृकेभ्यो बिभेति, दस्युभ्यो बिभेति इति। इह तावद् वृकेभ्यो बिभेति इति य एष मनुष्यः प्रेक्षापूर्वकारी भवति स पश्यति यदि मां वृकाः पश्यन्ति ध्रुवो मे मृत्युरिति। स बुद्ध्या संप्राप्य निवर्त्तते। तत्र 'ध्रुवमपायेऽपादानम्' (I. 4. 24) इत्येव

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सिद्धम् ।....etc." See also Haradatta : "तदेवं बुद्धिपरिकल्पितोऽपायोऽस्तीत्युपात्तविषयमिदमपादानम् इति कृत्स्न एव प्रयोगप्रपञ्चे किमवयवपर्य्यनुयोगेन ।"—*Padamañjarī*.

Now why षष्ठी in 'कस्य बिभ्यति देवाश्च जातरोषस्य संयुगे' instead of पञ्चमी ? To this, the author of the *Tattvabodhinī* replies : "कस्य बिभ्यति—' इति रामायणे तु कस्येत्यस्य संयुगेनान्वयात् नास्ति भयहेतुत्वमिति षष्ठीप्रयोगः संगच्छते एव । न चैवं संयुगस्यापादानत्वापत्तिरिति वाच्यम् । परयाऽधिकरणसंज्ञया अपादानसंज्ञाबाधात् । अधिकरणत्वाविवक्षायां तु इष्टापत्तेः ॥"

§ 589. पराजेरसोढ़ः—(I. 4. 26)

दीक्षितः ॥ पराजेः प्रयोगेऽसह्योऽर्थोऽपादानं स्यात् । अध्ययनात् पराजयते । ग्लायतीत्यर्थः । असोढ़ः किम्—शत्रून् पराजयते । अभिभवतीत्यर्थः ।

Exposition

§ **पराजेः प्रयोगे** (Dikṣita)—'परा-जि' stands for the root √जि (as read in धातुपाठ) preceded by the उपसर्ग परा. As Haradatta notes : "अत्र धातुपाठगतस्य जि इत्येतावन्मात्रस्य अनुकरणम् । ततः परापूर्वो जिः पराजिरित्युत्तरपदलोपी समासो द्रष्टव्यः ।" In the example 'अध्ययनात् पराजयते' the root परा—√जि (used intransitively) means ह्रास or ग्लानि. Cf. "उदाहरणे पराजिर्न्यूनीभावे वर्त्ततेऽध्येतुं ह्रसति ग्लायतीत्यर्थः । अकर्मकश्चायमत्रार्थे । तत्र षष्ठ्यां प्राप्तायां वचनम् ।" Bhāṣyakāra discards the present *sūtra* in the following words : "अयमपि योगः शक्योऽवक्तुम् । कथम् अध्ययनात् पराजयते इति । य एष मनुष्यः प्रेक्षापूर्वकारी भवति स पश्यति दुःखमध्ययनं दुर्धरञ्च, गुरवश्च दुरुपचारा इति । स बुद्ध्या संप्राप्य निवर्त्तते । तत्र 'ध्रुवमपायेऽपादानम्' इत्येव सिद्धम् ।"

It is to be noted that the suffix क्त in 'असोढ़ः' has no past (अतीत) significance. That is why it has been explained in the *vṛtti* as 'असह्य'. *Vide* also *Kāśikā* : "असोढ़ः योऽर्थः सोढुं न शक्यते ।'—So the author of the

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Bālamanoramā observes : "तत्र क्तार्थो भूतकालो न विवक्षितः । तदाह असह्योऽर्थ इति ।" Consequently such usages as अध्ययनात् पराजेष्यते are justifiable.

§ 590. वारणार्थानामीप्सितः—(I.4.27)

दीक्षितः ।। प्रवृत्तिविघातो वारणम् । वारणार्थानां धातूनां प्रयोगे ईप्सितोऽर्थोऽपादानं स्यात् । यवेभ्यो गां वारयति । ईप्सितः किम्—यवेभ्यो गां वारयति क्षेत्रे ।

Exposition

§ 'प्रवृत्तिविघातो वारणम्'—This is the statement of Vāmana-Jayāditya. In the present *sūtra* the term 'ईप्सितः' is a क्रियाशब्द (i.e., has *action* for its connotation) and means 'क्रियया आप्तुमिष्टः' and not 'अभिप्रेतः' and that *action* may refer *either* to the *action* of the *agent* (कर्तृ) or to that of the *object* (कर्म). Otherwise पञ्चमी would not be justifiable in such instances as अग्नेर्माणवकं वारयति and कूपादन्धं वारयति where both अग्नि and कूप are neither desired (अभिप्रेत) by the *agent* nor by the *object* (viz. माणवक or अन्ध). We quote below Haradatta's elucidation of the significance of the word ईप्सित which is based upon the observations of the Bhāṣyakāra : "ईप्सितशब्दोऽयमस्ति अभिप्रेतपर्य्यायः । तस्य ग्रहणे यवानामात्मीयत्वे गवां च परकीयत्वे एव स्यात्, न विपर्य्यये । न खलु अस्य एतदभिप्रेतं यदुतात्मीया गावः परकीयान् यवान् वा घसन्निति । मा भूवन् यवा वारयितुमीप्सिताः, वार्य्यमाणानां तु गवामीप्सिताः, न वात्र विशेषः श्रुतः कर्तुरीप्सित इति । इह तर्हि न स्यात्—अग्नेर्माणवकं वारयति कूपादन्धमिति । न हि अग्निकूपौ वारयितुर्वार्य्यमाणस्य वाभिप्रेतौ, क्रियाशब्दस्य तु ग्रहणे वार्य्यमाणस्यान्धादेर्गमनादिक्रियया कूपादेराप्यमानत्वात् सिद्ध्यति, अन्धश्चापश्यन्नपि गन्तव्यं जिगमिषति, अन्यथा न क्वचित्तस्य प्रवृत्तिः स्यात् ।"—*Padamañjarī*. Now why not पञ्चमी after 'गो' as after 'यव' in the sentence 'यवेभ्यो गां वारयति' ? Here, again, *Padamañjarī* has the following answer :

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"अयात्र गवामपादानसंज्ञा कस्मात् न भवति ? ईप्सिततमोऽपीप्सितो भवत्येव। यथा शुक्लतमोऽपि शुक्लः ? परत्वात् कर्मसंज्ञा भविष्यति। कर्मसंज्ञाया अवकाशः—वारणार्थेभ्योऽन्यत्र, अपादानसंज्ञायास्तु प्रकर्षरहित-मीप्सितम्। ईप्सिततमस्य तु उभयप्रसङ्गे परत्वात् कर्मसंज्ञा।"

Note :—"कथं—'यदीच्छति जगत् सर्वं वशीकर्तुमयत्नतः।
परापवादसस्येषु चरन्ती गौर्निवार्यताम्॥'—

उच्यते—ध्रौव्येनाविवक्षितत्वात्।"—Śaraṇadeva's *Durghaṭavṛtti* on 1.4.27.

§ **ईप्सितः किम् यवेभ्यो गां वारयति क्षेत्रे**—Here in the प्रत्युदाहरण, क्षेत्र (field) is *not* ईप्सित. So it is not an अपादान—'अत्र क्षेत्रस्यानीप्सितस्य न भवति संज्ञा'—*Nyāsa*. Bhāṣyakāra does not consider the present *sūtra* necessary. As he observes : "अयमपि योगः शक्योऽवक्तुम्। कथं माषेभ्यो गां वारयति इति ? पश्यत्ययं यदीमा गावस्तत्र गच्छन्ति ध्रुवं सस्यविनाशः, सस्यविनाशे अधर्मश्चैव राजभयञ्च, स बुद्धया संप्राप्य निवर्त्तते। तत्र ध्रुवमपायेऽपादानमित्येव सिद्धम्।"

§ 591. अन्तर्द्धौ येनादर्शनमिच्छति—(I.4.28)

दीक्षितः॥ व्यवधाने सति यत्कर्तृकस्यात्मनो दर्शनस्याभाव-मिच्छति तदपादानं स्यात्। मातुर्निलीयते कृष्णः। अन्तर्द्धौ किम्—चौरान् न दिदृक्षते। इच्छतिग्रहणं किम्—अदर्शनेच्छायां सत्यां सत्यपि दर्शने यथा स्यात्। देवदत्ताद् यज्ञदत्तो निलीयते।

Exposition

Dīkṣita's *vṛtti* on this *sūtra* is virtually a reproduction *verbatim* of the *Kāśikā*. The *Kāśikā* says : 'व्यवधानमन्तर्द्धिः। अन्तर्द्धिनिमित्तं येन अदर्शनमात्मन इच्छति तत्कारकमपादानसंज्ञं भवति।'—Thus according to the author of the *Kāśikā* the सप्तमी in अन्तर्द्धौ is a case of निमित्तसप्तमी. This is also the view of *Jinendrabuddhi*. As he observes in the *Nyāsa* :

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

" 'अन्तर्द्धौ—' इति निमित्तसप्तमीयम् ।" 'निमित्तात् कर्मसंयोगे—' इति (II. 3. 36—*vārttika*) सप्तमी यथा चर्मणि द्वीपिनं हन्ति—इति। एतदेव ज्ञापकं निमित्तात् कर्मसंयोगेऽस्ति सप्तमीति। अस्ति हि अत्र अदर्शनेन कर्मणा संयोगः।"—But *Haradatta* seems to take a different view. According to him अन्तर्द्धौ is a case of सत्-सप्तमी (meaning अन्तर्द्धौ सति) or of विषयसप्तमी (meaning अन्तर्द्धौ विषये) and not निमित्तसप्तमी as the Nyāsakāra holds. Cf. "अन्तर्धौ इति नेयं निमित्तात् कर्मयोग इति सप्तमी, यथा हि वेतनेन धान्यं लुनाति इत्यत्र वेतनस्य धान्येन योगोऽस्ति, तथेहापि अदर्शनमिच्छतीच्छाकर्मणाऽदर्शनेन अन्तर्द्धेर्योगो नास्ति। अथादर्शनस्य यत् कर्म आत्माख्यमात्मनोऽदर्शनमिच्छतीति तेनान्तर्धेर्योगोऽस्ति। यस्यैवादर्शनं तस्यैवान्तर्धानमित्युच्येत। एवमपि 'निमित्तात् कर्मयोगे' इति किं निमित्तं गृह्यते, कारणं प्रयोजनं वा? कारणं चेत्—जाड्येन बद्धः—अत्रापि प्राप्नोति। स एव बध्यते तत्रैव जाड्यमिति। तस्मात् प्रयोजनस्य तत्र ग्रहणम्? तथा चर्मणि द्वीपिनं हन्ति इति चर्म द्वीपिहननस्य प्रयोजनम्। इह तु अन्तर्धानमदर्शनस्य कारणम्। अन्तर्हितः खल्वसौ न दृश्यते। तस्मात् विषयसप्तम्येषा। सत्सप्तमी वा।"—*Padamañjarī.*

§ **अन्तर्धौ किम्? चौरान् न दिदृक्षते**—Here the motif for not looking at the thieves is not अन्तर्धि (*disappearance* or *concealment*) but non-injury. Therefore, we have not पञ्चमी after चौर. As the *Nyāsa* explains: "अत्र यश्चौरान् न दिदृक्षते इति स तैरात्मनोऽदर्शनमिच्छति। न तु अन्तर्द्धिनिमित्तम्। किन्तु उपघातनिवृत्त्यर्थम्। विस्पष्टार्थञ्चान्तर्द्धिग्रहणम्। परत्वात् कर्मसंज्ञयैव बाधितत्वात् चौराणामिहापादानसंज्ञा न भविष्यति॥"—Bhāṣyakāra, however, regards the present aphorism as merely illustrative (प्रपञ्चार्थ) like the previous *sūtras*, and as such discards it. Cf. "अयमपि योगः शक्योऽवक्तुम्। कथमुपाध्यायात् अन्तर्धत्ते इति। पश्यत्ययं यदि मामुपाध्यायः पश्यति। ध्रुवं प्रेषणमुपालम्भो वेति बुद्ध्या संप्राप्य निवर्त्तते। तत्र ध्रुवमपायेऽपादानमित्येव सिद्धम्।"—*Bhāṣya* on I. 4. 28.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

§ 592 आख्यातोपयोगे–(1. 4. 29)

दीक्षितः ।। नियमपूर्वकविद्यास्वीकारे वक्ता प्राक्संज्ञः स्यात् । उपाध्यायादधीते । उपयोगे किम्––नटस्य गाथां शृणोति ।

Exposition

Bhaṭṭoji explains आख्याता as वक्ता and उपयोग as नियमपूर्वक-विद्यास्वीकार. *Vide Kāśikā* : "आख्याता प्रतिपादयिता । उपयोगो नियमपूर्वकं विद्याया ग्रहणम् । उपयोगे साध्ये य आख्याता तत् कारक-मपादानसंज्ञं भवति ।" Haradatta in his *Padamañjarī* points out that the word उपयोग is रूढ़ in the sense indicated in the *Kāśikā*, and नियम refers to such practices as *begging alms* etc. that a student had to perform regularly during his period of study at his preceptor's home. Cf. "**नियमपूर्वकं-विद्याग्रहणमिति ।** तत्रैव उपयोगशब्दस्य रूढ़त्वात् । यथा तेषां मन्त्राणा-मुपयोगे द्वादशाब्दमधःशय्येति । नियमो भिक्षाचरणादिः ।" *Vide* also *Mahābhāṣya* : "उपयोग इति किमर्थम् ? **नटस्य शृणोति । ग्रन्थिकस्य शृणोति ।** उपयोग इत्युच्यमानेऽप्यत्र प्राप्नोति । एषोऽपि हि उपयोगः । आतश्चोपयोगो यदारम्भका रङ्गं गच्छन्ति नटस्य श्रोष्यामो ग्रन्थिकस्य श्रोष्याम इति । एवं तर्हि उपयोग इत्युच्यते— सर्वश्चोपयोगस्तत्र प्रकर्षगतिर्विज्ञास्यते । साधीयो य उपयोग इति । कश्च साधीयः । यो ग्रन्थार्थयोः । अथवा उपयोगः को भवितुमर्हति ? यो नियमपूर्वकः । तद्यथा उपयुक्ता माणवका इत्युच्यन्ते य एते नियम-पूर्वकमधीतवन्तो भवन्ति ।"—In the *Bhāṣya*, as we find, the counter-instance (i.e. प्रत्युदाहरण) is given as नटस्य शृणोति and not as नटस्य गाथां शृणोति. In the printed text of the *Kāśikā* also the same reading is found, and the *Padamañjarī* too adopts that reading. But in the *Nyāsa* नटस्य गाथां शृणोति is given as the प्रत्युदाहरण. On these two readings *vide* Haradatta's *Padamañjarī* : "क्वचित्तु नटस्य गाथां शृणोति, ग्रन्थिकस्य कथां शृणोति इति पाठः । तत्रापि नटादिनिमित्तं गाथादेः श्रवणं करोती-त्यर्थो, न तु गाथादिविशेषणं नटादिः । अकारकत्वप्रसङ्गात् । ग्रन्थिकः कथाया वाचयिता ।"— Cf. also the *Tattva-bodhinī* on this point :

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"नटस्येति। गाथाकर्मकं नटसम्बन्धि श्रवणमित्यर्थः। नटस्य गाथान्वये तु कारकत्वाभावात् एवाप्राप्तेरुपयोगग्रहणं समर्थितं न स्यात्." In नटस्य शृणोति, the idea of नियम is not present ; therefore there is no पञ्चमी. As *Nyāsa* puts it : "नियमपूर्वकमिह विद्याग्रहणं नास्ति।"—The Bhāṣyakāra, as in the previous *sūtras*, finds the present *sūtra* unnecessary. As he says : "अयमपि योगः शक्योऽवक्तुम्। कथमुपाध्यायादधीत इति। अपक्रामति तस्मात् तदध्ययनम्। यद्यपक्रामति किं नात्यन्तायापक्रामति? सन्ततत्वात्....."—This statement of the Bhāṣyakāra has a great philosophical import as regards his conception of the nature of *consciousness* and the relation of *words* on the one hand with *consciouness* on the other which has been explained in Kaiyaṭa's gloss thereon.

§ 593. जनिकर्तुः प्रकृतिः—(I.4.30)

दीक्षितः ।। जायमानस्य हेतुरपादानं स्यात्। ब्रह्मणः प्रजाः प्रजायन्ते।

Exposition

Here in the *sūtra*, the term 'जनि' refers to the *meaning* (अर्थ) expressed by the root √जन् (*to be praduced, to be born*) and *not* to the root √जन् itself, as it might appear, by the additon of the suffix इक् (*vide* the *vārttika* : इक्श्तिपौ धातुनिर्देशे'). All this has been clearly indicated in the *Kāśikā* and the *Padamañjarī* thereon. Cf. "जनेः कर्ता जनिकर्ता। जन्यर्थस्य जन्मनः कर्त्ता जायमानः। तस्य या प्रकृतिः कारणं हेतुः तत् कारकमपादानसंज्ञं भवति। शृङ्गात् शरो जायते, गोमयाद् वृश्चिको जायते।"—which has been explained by Haradatta as follows : "जनेः कर्त्ता जनिकर्त्ता इति कर्मणि षष्ठ्याः समासः। अयमेव च निर्देशो ज्ञापयति—'कर्त्तरि च' इति प्रतिषेधोऽनित्य इति। कः पुनरसावित्यत आह—जन्यर्थस्येति। एतदुक्तं भवति। जनिशब्दोऽयम् 'इञ्जादिभ्यः' इति जनेर्भाव इञ्मुत्पाद्य व्युत्पादितः। 'जनिवध्योश्च' इति वृद्धिप्रतिषेधो जन्यार्थवाची, न तु 'इक्श्तिपौ धातुनिर्देशे' इति इक्प्रत्ययान्तः, 'गमहन—' इत्युपधाया लोपप्रसङ्गात्। नाप्यागन्तुकेनेकारेण धातोर्निर्देशः। शब्दात्मकस्य धातोः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कर्त्रा सम्बन्धायोगात्। अथापि अर्थद्वारको योगः स्यात्। एवमपि धातुनिर्देशे तस्यैव प्रयोगे स्याद्, न पर्य्यायस्य। अङ्गादङ्गात् सम्भवसीति। अर्थग्रहणे तु अत्रापि भवतीति।" —Consult also the *Tattva-bodhinī* on this point where we have a recapitulation of Haradatta's argument. प्रकृति in the *sūtra* has been explained by some (e.g., Patañjali, Kaiyaṭa) as उपादानकारण (*material cause*) only, while others (e.g, Jayāditya, Jinendrabuddhi) construe it to mean both उपादान and निमित्त (*efficient cause*) कारण. On this *vide* the following extract from *Nyāsa*: "अथ प्रकृतिग्रहणं किमर्थम्? यावता ध्रुवमित्यनुवर्त्तते, ध्रुवञ्चावधिभूतमित्युक्तम्। जनिकर्तुश्चावधिः कारणमेव भवति। तत्रान्तरेणापि प्रकृतिग्रहणं प्रकृतेरेव भविष्यति। नैतदस्ति। पुत्रात् प्रमोदो जायते इत्यादौ पुत्रादेरप्यपादानसंज्ञा यथा स्यादित्येवमर्थं प्रकृतिग्रहणम्। द्विविधं हि कारणम्—उपादानकारणं सहकारिकारणञ्च। तत्र यत् कार्य्येणाभिन्नदेशं तदुपादानकारणम्। यथा घटस्य मृत्पिण्डः। सहकारिकारणं यत् कार्य्येण भिन्नदेशम्। यथा तस्यैव दण्डचक्रादि। तत्रासति प्रकृतिग्रहणे प्रत्यासत्तेरुपादानकारणस्यैव स्यात्। नेतरस्य। प्रकृतिग्रहणे तु सति सर्वस्यैव कारणमात्रस्य भवति।" As regards the exact significance of the word जायमान, the following *kārikā* of Bhartṛhari should be consulted :—

"पूर्वमिवस्थामजहत् संस्पृशन् धर्ममुत्तरम्।
संमूर्च्छित इवार्थात्मा जायमानोऽभिधीयते॥"

—*Vākyapadīya*, III. 7. 118

§'ब्रह्मणः प्रजाः प्रजायन्ते'— cited as an instance of this rule both by Rāmacandra and Bhaṭṭojī, can serve as an illustration *either* of उपादानकारण *or* of निमित्तकारण: "इह प्रकृतिग्रहणं हेतुमात्रपरमिति वृत्तिकृन्मतम्। पुत्रात् प्रमोदो जायते इत्युदाहरणात्। उपादानमात्रपरमिति तु भाष्यकैयटमतम्। तदुभयसाधारणमुदाहरणमाह—'ब्रह्मण इति'। ब्रह्मा हिरण्यगर्भः। स च हेतुरेव, न तु उपादानम्। किञ्च मायोपहितं चैतन्यं ब्रह्म, तद्धि सर्वकार्य्योपादानमिति वेदान्तसिद्धान्तः।"—The Bhāṣyakāra discards the present *sūtra* as well in the following words: "अयमपि योगः शक्योऽवक्तुम्। कथं गोमयाद् वृश्चिको जायते। गोलोमाविलोमभ्यो दूर्वा जायन्ते इति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अपक्रामन्ति तास्तेभ्यः। यद्यपक्रामन्ति, किं नात्यक्तायापक्रामन्ति? सन्ततत्वात्। अथवान्याश्चान्याश्च प्रादुर्भवन्ति।"

§ 594. **भुवः प्रभवः**—(I. 4 31)

दीक्षितः॥ भवनं भूः। भूकर्तुः प्रभवस्तथा, हिमवतो गङ्गा प्रभवति। तत्र प्रकाशते इत्यर्थः। 'ल्यब्लोपे कर्मण्यधिकरणे च' (वा° १४७४-१४७५)। प्रासादात् प्रेक्षते, आसनात् प्रेक्षते। प्रासादमारुह्य, आसन उपविश्य प्रेक्षत इत्यर्थः। श्वशुराज्जिह्रेति। श्वशुरं वीक्ष्येत्यर्थः। 'गम्यमानापि क्रिया कारकविभक्तीनां निमित्तम्' (वा° ५०४१)। कस्मात् त्वम्, नद्याः। 'यतश्चाध्वकाल-निमानं (निर्माणं) ततः पञ्चमी' (वा° १४७७)। 'तद्युक्तादध्वनः प्रथमा-सप्तम्यौ' (वा° १४७९)। 'कालात् सप्तमी च वक्तव्या' (वा° १४७८)। वनाद् ग्रामो योजनं योजने वा। कार्त्तिक्या आग्रहायणी मासे।

Exposition

The term 'कर्तुः' follows from the previous *sūtra* (I. 4, 30). So Dikṣita in his *vṛtti* says: "भूकर्तुः". Vide *Kāśikā*: 'कर्तुरिति वर्त्तते'.—The stem 'भ' (of the word भुवः) may *either* mean भवन by the addition of the suffix क्विप् in भाववाच्य *or* may denote the root √भू. It should be noted, however, that only when the root भू is preceded by the preposition (उपसर्ग) प्र can it signify the idea of प्रभवन. All this has been clearly pointed out by Haradatta in his gloss on the *Kāśikā*: "भवनं भूः। सम्पदादित्वात् क्विप्। अत्रापि प्रशब्दो द्रष्टव्यः। न हि केवलस्य भवत्यर्थस्य प्रभवनेन योगः। किं तर्हि? सोपसर्गस्य भुवः। कर्त्तेति। भवत्यर्थस्य कर्त्तेत्यर्थः। भुवो वा धातोः। कथं पुनर्धातोर्नाम कर्त्ता स्यात्? धातुर्वै शब्दः, शब्दे असम्भवे अर्थे कार्यं विज्ञास्यते।"

§ **हिमवतो............प्रकाशते इत्यर्थः** (Dīkṣita)—Similarly काश्मीरेभ्यो वितस्ता प्रभवति. The Vṛttikāra (i.e., the author of

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

the *Kāśkā*) explains the word प्रभवति by 'प्रथमत उपलभ्यत इत्यर्थः।' Dīkṣita, following Haradatta, expresses the same idea by प्रकाशते. This is to show that the scopes of the two *sūtras* I. 4. 30 and I. 4. 31 are mutually exclusive and पञ्चमी in such cases as हिमवतो गङ्गा प्रभवति cannot be accounted for by the preceding rule. *Vide* the following observation of the *Nyāsa* on this point: "ननु च हिमवतो गङ्गा प्रभवति इत्येतत् पूर्वेणैव सिद्धम्। तथाहि अयमत्रार्थः—हिमवतो गङ्गा जायते इति। तत् किमर्थमिदमारभ्यते इत्याह—प्रथमत उपलभ्यत इति। एष चार्थोऽनेकार्थत्वात् धातूनां वेदितव्यः। जन्यर्थस्त्वत्र न सम्भवत्येव, न हि हिमवान् गङ्गायाः कारणम्, सा हि अन्येभ्य एव कारणेभ्य उत्पन्ना। हिमवति तु केवलं प्रथमत उपलभ्यते इति।"— So also *Padamañjarī*. The Bhāṣyakāra, however, discards the present *sūtra* as superfluous: "अयमपि योगः शक्योऽवक्तुम्। कथं हिमवतो गङ्गा प्रभवतीति। अपक्रामन्ति तास्तस्मादापः। यद्यपक्रामन्ति किं नात्यन्तायापक्रामन्ति। संततत्वात्। अथवा अन्याश्च अन्याश्च प्रादुर्भवन्ति।"

§ 'ल्यब्लोपे कर्मण्यधिकरणे च'— This and the subsequent *vārttikas* recorded under this rule by Dīkṣita are really found in the *Mahābhāṣya* under the rule 'अपादाने पञ्चमी' (II. 3. 28). ल्यप् in the present *vārttika* stands also for क्त्वा as well. As the *Tattvabodhinī* notes: "ल्यब्ग्रहणमिह ल्यबर्थपरम्। तेन क्त्वोऽपि लोपे सिध्यति। आसने स्थित्वा प्रेक्षते—आसनात् प्रेक्षत इति।" —In प्रासादात् प्रेक्षते, आसनात् प्रेक्षते, श्वशुराज् जिह्रेति etc. द्वितीया or सप्तमी, according as the case may be, was expected in connection with the indeclinable participles (आरुह्य, उपविश्य, वीक्ष्य etc.), though not expressly mentioned, according to the maxim: "गम्यमानापि क्रिया कारकविभक्तीनां निमित्तम्' which has already been referred to. So, the present *vārttika* provides for पञ्चमी instead of normally expected द्वितीया or सप्तमी. As Haradatta observes: "प्रासादादिति —अत्र ल्यबन्तस्याप्रयोगेऽपि अर्थो गम्यते इति द्वितीया प्राप्नोति।" Also: "प्रासादात् प्रेक्षते,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आसनात् प्रेक्षते इत्यत्र प्रासादमारुह्य, आसने उपविश्य प्रेक्षते इति गम्यमानार्थत्वात् अप्रयुज्यमानस्यापि ल्यबन्तस्य शब्दस्य सम्बन्धे कर्मणि द्वितीया अधिकरणे सप्तमी च प्राप्नोतीति इह पञ्चमी विधीयते।"— The same *maxim* (viz, 'गम्यमानापि—') can explain as well पञ्चमी in 'कस्मात् त्वम्, नद्याः' where 'आगतः' is suppressed. In the *Mahābhāṣya*, however, a parallel instance of पञ्चमी (viz. 'कुतो भवान्। पाटलिपुत्रात्') is given under the *vārttika* : 'प्रश्नाख्यानयोश्च' (II. 3. 28. 3). Dīkṣita, however, omits that *vārttika* and explains it by the maxim referred to above. The Bhāṣyakāra, however, discards the above *vārttikas* and explains पञ्चमी in 'प्रासादात् प्रेक्षते' etc. and 'कुतो भवान्' etc. as really cases of अपादाने पञ्चमी—the former being actually a case of उपात्तविषय and the latter of अपेक्षितक्रिय अपादान, as pointed out distinctly by Haradatta in his *Padamañjarī*. *Vide* : "प्रत्याख्यानं तु प्रेक्षणं चक्षुषा पदार्थानां ज्ञानम्। तैजसं चक्षुर्बहिर्निःसृत्य विषयान् गृह्णाति, निःसरणाङ्गके च प्रेक्षणे धातुर्वर्त्तते, तत्र अङ्गभूतनिःसरणं प्रति **प्रासाद उपात्तविषयमपादानं भवति।** प्रासादात् प्रेक्षते इति कोऽर्थः? प्रासाद-प्रदेशात् चाक्षुषं तेजो निःसार्य्य पदार्थान् गृह्णातीति। 'कुतो भवान्' इति क्रियाया अभावादनपादानत्वात् कलवद्वचनप्रत्यक्षादिप्रमाणसिद्धामागमनादिक्रियामपेक्ष्य इदं प्रयुज्यते, तत्र प्रयोक्तुराख्यातुश्च मनसि विपरिवर्त्तमानमागमनं प्रति **अपेक्षितक्रियमपादानं** पाटलिपुत्रादिति।" —*Padamañjarī*.

§ **'यतश्चाध्वकाल.........कालात् सप्तमी च वक्तव्या'**—These *vārttikas* are read in the *Mahābhāṣya* under II. 3. 28. The last two *vārttikas* as recorded here by Dīkṣita slightly differ from their original forms, In the *Mahābhāṣya* we have :"यतश्चाध्वकालनिर्माणम्। तद्युक्तात् काले सप्तमी। अध्वनः प्रथमा च।" — *vārttikas* § 4-6. In the *Nyāsa*, the above *vārttikas* have been explained as follows : **"यतश्चाध्वकाले-त्यादि।** यतः प्रभृति अध्वनः कालस्य निर्माणम् इयत्तापरिच्छेदस्तत्र पञ्चमी वक्तव्या। एतदुक्तं भवति। अध्वनि काले च निर्मीयमाणे यदवधिभूतत्वेन विवक्ष्यते तत्र पञ्चमी वक्तव्या व्याख्येया। ......**'तद्युक्तात् काल'** इत्यादौ तदित्यनेन पञ्चमी सम्बध्यते। पञ्चमीयुक्तात् परो यः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कालस्तत्र सप्तमी वक्तव्या व्याख्येया। ......'अध्वनः प्रथमेत्यादि'। तद्युक्तादिति वर्तते।" —In the *Mahabhāṣya* Patañjali, however, discards all these *vārttikas* as unnecessary. As he says: "तत्तर्हीदं बहु वक्तव्यम्? न वक्तव्यम्।.................. यतश्चाध्वकालनिर्माणं तत्र पञ्चमी वक्तव्येति। इदमत्र प्रयोक्तव्यं यत् न प्रयुज्यते—गवीधुमतः निःसृत्य सांकाश्यं चत्वारि योजनानि। कार्त्तिक्या आग्रहायणी मासे इति। इदमत्र प्रयोक्तव्यं यन्न प्रयुज्यते कार्त्तिक्याः प्रभृति आग्रहायणी मास इति। तद्युक्तात् काले सप्तमी वक्तव्येति। इदमत्र प्रयोक्तव्यं यन्न प्रयुज्यते कार्त्तिक्या आग्रहायणी गते मास इति। अध्वनः प्रथमा च सप्तमी चेति। इदमत्र प्रयोक्तव्यं यन्न प्रयुज्यते गवीधुमतो निःसृत्य यदा चत्वारि योजनानि गतानि भवन्ति ततः सांकाश्यम्। चतुर्षु योजनेषु गतेषु सांकाश्यमिति।" For further clarification of the Bhāṣyakāra's viewpoint consult Haradatta's *Padamañjarī*.

§ 595. अन्यारादितरर्तेदिक्शब्दाञ्चूत्तरपदाजाहियुक्ते—(II.3.29).

दीक्षितः॥ एतैर्योगे पञ्चमी स्यात्। अन्येत्यर्थग्रहणम्। इतरग्रहणं प्रपञ्चार्थम्। अन्यो भिन्न इतरो वा कृष्णात्। आराद्वनात्। ऋते कृष्णात्। पूर्वो ग्रामात्। दिशि दृष्टः शब्दो दिक्शब्दः। तेन सम्प्रति देशकालवृत्तिना योगेऽपि भवति। चैत्रात् पूर्वः फाल्गुनः। अवयववाचियोगे तु न। 'तस्य परमाम्रेडितम्' (सू° ८७) इति निर्देशात्। पूर्वं कायस्य। अञ्चूत्तरपदस्य तु दिक्शब्दत्वेऽपि 'षष्ठ्यतसर्थ—'(सू° ६०९) इति षष्ठीं बाधितुं पृथग्ग्रहणम्। प्राक् प्रत्यग् वा ग्रामात्। आच्—दक्षिणा ग्रामात्। आहि—दक्षिणाहि ग्रामात्। 'अपादाने पञ्चमी' (सू° ५८७) इति सूत्रे 'कार्त्तिक्याः प्रभृति' इति भाष्यप्रयोगात् प्रभृत्यर्थयोगे पञ्चमी। भवात् प्रभृति आरभ्य वा सेव्यो हरिः। 'अपपरिबहिः—(सू° ६६६) इति समासविधानाज् ज्ञापकाद् बहिर्योगे पञ्चमी। ग्रामाद् बहिः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Exposition

§ "अन्य—इत्यर्थग्रहणम्। तेन पर्यायप्रयोगेऽपि भवति। अन्यो देवदत्तात्। भिन्नो देवदत्तात्। अर्थान्तरं देवदत्तात्। विलक्षणो देवदत्तात्।"—*Kāśikā.*

§ **इतरग्रहणं प्रपञ्चार्थम्**—Thus इतर being used usually in the sense of अन्य, its separate enumeration in the present *sūtra* is for the purpose of illustration (प्रपञ्च) merely. The author of the *Kāśikā*, however, explains the term इतर as: 'इतर इति निर्दिश्यमानप्रतियोगी पदार्थ उच्यते। इतरो देवदत्तात्।'—which has been elucidated in the *Nyāsa* as follows: 'इतर इति.....पदार्थ उच्यते इति। यथा क्वचित् प्रकरणे द्वौ प्रकृतौ देवदत्तोऽन्यश्च कश्चित्। तत्रैकस्तावत् निर्दिश्यते देवदत्तः शूर इति। तस्य निर्दिश्यमानस्य योऽसौ द्वितीयः सम्बन्धी प्रतियोगी स इतरशब्देनोच्यते यथेतरः कातरः इति।"—Thus it seems that according to the author of the *Kāśikā* there is a subtle distinction between the connotations of the terms इतर and अन्य. Haradatta, however, demurs against the separate enumeration of इतर in the *sūtra*: "यथा देवदत्त-यज्ञदत्तयोः प्रकृतयोः आह देवदत्तः शूर इति इतरः कातर इति तस्यान्यार्थान्तर्भावोऽस्तीति चिन्त्यम्।" Dīkṣita's remark—viz. 'इतरग्रहणं प्रपञ्चार्थम्' seems to be based upon the above observation of Haradatta. Viṭṭhala, in his commentary °*Prasāda*, reproduces the text of *Kāśikā* and *Nyāsa* and considers इतर as being different in connotation from अन्य—"अतोऽन्यार्थादन्यः।"

§ **ऋते कृष्णात्**—ऋते is an अव्यय having the sense of वर्जन. We have several cases where द्वितीया is used instead of पञ्चमी in connexion with ऋते. Thus—'क्व कर्म प्रध्वस्तं फलति पुरुषाराधनमृते' (*Mahimna-stotra*). Haradatta regards them as instances of poetic license. As he observes: "कथं 'यत् किञ्चित् राजसूयमृते सोमम्' इति? छान्दसत्वात्। कथं 'न मामृते राम रमेत वाली'ति, 'क्व कर्म प्रध्वस्तं फलति पुरुषाराधनमृते'?—निरङ्कुशाः कवयः." In

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

the *Cāndra-vyākaraṇa*, there is a *sūtra* 'ऋते द्वितीया च" to defend such cases of द्वितीया,

§ **पूर्वो ग्रामात् । दिशि दृष्टः शब्दः...पूर्वं** कायस्य (Dīkṣita)—This is based upon the following statement of the *Kāśikā* : "दिक्शब्द इत्यत्र शब्दग्रहणं देशकालवृत्तिनापि दिक्शब्देन योगे यथा स्यात् । इतरथा हि दिग्वृत्तिनैव स्यात् । इयमस्याः पूर्वेति । इह तु न स्यात् । अग्रमस्मात् पूर्वः कालः इति ।"— Thus by दिक्शब्द are meant all such words like पूर्व, उत्तर etc. that are *occasionally* used to denote the different directions but are *also* used to denote *priority* or *posteriority* in point of time or of space. But when पूर्व, उत्तर etc. are used with reference to the parts of our body, षष्ठी is used instead of पञ्चमी. This is indicated by the Sūtrakāra himself by employing षष्ठी instead of पञ्चमी in the *sūtra* "तस्य परमाम्रेड़ितम्'' (VIII. 1. 2) in connexion with पर which is otherwise regarded as a दिक्शब्द. Cf. '**शब्दग्रहणमिति** । सति हि तस्मिन् दिशि दृष्टः शब्दो दिक्शब्द इत्युत्तरपदलोपी समासो लभ्यते । तेन यदा कदाचित् दिशि दृष्टेन सम्प्रति देशकालवृत्तिनापि योगे भवति ग्रामात् पूर्वो देशः चैत्रात् पर्वः फाल्गुनः इति । अवयववाचिभिस्तु योगे न भवति पूर्वं कायस्येति, 'तस्य परमाम्रेड़ितम्' इति निर्देशात् ।" —*Padamañjarī*.

§ **अञ्चूत्तरपदस्य तु..........पृथग्ग्रहणम्** —(Dīkṣita). *Vide* : "अञ्चूत्तरपदग्रहणं किमर्थम्— न दिक्शब्दैर्योग इत्येव सिद्धम् ? 'षष्ठ्यतसर्थप्रत्ययेन' (II. 3. 30) इति वक्ष्यति । तस्यायं पुरस्तादपकर्षः ।"— *Mahābhāṣya*. By 'अञ्चूत्तरपद' in the present *sūtra* is meant the दिक्शब्द that has a derivative of the root √अञ्चु as an उत्तरपद. So there can be no पञ्चमी in connexion with such words as सध्रङ् etc. that are also अञ्चूत्तरपदs. Cf. 'सध्र्यङ् देवदत्तेन' इत्यादौ अदिक्शब्दार्थमञ्चूत्तरपदग्रहणं न भवति । दिकशब्दैः साहचर्य्यात् अस्यापि दिक्शब्दस्यैव ग्रहणादिति भावः ।" —*Padamañjarī*. Cf. also : **'प्राग् ग्रामादिति ।** प्रपूर्वात् अञ्चतेः क्विनि तदन्तात् 'दिकशब्देभ्यः सप्तमीपञ्चमीप्रथमाभ्यो दिग्देशकालेष्वस्तातिः' (V. 2. 27)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इत्यस्तातिः। तस्य 'अञ्चेर्लुग्' (V. 2. 30) इति लुकि कृते प्रागिति उदाहरणम्। एवं चेत् दिक्शब्देत्येव सिद्धे किमर्थं पृथग्ग्रहणम्, अतसर्थषष्ठीबाधनार्थमिति ब्रूमः।"— °*Prasāda.*

The words दक्षिणा, दक्षिणाहि, उत्तरा, उत्तराहि are formed by the addition of the suffixes आच् and आहि according to the *sūtras*: "दक्षिणादाच्। आहि च दूरे। उत्तराच्च"—(V. 3. 36-38).

§ **अपादाने ....पञ्चमी**—See the *Bhāṣya*-text quoted by us in our notes on the *vārttika*—'यतश्चाध्वकालनिर्माणम्'—read under II. 3. 28 in the *Mahābhāṣya.* For the use of पञ्चमी in connexion with प्रभृति and its synonyms in the writings of poets—cf. 'असूत सद्यः कुसुमान्यशोकः स्कन्धात् प्रभृत्येव सपल्लवानि' (*Kumāra*° III. 26). Rāmacandra Dīkṣita says—'आरभ्यार्थयोगेऽपीति केचित्' (where आरभ्यार्थ means प्रभृत्यर्थ) apparently referring to the aphorism of Vopadeva in his *Mugdhabodha*—viz. 'अन्यारभ्यार्थारात्—' as pointed out by Viṭṭhala in his °*Prasāda* thereon.

§ **अपपरि.................ग्रामाद् बहिः**— Cf. 'बहिर्योगे च—' *Prakrīyākaumudī* on which *Viṭṭhala* has the following note : 'तथा च महाभाष्ये। 'अपपरिबहिरञ्चवः पञ्चम्या'-इत्यत्रोक्तम्—इदं तर्हि प्रयोजनम् बहिःशब्देन योगे पञ्चमी न विधीयते, तत्रापि यथा स्यादिति। तथा— कथमि ैतत् सिध्यति। पञ्चमीग्रहणसामर्थ्यात् इति चोक्तम्।' —*Bhāṣya* on II. 1. 11-12. The *Kāśikā* also remarks on II. 1. 12 — 'बहिःशब्दयोगे पञ्चमीभावस्य एतदेव ज्ञापकम्।' —As injunctions based on ज्ञापकs are not universally applicable we can have षष्ठी also instead of पञ्चमी in some cases. So the *Tattvabodhinī* points out : "ज्ञापकसिद्धं न सर्वत्र। तेन 'करस्य करभो बहिः'[1] इति सिद्धम्।" — For elucidation of the *Paribhāṣā* 'ज्ञापकसिद्धं न सर्वत्र' referred to in the *Tattvabodhinī* consult Nāgojī Bhaṭṭa's *Paribhāṣenduśekhara* (Pari° 116) and Kielhorn's *notes* thereon. See also *Durghaṭavṛtti* on II. 1. 12.

---

1 Amara° II. 6. 81

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

§ 596. अपपरी वर्जने—(I. 4. 88)

दीक्षितः ।। एतौ वर्जने कर्मप्रवचनीयौ स्तः ।

Exposition

The indeclinables अप and परि are considered as कर्मप्रवचनीय's when they suggest the sense of वर्जन. The governing rule 'कर्मप्रवचनीयाः' (I. 4. 83) follows here. The *Kāśikā* explains वर्जन as : 'प्रकृतेन सम्वन्धिना कस्यचिदनभिसम्वन्धो वर्जनम् ।'—When अप and परि become कर्मप्रवचनीय-s, they govern पञ्चमी according to the rule 'पञ्चम्यपाङ्परिभिः' (II. 3. 10), and परि is *optionally* reduplicated according to the *vārttika* §2 under the rule 'परेर्वर्जने' (VIII. 1. 5).—viz. 'परेर्वर्जने वावचनम्'. Thus we may have both 'परि त्रिगर्त्तेभ्यः वृष्टो देवः' and 'परि परि त्रिगर्त्तेभ्यो वृष्टो देवः' as instances of परि as a कर्मप्रवचनीय. Similarly 'अप त्रिगर्त्तेभ्यो वृष्टो देवः ।'

§ 597 आङ् मर्यादावचने—(I. 4. 89)

दीक्षितः ।। आङ् मर्यादायामुक्तसंज्ञः स्यात् । वचनग्रहणादभिविधावपि ।

Exposition

'उक्तसंज्ञः' (in the *vṛtti*) means 'कर्मप्रवचनीयसंज्ञः'.

§ **वचनग्रहणादभिविधावपि** (Dīkṣita) :—मर्यादा in the *sūtra* includes अभिविधि also, since the idea of अवधि (limit) is common to both. *Vide* the *Mahābhāṣya* : "आङ् मर्यादाभिविध्योरिति वक्तव्यम् । इहापि यथा स्यात् । आकुमारं यशः पाणिनेः । तत्तर्हि वक्तव्यम् । न वक्तव्यम् । मर्यादावचन इत्येव सिद्धम् । एषास्य यशसो मर्यादा ।'—(I.4.89). The author of the *Kāśikā* also says : "अवधिर्मर्य्यादा । वचनग्रहणादभिविधिरपि गृह्यते ।"—The expression मर्य्यादावचन can be explained in two different ways so as to include अभिविधि also. As the *Nyāsa* explains : "यत्र आङो मर्यादायामभिविधौ च कार्य्यमिच्छति तत्र उभयोरपि ग्रहणं करोति यथा 'आङ् मर्यादाभिविध्योः' (II. I. 13) इत्यादि । इह तु मर्यादाग्रहणमेव कृतं नाभिविधिग्रहणम् । अतोऽभिविधौ

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनया संज्ञया न भवितव्यमिति कस्यचित् भ्रान्तिः स्यात्। अतस्तां निराकर्तुमाह—वचन-ग्रहणादित्यादि। वचनग्रहणे हि सति बहुव्रीहिर्लभ्यते। मर्य्यादेत्येतद् वचनं यत्र सूत्रे तन्मर्य्यादावचनम्। तत्रायमर्थो भवति। यत्र मर्य्यादाग्रहणमस्ति सूत्रे य आङ् स कर्मप्रवचनीयसंज्ञो भवति। तत् पुनः सूत्रम्—'आङ्मर्य्यादाभिविध्यो'-रित्येतत् (II. I. 13)। तत्र आङ्मर्यादाभिविध्योर्वर्तमान उपात्त इत्युभयत्रापि भवति। अन्ये त्वाहुः। मर्य्यादाविशेषो हि अभिविधिः। सैव हि मर्यादा यदा कार्य्येणाभिसम्बध्यते तदाभिविधिरित्युच्यते। यदा तु नाभिसम्बध्यते तदा मर्य्यादेति। तत्रेह वचनग्रहणात् विशेषो नाश्रीयते। तेन मर्य्यादा-वचनमात्रे उक्तिमात्रे भवति। अन्यथा हि मर्य्यादायामित्येवं वाच्यं स्यात्। किं वचनग्रहणेनेति ?" Haradatta in his *Padamañjarī* reproduces the same argument. As आङ् in the sense of मर्य्यादा and अभिविधि alone is taught here as कर्मप्रवचनीय, this excludes the indeclinable pariicle आङ् conveying the sense of ईषत् and having connexion with a क्रिया (क्रियायोग). As the *Kāsikā* states : "मर्य्यादावचने इति किम् ? ईषदर्थे क्रियायोगे च मा भूत्।"—on which the *Nyāsa* comments : "ईषदर्थे आकड़ार इति। क्रियायोगे समाहरतीति। पूर्वत्र संज्ञाया अभावात् पञ्चमी न भवति। इतरत्र 'गतिर्गतौ' (VIII. 1. 70) इति निघातो भवति। यस्तु वाक्यस्मरणयोराकारो वर्तते तस्याङित्त्वादिह ङकारोच्चारणादेव संज्ञाया अप्रसक्तिः।"—As regards distinction between the two particles आङ् and आ, the one with an indicatory ङ् and the other without it, *vide* the following *kārikā* cited in the *Mahābhāṣya* under I. 1. 14 :

"ईषदर्थे क्रियायोगे मर्य्यादाभिविधौ च यः।
एतमातं ङितं विद्याद् वाक्यस्मरणयोरङित्॥"

§ 598. पञ्चम्यपाङ्परिभिः—(II. 3. 10)

दीक्षितः॥ एतैः कर्मप्रवचनीयैर्योगे पञ्चमी स्यात्। अप हरेः, परि हरेः संसारः। परिरत्र वर्जने। लक्षणादौ तु हरिं परि। आ मुक्तेः संसारः। आ सकलाद् ब्रह्म।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Exposition

§ परिरत्र वर्जने....हरिं परि—When परि as a कर्मप्रवचनीय suggests the idea of लक्ष्यलक्षणभाव, it governs द्वितीया instead of पञ्चमी according to the general rule 'कर्मप्रवचनीययुक्ते द्वितीया' (II. 3. 8). For the idea of लक्ष्यलक्षणभाव suggested by परि *vide* the *sūtra*: 'लक्षणेत्थम्भूताख्यान—' (I. 4. 90). Cf. 'अपेन साहचर्यात् परेर्वर्जनार्थस्य ग्रहणम्। तेनेह न भवति—वृक्षं परि विद्योतते विद्युत्।"—*Kāśikā* on II. 3. 10. Consult the *Paribhāṣā*: 'सहचरितासहचरितयोः सहचरितस्यैव ग्रहणम्' (No. CIII) on this point.

§ 599. प्रतिः प्रतिनिधिप्रतिदानयोः—(I. 4. 92).

दीक्षितः॥ एतयोरर्थयोः प्रतिरुक्तसंज्ञः स्यात्।

Exposition

Kāśikā explains प्रतिनिधि and प्रतिदान as follows: 'मुख्यसदृशः प्रतिनिधिः। दत्तस्य प्रतिनिर्यातनम् प्रतिदानम्।'—Thus when प्रति indicates the idea of *imitation* (*similarity*) and *exchange* (as subsisting between the *debtor* and the *creditor*) it is regarded as a कर्मप्रवचनीय. Thus Viṭṭhala commenting upon the two examples says: "प्रद्युम्नः कृष्णात् प्रतीति। कृष्णो मुख्यः, तत्सदृशः प्रद्युम्नः, स कृष्णमनुकरोति। अत्र अनुकार्यानुकरणभावः सम्बन्धः प्रतिना द्योत्यते। तिलेभ्य इत्यादि। अत्र उत्तमर्णाधमर्णभावसम्बन्धः प्रतिना द्योत्यते। तिलान् गृहीत्वा माषान् ददाति इति यावत्॥"—°*Prasāda*.

§ 600. प्रतिनिधिप्रतिदाने च यस्मात्—(II. 3. 11)

दीक्षितः॥ अत्र कर्मप्रवचनीयैर्योगे पञ्चमी स्यात्। प्रद्युम्नः कृष्णात् प्रति। तिलेभ्यः प्रतियच्छति माषान्।

Exposition

The use of 'यस्मात्' in the fifth case-ending in the present *sūtra* indicates that in connexion with the words प्रतिनिधि and प्रतिदान the fifth-case-ending is used instead of षष्ठी. As Haradatta observes: 'यस्मादित्यनेनव सूत्रेण पञ्चमी'. But षष्ठी

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

is also found to be used in connexion with the above two words. Thus the *Bālamanoramā* says : "सूत्रे यस्मादिति षष्ठयर्थे पञ्चमी अस्मादेव निर्देशात्। 'कृष्णस्य प्रतिनिधिः' इति तु 'ज्ञापकसिद्धं न सर्वत्र' इति समाधेयम्।"—So also *Tattvabodhinī*. *Vide* also Pandit Śivadatta Śāstrin's note on this point.

§ 601. अकर्त्तर्यृणे पञ्चमी—(II. 3. 24)

दीक्षितः ।। कर्त्तृवर्जितं यदृणं हेतुभूतं ततः पञ्चमी स्यात् । शताद्बद्धः । अकर्त्तरि किम्—शतेन बन्धितः ।

Exposition

§ **यदृणं हेतुभूतम्**—(Dīkṣita) : The previous *sūtra*—viz. हेतौ (II. 3. 23), follows here. So Dīkṣita says : 'कर्तृवर्जितं यद् ऋणं हेतुभूतम्'. Vide *Kāśikā* : "हेतौ इति वर्त्तते। कर्तृवर्जितं यद् ऋणं हेतुस्ततः पञ्चमी विभक्तिर्भवति।' The पञ्चमी prescribed according to this rule overrules तृतीया according to 'हेतौ' (II. 3. 23). As the *Kāśikā* notes : 'तृतीयापवादो योगः।'

§ **अकर्त्तरि किम्? शतेन बन्धितः**—(Dīkṣita) In शतेन वन्धितः, शत is a ऋण and at the sametime हेतु (though a पारिभाषिक or शास्त्रीय one), but it is also a प्रयोजककर्तृ according to the rule 'तत्प्रयोजको हेतुश्च' (I. 4. 55). So the prohibition अकर्त्तरि applies and consequently there can be no **पञ्चमी**. Vide *Kāśikā* : 'अकर्त्तरीति किम्? शतेन वन्धितः। शतमृणं च भवति, प्रयोजकत्वञ्च कर्तृसंज्ञम्।"—which has been explained in the *Nyāsa* as follows : "शतेन बन्धित इति। वन्धेर्ण्यन्तस्य निष्ठायामेतद्रूपम्। शतमृणं च भवतीति। उत्तमर्णाय देयत्वात्। **प्रयोजकत्वात् कर्तृसंज्ञेति**। 'तत्प्रयोजको हेतुश्चे'-ति (I. 4. 55) चकारात् कर्तृसंज्ञाविधानात्। ननु लौकिको हेतुः पूर्वसूत्रे गृहीतः। स चेहानुवर्त्तत इति तत एव पञ्चमी विधीयते। न चात्र लौकिको हेतुः। किं तर्हि? पारिभाषिक इति प्राप्त्यभावादकर्तरीति प्रतिषेधोऽनर्थकः। नैतदस्ति। तत्र हि शास्त्रीय हेतौ तृतीया सिद्धैवेति लौकिकस्य हेतोर्ग्रहणम्। इह तु पञ्चमी विधीयते। न चात्रासौ शास्त्रीये हेतौ केनचित् सिध्यति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्वावपीह हेतू गृह्येते। अथवा शास्त्रीयस्यापि हेतोर्लौकिकं हेतुत्वमविरुद्धमेव। यो हि बन्धने प्रयुङ्क्ते स तत्साधनयोग्यो भवत्येवेति।''—As regards the distinction between लौकिक हेतु and शास्त्रीय हेतु *vide* our notes on हेतौ (II. 3. 23).

§ 602. विभाषा गुणेऽस्त्रियाम्—(II. 3. 25)

दीक्षितः॥ गुणे हेतावस्त्रीलिङ्गे पञ्चमी वा स्यात्—जाड्यात् जाड्येन वा बद्धः। गुणे किम्—धनेन कुलम्। अस्त्रियां किम्—बुद्ध्या मुक्तः। विभाषेति योगविभागात् अगुणे स्त्रियां च क्वचित्। धूमाद् अग्निमान्। नास्ति घटोऽनुपलब्धेः।

Exposition

By गुण is meant—(i) according to some the category of *quality* as defined in the *kārikā*: 'सत्त्वे निविशतेऽपैति पृथग्जातिषु दृश्यते। आधेयश्चाक्रियाजश्च सोऽसत्त्वप्रकृतिर्गुणः॥'—(*ii*) according to others anything that is *subordinate* (परतन्त्र) to something else, so that in this view धूम (smoke) is also a गुण as it is subordinate to वह्नि (fire). For these two views *vide* Haradatta's *Padamañjarī*: ''सत्त्वे निविशतेऽपैतीति लक्षितस्य गुणस्य ग्रहणम्, तदनुरूपत्वात् उदाहरणप्रत्युदाहरणयोरिति केचित्। अन्ये तु पर्वतो वह्निमान् धूमवत्त्वात् इत्यादौ अनेनैव पञ्चमीमिच्छन्त परतन्त्रमात्रस्य ग्रहणं वर्णयन्ति, यथा 'यस्य हि गुणस्य भावात्—' इति॥''—The author of the *Nyāsa* seems to subscribe to the second view as regards the connotation of the term गुण in the present *sūtra*. As he says: ''गुणशब्देन चात्र सम्बन्धिमात्रं परार्थरूपमापन्नमुच्यते। तेनाग्निरत्र धूमादित्यादि सिद्धं भवति।''

§ गुणे हेतौ (Dīkṣita): The rule हेतौ (II. 3. 23) follows here too.

§ गुणे किम्? धनेन कुलम् (Dīkṣita): 'धनं द्रव्यम्। न गुणः। द्रव्याश्रितो हि गुणो भवति। न द्रव्यमेव।'—*Nyāsa*.

§ विभाषेति योगविभागात् अगुणे स्त्रियां च क्वचित् (Dīkṣita): To defend पञ्चमी in some cases after words that do not connote

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

any गुण or that are feminine in gender, the commentators here *split up* the present *sūtra* into two parts—viz. 'विभाषा गुणे' and 'अस्त्रियाम्', the 'विभाषा' of the first part being construed with the second part also. This process of *splitting up a sūtra* according to exigencies which in grammatical terminology is known as योगविभाग, is to be resorted only for the *defence of desired usages* (इष्टसिद्ध्यर्थं) actually met with in the writings of the learned (शिष्ट). This is indicated by the use of the term क्वचित् (*occasionally*) by Dīkṣita in the *vṛtti*. As the *Bālamanoramā* notes: **अगुणे स्त्रियां च क्वचित्** इति । योगविभागस्य इष्टसिद्ध्यर्थत्वात् इति भावः ।"—*Vide* the *Nyāsa* : 'ननु चास्त्रियामित्युच्यते । तेन नास्तीह घटोऽनुपलब्धेरित्यादि न सिध्यति। नैतदस्ति। 'विभाषा गुणे' इति योगविभागः कर्त्तव्यः। तेन यत्रेष्यते तत्र योगविभागादिष्टसिद्धिरिति स्त्रियामपि भवत्येव।" Some think that the use of पञ्चमी after feminine words expressive of quality like अनुपलब्धि etc. is *indicated* by the *śloka-vārttika* —'बाहुलकं प्रकृतेस्तनुदृष्टेः' (under III. 3. 1), where पञ्चमी is used after तनुदृष्टि, though a feminine stem. Cf : **'स्त्रियां चेति** 'बाहुलकं प्रकृतेस्तनुदृष्टेः' इति वार्त्तिकनिर्देशोऽपीह ज्ञापकः ।'—*Tattvabodhinī*. Others again defend पञ्चमी in 'अनुलब्धेः' as a case of अपादाने पञ्चमी. Vide *Padamañjarī* : 'केचित्तु अपादाने पञ्चमीमेतामिच्छन्ति । तथाच नास्तीह घटोऽनुपलब्धित इति । 'अपादाने चाहीयरुहोः' इति तसिलपि भवति । **योगविभागवादिनां** तु आद्यादित्वात् तसिः ।।' —Similarly 'धूमादग्निमान्' is considered by some as a case of ल्यब्लोपे पञ्चमी and not of हेतौ पञ्चमी. *Vide* Viṭṭhala's °*Prasāda* : "अथवा धूमादिकमुपलभ्य अग्न्यादिकं जानातीति ल्यब्लोपे पञ्चमी ।'—For another mode of योगविभाग in the present *sūtra* consult also *Padamañjarī* on IV. 3. 81 ('हेतुमनुष्येभ्योऽन्यतरस्यां रूप्यः'). In चान्द्रसूत्र II. 1. 10 the word विभाषा is left out so as to avoid the complicated process of योगविभाग. For other arguments in defence of पञ्चमी in 'नास्ति घटोऽनुपलब्धेः' consult Śaraṇadeva's *Durghaṭavṛtti* on II. 3. 25.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

§ 603. पृथग्-विना-नानाभिस्तृतीयाऽन्यतरस्याम् —(II. 3. 32).

दीक्षितः ।। एभिर्योगे तृतीया स्यात् पञ्चमीद्वितीये च । अन्यतरस्यांग्रहणं समुच्चयार्थम् । पञ्चमीद्वितोये चानुवर्त्तेते । पृथग् रामेण रामाद् रामं वा । एवं विना, नाना ।

Exposition

The Sūtrakāra mentions पृथक्, विना and नाना, though having the same connotation, severally to exclude other synonyms like हिरुक् etc. in connexion with which षष्ठी is used instead of तृतीया, द्वितीया or पञ्चमी. As the *Nyāsa* points out : "इमे सर्वे पृथगर्थादयोऽसहायेऽर्थे वर्त्तन्ते । भेदेन उपादानन्तु पर्य्यायान्तरनिवृत्त्यर्थम् । इह तृतीयापञ्चम्यौ मा भूताम् । हिरुग् देवदत्तस्य । विष्वग् देवदत्तस्येति ।" So also *Tattvabodhinī* : "इह पृथगर्थैरिति सूत्रयितव्ये पर्य्ययित्रयोपादानं पर्य्यायान्तरनिवृत्त्यर्थम् । तेन हिरुग् देवदत्तस्य इत्यत्र नेत्याहुः ।"

§ **अन्यतरस्यांग्रहणं......चानुवर्त्तेते** (Dīkṣita)—The indeclinable 'अन्यतरस्याम्' in the present *sūtra* has the force of the particle च and conveys the idea of समुच्चय, though it usually conveys the sense of विकल्प. On this the *Tattvabodhinī* remarks : "निपतानामनेकार्थत्वात् इति भावः ।' Cf. : 'उच्चावचेषु अर्थेषु निपतन्तीति निपाताः'—Yāska's *Nirukta,* I. By the force of this 'अन्यतरस्याम्' द्वितीया and पञ्चमी associate themselves with तृतीया as taught in the present *sūtra* in connexion with पृथक् etc. So Dīkṣita says : "**पञ्चमी-द्वितीये चानुवर्त्तेते**'—पञ्चमी follows from the rule 'अपादाने पञ्चमी' (II. 3. 28) in the present *sūtra* leaving out the intermediate *sūtras* II. 3. 30-31 (viz. 'षष्ठ्यतसर्थप्रत्ययेन' and 'एनपा द्वितीया') by *the maxim of a frog's leap* (मण्डूकप्लुतिन्याय), which has been explained by us in our notes on 'अभिनिविशश्च' (I. 4. 47) and द्वितीया follows from the immediately proceding rule—viz. 'एनपा द्वितीया' (II. 3. 31.). It is to be noted that the

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Bhāṣyakāra does not admit the अनुवृत्ति of द्वितीया from the immediately preceding rule (viz. II. 3. 31), but only of पञ्चमी from अपादाने पञ्चमी (II.3.28), as is evident from his comments on the *vārttikas* § 1-3 on the present *sūtra* : 'अथवा मण्डूकगतयोऽधिकाराः। तद् यथा मण्डूका उत्प्लुत्योत्प्लुत्य गच्छन्ति तद्वदधिकाराः।' So also *Kāśikā* : "इह पञ्चमीग्रहणमनुवर्त्तते।' —on which the *Padamañjarī* may be consulted. In order to defend द्वितीया in connexion with पृथक् etc. in the usages of the learned, the author of the *Kāśikā* however suggests योगविभाग in the present *sūtra*, though it is not sanctioned by मुनित्रय (viz. Pāṇini, Kātyāyana and Patañjali). Cf. "पृथग्विनानानाभिरिति योगविभागो द्वितीयार्थः।

विना वातं विना वर्षं विद्युत्प्रपतनं विना।
विना हस्तिकृतान् दोषान् केनेमौ पातितौ द्रुमौ॥"

—on which Haradatta observes : "**योगविभागः कर्त्तव्य इति।** असत्यपि मुनित्रयवचने प्रयोगबाहुल्यात् एवं व्याख्यातम्॥" According to Bhāṣyakāra, however, who does neither admit अनुवृत्ति of द्वितीया from II. 3. 31 nor sanction योगविभाग of the present *sūtra*, द्वितीया in such usages as 'विना वातम्—' etc. as quoted above can be justified by the injunction 'ततोऽन्यत्रापि दृश्यते' of Kātyāyana as contained in the fourth *pāda* of the *śloka-vārttika* : 'उभसर्वतसोः कार्य्या—' already cited by Dīkṣita under the rule 'उपान्वध्याङ्वसः' (I. 4. 48). *Vide* Nāgojī Bhaṭṭa's note on this point : "परे तु द्वितीयासमुच्चयो न फलम्। 'विना वर्षं विना वातम्' इत्यादौ ऋतेशब्दयोग इव 'ततोऽन्यत्रापि दृश्यते' इत्यनेन द्वितीयासिद्धेः। अतएव भाष्ये द्वितीयासमुच्चयो नोक्तः।" —*Laghu-śabdendu-śekhara*, Vol I, pp. 697-98 (Kāshi Sanskrit Series).

§ 604 करणे च स्तोकाल्पकृच्छ्रकतिपयस्यासत्त्ववचनस्य —(II. 3. 33)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दीक्षितः ।। एभ्योऽद्रव्यवचनेभ्यः करणे तृतीयापञ्चम्यो स्तः । स्तोकेन स्तोकाद्वा मुक्तः । द्रव्ये तु स्तोकेन विषेण हतः ।

Exposition

'अन्यतरस्याम्' follows from II.3. 32 and पञ्चमी from II. 3. 28. So पञ्चमी *alternates* here with करणे तृतीया : 'पञ्चम्यत्र पक्षे विधीयते, तृतीया तु करणे इत्येव सिद्धा'—*Kāśikā*.

§ **एभ्यः अद्रव्यवचनेभ्यः** (Dīkṣita) :— अद्रव्यवचन is an equivalent of असत्त्ववचन, as सत्त्व means द्रव्य, स्तोक, अल्प, कृच्छ्र कतिपय etc. can be used either to mean an *attribute* (गुण) only, when they are called गुणवचन-s or they can be used *adjectively in apposition* with a word meaning *substance* (द्रव्य), when they are regarded as द्रव्यवचन-s. Thus *Kāśikā* explains असत्त्ववचनता in the following words : "यदा तु धर्ममात्रं करणतया विवक्ष्यते न द्रव्यं, तदा स्तोकादीनामसत्त्ववचनता"—on which the *Padamañjarī* comments as follows : 'यद्योगाद् द्रव्यं स्तोकादिव्यपदेशमासादयति ते गुणा धर्माः । उभयवचना ह्येते द्रव्यमाहुर्गुणं च शुक्लादिवत् ।' Cf. 'गुणे शुक्लादयः पुंसि गुणिलिङ्गास्तु तद्वति'—*Amara-kośa*. "यदा गुणवचनास्त-दाऽसत्त्ववचनतेत्यर्थः ।"—See also *Nyāsa* on this point. Viṭṭhala in his °*Prasāda* reproduces *verbatim* the words of *Nyāsa*.

§ **द्रव्ये तु स्तोकेन विषेण हतः**— (Dīkṣita)—Here स्तोक means not the attribute of स्तोकत्व (i. e., अल्पत्व), but the substance (viz. विष) qualified by the attribute of स्तोकत्व. So it is here used as द्रव्यवचन and not गुणवचन and as such करणे तृतीया alone is admitted and not पञ्चमी according to the present rule.

Now, why 'करणे' ? To this the *Kāśikā* says : 'करणे इति किम् ? क्रियाविशेषणे कर्मणि मा भूत् । स्तोकं मुञ्चति ।'—which has been explained in the *Nyāsa* as follows : "क्रियाविशेषणे मा भूदिति । क्रियायाः साध्यत्वात् कर्मत्वम् । तद्विशेषणमपि कर्म भवति । तच्च असत्त्वं भवति । क्रियैव हि तावत् द्रव्यं न भवति । कुतः पुनस्त-द्विशेषणं द्रव्यं भविष्यति ?" *See* also *Padamañjarī* on this point.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

§ 605. दूरान्तिकार्थेभ्यो द्वितीया च—(II. 3. 35)

दीक्षितः ।। एभ्यो द्वितीया स्यात्, चात् पञ्चमी-तृतीये च । प्रातिपदिकार्थमात्रे विधिरयम् । ग्रामस्य दूरं दूराद् दूरेण वा । अन्तिकम् अन्तिकाद् अन्तिकेन वा । असत्त्ववचनस्येत्यनुवृत्तेर्नेह —दूरः पन्थाः ।

Exposition

§ **एभ्यो द्वितीया स्यात्, चात् पञ्चमी-तृतीये च** (Dīkṣita)—पञ्चमी follows from अपादाने पञ्चमी (II. 3. 28) and तृतीया from "पृथग्विना—"(II. 3. 32) by the force of the indeclinable particle च in the *sūtra*. It is to be noted, however, that षष्ठी though taught in the immediately preceding *sūtra*—viz. "दूरान्तिकार्थैः षष्ठ्यन्यतरस्याम्" does not follow in the present *sūtra*. Cf. "अत्र दूरान्तिकाथः षष्ठ्यन्यतरस्याम्" (II. 3. 34) इत्यतः समुच्चयार्थकान्यतरस्यांग्रहणानुवृत्त्यैव अर्थाधिकारात् पञ्चम्याः सिद्धौ चकारो व्यवहिततृतीयासमुच्चयार्थो व्याख्यानादित्याह—**चादिति**" ।—Nāgojī Bhaṭṭa's *Laghu-śabdendu-śekhara*.

§ **प्रातिपदिकार्थमात्रे विधिरयम्** (Dīkṣita)—This is arrived at by interpretation (i. e. व्याख्यान). As Nāgojī observes : "व्याख्यानादिति भावः ।"—*Laghuśabdendu°*. But Haradatta gives the reason as—"अर्थान्तरस्यानिर्देशात्—इति भावः ।"—पञ्चमी, द्वितीया and तृतीया are used after दूरार्थक and अन्तिकार्थक words in the sense of प्रातिपदिकार्थ, *only when* they are used *attributively* (i. e as गुणवचन or असत्त्ववचन, which follows from II. 3. 33—'करणे च–') but when they are used as द्रव्यवचन or *adjective qualifying a substance* they can take any case-ending in conformity with the case-ending of the substance qualified. So the *Kāśikā* states : "प्रातिपदिकार्थे विधानम् । असत्त्ववचनग्रहणं चानुवर्त्तते । सत्त्व-शब्देभ्यो यथायथं विभक्तयो भवन्ति—दूरः पन्थाः, दूराय पथे देहि, दूरस्य पथः स्वम्"—on which Haradatta comments : "ननु अनिर्द्देशेऽपि अर्थान्तरस्य शेषविषये पूर्वविभक्तिविषय च विधानमेतद् उक्तम् । प्रथमा-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विषये तु परत्वात् सैव प्राप्नोति। नैष दोषः। उत्तरत्रापि एतदनुवर्त्तते। तेन उत्तरविभक्तिविषयेऽपि सर्वत्र यथाभिधानं भवति। तथा च "दूरादावसथात् मूत्रम्—" इत्यधिकरणेऽपि भवति। आवसथस्य दूरे इत्यर्थः। प्रातिपदिकार्थे विधानम् इत्येतत्तु उदाहृतविषयं द्रष्टव्यम्। तथा च सत्त्ववचनेभ्यो यथायथं विभक्तयो भवन्ति—इति वक्ष्यति। प्रातिपदिकार्थ एव तु विधाने यथायथम् इत्यनुपपन्नं प्रथमैव भवतीति वाच्यं स्यात्।"—*Padamañjarī*. So also Bhaṭṭoji Dikṣita in his *Śabda-kaustubha* : "उत्तरत्रापि एतदनुवृत्त्या तत्तद्विषयेऽपि द्वितीयादयः स्युः। तथा चाधिकरणेऽपि प्रयुज्यते—"दूरादावसथात् मूत्र-"मिति। आवसथस्य दूरे इत्यर्थः।"

The full verse is as follows :—

"दूरादावसथान्मूत्रं दूरात् पादावसेचनम्।
दूराच्च भाव्यं दस्युभ्यो दूराच्च कुपिताद् गुरोः॥"

—cited in the *Bhāṣya* under the present *sūtra*.

§ 606. षष्ठी शेषे—(II 3. 50)

दीक्षितः॥ कारक-प्रातिपदिकार्थव्यतिरिक्तः स्वस्वामिभावादि-सम्बन्धः शेषः। तत्र षष्ठी स्यात्। राज्ञः पुरुषः। कर्मादीनामपि सम्बन्धमात्रविवक्षायां षष्ठ्येव। सतां गतम्। सर्पिषो जानीते। मातुः स्मरति। एधोदकस्योपस्कुरुते। भजे शम्भोश्चरणयोः। फलानां तृप्तः।

Exposition

§ 'कारक.........शेषः'—Dīkṣita here explains the significance of the term शेष. This is based upon the following *Kāśikā* text : "कर्मादिभ्योऽन्यः प्रातिपदिकार्थव्यतिरिक्तः स्वस्वामिसम्बन्धादिः शेषः।"—In the *Bhāṣya* there are two explanations of the word शेष—viz. "शेष इत्युच्यते। कः शेषो नाम। कर्मादिभ्यो येऽन्येऽर्थाः स शेषः।.........एवं तर्हि कर्मादीनामविवक्षा शेषः।"—the second interpretation (viz. कर्मादीनामविवक्षा शेषः) being finally accepted by the Bhāṣyakāra and his followers like Bhartṛhari etc. In every instance of *relation* like

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वस्वामिभाव, जन्यजनकभाव, आधाराधेयभाव, अवयवावयविभाव etc. कर्मत्व, करणत्व etc. are implicitly present. But when कर्मत्व, करणत्व etc. though basically present are not intended to be expressed as such, the sixth case-ending is used instead of द्वितीया, तृतीया etc. that have been already taught in the previous aphorism. Thus while refuting the first of the two interpretations alluded to in the *Bhāṣya*-text cited above, the Bhāṣyakāra observes : "कर्मादिभ्यो येऽन्येऽर्थाः स शेषः। यद्येवं, शेषो न प्रकल्पते। नहि कर्मादिभ्योऽन्येऽर्थाः सन्ति। इह तावद्राज्ञः पुरुषः इति राजा कर्त्ता पुरुषः सम्प्रदानम्। वृक्षस्य शाखा—इति वृक्षः शाखाया अधिकरणम्। तथा यदेतत् स्वं नाम चतुर्भिरेतत् प्रकारैर्भवति—क्रयणादपहरणात् याच्ञाया विनिमयादिति। अत्र च सर्वत्र कर्मादयः सन्ति॥"—By आदि (etc.) in 'स्वस्वामिभावादि' other relations like अवयवावयविभाव etc. are intended. Thus in the *Bhāṣya* on I. 1. 40. (षष्ठी स्थानेयोगा) Patañjali says : "एकशतं षष्ठ्यर्थाः"—i. e. the sixth case-ending can express a hundred relations.

§ राज्ञः पुरुषः—This is an illustration of स्वस्वामिभाव relation. Similarly 'पशोः पादः' 'पितुः पुत्रः' are cited in the *Kāśikā* as examples of अवयवावयविभाव and जन्यजनकभाव relation respectively.

§ कर्मादीनामपि सम्बन्धमात्रविवक्षायां षष्ठ्येव—(Dikṣita) :

We have already referred to this interpretation of शेष as कर्मादीनामविवक्षा. When कर्मत्व, करणत्व etc. are not intended to be expressed *specifically* as कर्मत्व, करणत्व etc. but merely as सम्बन्ध in general (सम्बन्ध-सामान्य), the sixth case-ending is used instead of specific case-endings like द्वितीया etc. This is the case whether the verb expressing the *action* (क्रिया), which is at the root of कर्मत्व etc., be explicitly *stated* (श्रुत) or *not* (अश्रुत). Thus Bhartṛhari says :

"सम्बन्धः कारकेभ्योऽन्यः क्रियाकारकपूर्वकः।
श्रुतायामश्रुतायां वा क्रियायां सोऽभिधीयते॥"

—*Vākyapadīya*, III. 7. 156

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Cf : "संबन्धः कारकेभ्योऽन्यः—" इत्यनेन सम्बन्धस्य क्रियाकारकभावमूलकत्वमभ्यधायि भर्तृहरिभिः। सर्वत्रैव हि सम्बन्धस्तन्मूलकः। राज्ञः पुरुष इत्यत्र स्वस्वामिभावसम्बन्धः क्रियाकारकभावपूर्वकः। यतः 'राजा पुरुषाय द्रव्यं ददाति ततोऽसौ पुरुषस्य स्वामी भवति इति भाष्यादौ स्पष्टम्। क्रिया हि सिद्धस्वभावानां द्रव्यानां क्रियां विना परस्परसम्बन्धमभजतां निःश्रयणीव सम्बन्धं करोति इति स्पष्टं भाष्य-कैयटादौ। मातुः स्मरतीत्यादौ क्रिया श्रुता। राज्ञः पुरुष इत्यादौ तु अश्रुता दानादिक्रियाऽनुमीयते इत्याहुः॥"—*Kāsikā* comm. on *Vaiyākaraṇa-bhūṣaṇa*, p. 428 (*Bombay Sans. Series*. Edn.). Of the instances cited, सतां गतम् and फलानां तृप्तः are examples of सम्बन्धमात्रविवक्षा, where the क्रिया is not directly mentioned (अश्रुतक्रिया), while in the other examples the क्रिया is directly stated (श्रुत क्रिया).

Now, it might be asked : Why षष्ठी after राजन् only and not after पुरुष in राज्ञः पुरुषः since राजन् and पुरुष are both equally regarded as the *relata* of the relation known as स्वस्वामिभाव ? On this the *Nyāsa* has the following note : "सम्बन्धश्च यद्यपि द्विष्ठः, तथापि तस्य एकत्वात् एकत एव सम्बन्धिनः उत्पद्यमानया षष्ठ्या विभक्त्याऽभिहितत्वात् द्वितीयसम्बन्धिनः षष्ठी न भवति। एकस्मात् उत्पद्यमानापि षष्ठी विशेषणादेव भवति। न विशेष्यात्। विशेष्यात्तु प्रथमैव भवति। यस्मात् शेषशब्दोऽयं यथा प्रकृतादन्यविशेषणमाचष्टे, तथा परार्थमपि। एवं हि अभियुक्ताः पुरुषा उपदिशन्ति 'शेषः परार्थ' इति। राज्ञः पुरुष इति स्वस्वामिकसम्बन्धस्य उदाहरणम्। अत्र पुरुषस्य प्राधान्यं विशेष्यत्वात्। राज्ञोऽप्राधान्यम् विशेषणत्वात्। विशेषणस्य परार्थत्वात् शेषभाव इति ततः षष्ठी भवति। यदा तु द्वावपि विशेषणभूतौ तृतीये सम्बन्धिनि अपेक्षितौ भवतः, तदा द्वाभ्यामपि षष्ठी भवति। राज्ञः पुरुषस्य गृहमिति।"—p. 425. So also with the other relations. Thus Bhartṛhari says :

"द्विष्टोऽप्यसौ परार्थत्वाद् गुणेषु व्यतिरिच्यते।
तत्राभिधीयमानः सन् प्रधानेऽप्युपयुज्यते।"

—*Vākyapadīya*, III. 7. 157

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

See also *Mahābhāṣya*, Vol. I, p. 464, ll. 3—27 (Kielhorn's Edition).

§ 607. **षष्ठी हेतुप्रयोगे**—(II.3.26)

दीक्षितः ।। हेतुशब्दप्रयोगे हेतौ द्योत्ये षष्ठी स्यात् । अन्नस्य हेतोर्वसति ।

Exposition

§ **हेतुशब्दप्रयोगे** (Dīkṣita)—This is the explanation of हेतुप्रयोगे. This does not, however exclude such synonyms of हेतु as निमित्त, कारण etc. that also govern the sixth case-ending. Thus commenting on the *Kāśikā* (हेतुशब्दस्य प्रयोगे) Haradatta says : "हेतुशब्दस्येति । प्रयोगस्य शब्दधर्मत्वात् एवमुक्तम्, न तु अनेन अर्थग्रहणं व्यावर्त्यते । पर्यायप्रयोगेऽपि निमित्तकारणहेतुषु इति वक्ष्यमाणेन षष्ठ्या इष्टत्वात् । हेतुशब्दस्य प्रयोगे सति हेतुहेतुमद्भावलक्षणस्यैव सम्बन्धविशेषस्य नियमेन प्रतीतौ हेतौ इति तृतीयापवादो योगः ।"—*Padamañjarī*. But for a contrary view *vide Nyāsa*.

§ **हेतौ द्योत्ये**—This is arrived at on account of the अनुवृत्ति of the *sūtra* हेतौ (II, 3. 23). The Nyāsakāra observes that the present *sūtra* is enjoined merely for the sake of clarity, as its end can be achieved by the rule 'षष्ठी शेषे' (II. 3. 50). *Vide* : "किमर्थं पुनरिदमुच्यते ? यावता शेषविवक्षयैव अत्र अध्ययनादिभ्यः षष्ठी भविष्यति । तत्सामानाधिकरण्याच्च हेतुशब्दादपि ।—एवं तर्हि सैव शेषविवक्षाऽस्मिन् विषये वचनेन आख्यायते, मन्दधियामनुग्रहाय"—*Nyāsa*.

§ 608. **सर्वनाम्नस्तृतीया च**—(II. 3. 27)

दीक्षितः ।। सर्वनाम्नो हेतुशब्दस्य च प्रयोगे हेतौ द्योत्ये तृतीया स्यात् षष्ठी च । केन हेतुना वसति, कस्य हेतोः । 'निमित्तपर्यायप्रयोगे सर्वासां प्रायदर्शनम्' (वा° १४७३) । किं निमित्तं वसति, केन निमित्तेन, कस्मै निमित्तायेत्यादि । एवं किं कारणम्, को हेतुः, किं प्रयोजनमित्यादि । प्रायग्रहणादसर्व-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नाम्नः प्रथमाद्वितीये न स्तः। ज्ञानेन निमित्तेन हरिः सेव्यः। ज्ञानाय निमित्तायेत्यादि।

Exposition

§ षष्ठी follows here from the previous सूत्र (viz. 'षष्ठी हेतु-प्रयोगे'—II. 3. 26). So also 'हेतुप्रयोगे'. That is why Dīkṣita says : "सर्वनाम्नो हेतुशब्दस्य च प्रयोगे।"

§ **निमित्तपर्यायप्रयोगे सर्वासां प्रायदर्शनम्**—This *vārttika* in a slightly modified form (viz. 'निमित्तकारणहेतुषु—') is read originally in the *Mahābhāṣya* under the rule 'हेतौ' (II. 3. 23), though the author of the *Kāśikā* reads it under the present *sūtra*, so that Dīkṣita is following here the Vṛttikāra. As it is originally read under हेतौ, the injunction of the Vārttika-kāra is equally applicable to सर्वनामन् and असर्वनामन् as well, though Bhāṣya-kāra cites सर्वनामन्-s solely as examples. This has been pointed out by Haradatta in his *Padamañjarī* under II. 3.27 : "निमित्तकारणहेतुषु यद्यप्यस्मिन् सूत्रे इदं वृत्तिकारेण पठितं भाष्यकारेण तु 'हेतौ' इत्यत्र पठितत्वात् असर्वनाम्नोऽप्येतत् विभक्तिविधानं गम्यते। तत्र च प्रायग्रहणात् एव असर्वनाम्नः प्रथमा-द्वितीये न भवतः, अन्यास्तु यथा-दर्शनं भवन्ति। अन्नेन कारणेन वसति, अन्नाय कारणाय वसति, अन्नात् कारणात्, अन्नस्य कारणस्य, अन्ने कारणे इति।"—So also Bhaṭṭoji Dīkṣita in his *Śabda-kaustubha*.

§ एवं किं कारणम्, को हेतुः, किं प्रयोजनम् इत्यादि—

This is on account of the use of the term पर्य्याय (*synonym*) in the *vārttika*, though, it should be noted, as we have already pointed out, there is mention of निमित्त, कारण and हेतु in the original *vārttika*. The author of the *Kāśikā*, while recording the *vārttika* in its original form, observes : "एवं कारणहेत्वोरपि उदाहार्य्यम्। अर्थग्रहणं चैतत्। पर्य्यायोपादानं तु स्वरूपविधिर्मा विज्ञायीति तेनेहापि भवति। किं प्रयोजनं वसति.........इत्यादि॥"—And Haradatta, commenting on the above *Kāśikā*-text, notes :

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"पर्य्यायोपादानं तु—इति । ननु विपरीतमिदं स्वरूपविधौ पर्य्यायोपादानं कर्त्तव्यम् अर्थग्रहणे तु न कर्त्तव्यमिति । किं च अर्थग्रहणे सति एकशेष-प्रसङ्गः, विरूपाणामपि समानार्थानामेकशेषवचनात् ॥ एवं मन्यते—यथा आकृतिगणेषु केचिदुपलक्षणार्थं पठ्यन्ते एवमिहापि स्वरूपपरा एव निमित्तादि-शब्दा उपलक्षणार्थाः एवमर्थानां शब्दानामिति ।"—It is plausible that Bhaṭṭoji Dīkṣita introduced this slight amendation into the original *vārttika* on the basis of the ovservations of the *Kāśikā*. In the *Śabda-kaustubha* he says : "वार्त्तिके पर्य्यायोपादानं प्रपञ्चार्थम् । प्रयोजनादिशब्दानुरोधेनार्थपरत्वस्वीकारात् ।"—Rāmacandra in his *Prakriyā-kaumudī*, however, erroneously records the present *vārttika*, in a distorted form, as an *iṣṭi* (i. e. Bhāṣya-kāra's ruling) : "सर्वनाम-प्रयोगे निमित्तकारणहेत्वर्थेषु सर्वासामिष्टिः". The *vārttika* renders the two *sūtras*—"षष्ठी हेतुप्रयोगे" and "सर्व-नाम्नस्तृतीया च", as useless and superfluous. See *Bālamanoramā*.

§ ६०९. षष्ठ्यतसर्थप्रत्ययेन—(II.3.30)

दीक्षितः ॥ एतद्योगे षष्ठी स्यात् । '— दिक्शब्दे'ति पञ्चम्या अपवादः । ग्रामस्य दक्षिणतः । पुरः पुरस्ताद् । उपरि उपरिष्टात् ।

Exposition

§ On the expression 'अतसर्थप्रत्यय' the *Tattvabodhinī* has the following note : "'दक्षिणोत्तराभ्यामतसुच्' (V. 3. 28) इत्यस्य योऽर्थः दिग्देशकालरूपः सोऽर्थो यस्य प्रत्ययस्य सोऽतसर्थप्रत्ययः, अस्तातिप्रभृतयः पञ्च, तदन्तेन योगे इत्यर्थः । अतसुचोऽस्तात्यनन्तरत्वेऽपि लाघवानुरोधेन अस्तात्यर्थेति नोक्तमित्याहुः ।"

§ '—दिक्शब्द—' इति पञ्चम्या अपवादः—(Dīkṣita)

This is an exception to पञ्चमी as enjoined by II. 3. 29. in connexion with a दिक्शब्द. As the *Nyāsa* says : "अतसर्थाः प्रत्यया दिक्शब्देभ्यः स्वार्थ एव भवन्तीति तदन्तस्य दिक्छब्दत्वात् पूर्वेण पञ्चम्यां प्राप्तायां वचनमिदम् ।"—Haradatta in his *Padamañjarī* observes that there is no need of mentioning the term प्रत्यय in

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

the present *sūtra*, as even without it अतसर्थ itself would have denoted अतसर्थ suffixes by the maxim : "प्रत्ययाप्रत्यययोः प्रत्ययस्य ग्रहणम्" (*Paribhāṣā* CII : Kielhorn's Edn.) As he says : "अत्र तस्यतेर्नञ्पूर्वस्य क्विपि अतस् इति रूपसम्भवेऽपि प्रत्यक्षश्रुतत्वात् प्रत्ययाप्रत्ययपरिभाषया प्रत्ययस्यैव ग्रहणमिति सिद्धम्, नार्थः प्रत्ययग्रहणेन ।" —But Kaiyaṭa and others note that प्रत्यय has been distinctly mentioned in the *sūtra* in order to exclude षष्ठी in connexion with such words as प्राक् etc., after which the अतसर्थ suffix is elided according to the rule 'अञ्चेर्लुक्' (V. 3. 30). *Vide* : "प्रत्ययग्रहणं किम् ? इह मा भूत्—प्राग् ग्रामात्, प्रत्यग् ग्रामात् ॥ कृतेऽपि प्रत्ययग्रहणे कुतो नेति चेत् । अत्राहुः कैयटादयः—प्रत्ययग्रहणमधिकं क्रियमाणं श्रूयमाणप्रत्ययग्रहणार्थं विज्ञास्यते—इति लुप्ते अस्तातौ षष्ठ्यभावः । 'अन्यारात्—' इत्यत्र अञ्चूत्तरपदस्यापीदं प्रयोजनमुक्तम् । तत्रान्यतरत् शक्यमवक्तुमेकप्रयोजनत्वात् इति प्रत्ययग्रहणं चिन्त्यप्रयोजनमिति तु मनोरमायां स्थितम् ॥" —*Tattva-bodhinī*. In the *Bhāṣya*, however, पञ्चमी is used instead of षष्ठी according to this rule, in connexion with पश्चात् which ends in an अतसर्थ suffix (V. 3. 32.) : "ततः पश्चात् स्रं स्यते ध्वंस्यते च' इति भाष्यप्रयोगात् पश्चाच्छब्दयोगे तु पञ्चम्यपि साधुः ।" —*Tāttva-bodhinī*. Nāgeśa, in his *Laghu-śabdendu-śekhara*, takes ततः in the *Bhāṣya*-usage, cited above, as a षष्ठ्यन्त word and not a पञ्चम्यन्त one, so that it is not at all an exception, though it appears to be so at first sight. Cf : " 'ततः पश्चात्—' इत्यत्र तु सार्वविभक्तिकः षष्ठ्यन्तात्तसिः ।"

§ 610. एनपा द्वितीया—(II. 3. 31)

दीक्षितः ॥ एनबन्तेन योगे द्वितीया स्यात् । एनपेति योगविभागात् षष्ठ्यपि । दक्षिणेन ग्रामं ग्रामस्य वा । एमुत्तरेण ।

Exposition

The suffix '-एनप्' is taught by the *sūtra* V. 3. 35 ("एनबन्यतरस्यामदूरेऽपञ्चम्याः") after the stems उत्तर, अधर and दक्षिण, in the sense of the suffix अस्ताति as taught in V. 3. 27.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

§ **एनपा इति योगविभागात् षष्ठ्यपि** (Dikṣita)—The योगविभाग in the present *sūtra* for the defence of षष्ठी in connexion with एनबन्त words is taught in the *Kāśikā-vṛtti*, but not in the *Bhāṣya*. Cf : "पूर्वेण षष्ठ्यां प्राप्तायामिदं वचनम् । दक्षिणेन ग्रामम् । उत्तरेण ग्रामम् । षष्ठ्यपीष्यते । दक्षिणेन ग्रामस्य । उत्तरेण ग्रामस्य । तदर्थं योगविभागः कर्तव्यः ।" —*Kaśikā*, on which the *Nyāsa* comments: "तदर्थो योगविभागः कर्त्तव्यः । एनपा योगे षष्ठी यथा स्यात् । अन्यथा हि द्वितीययासौ बाध्येत । ततो द्वितीयेति द्वितीयो योगः । अत्र चैनपेति वर्त्तते ।"—As regards the Bhāṣyakāra's view, the following extract from Nageśa's *Laghu-śabdendu-śekhara* may be consulted : "षष्ठ्यपीति । स्पष्ट चेदं वृत्तौ । भाष्ये तु न दृश्यते । विपरीतं "षष्ठ्यतसर्थ—" इति सूत्रात् पूर्वम् "एनपा" (II. 3. 31) इत्यस्य पाठ इति लभ्यते इति 'पृथग् विना-नाना—' इति सूत्रे उक्तम् ।"—Thus Nāgeśa and some other scholiasts think that in the *sūtra-pāṭha* as adopted by the Bhāṣyakāra, the present *sūtra* was read *before* 'षष्ठ्यतसर्थप्रत्ययेन' and *not after* it, as can be inferred from the sequence of the illustrations of these two *sūtras* given by the Bhāṣyakāra in his gloss on the *vārtika* ('अधिकारे हि द्वितीयाषष्ठीविषये प्रतिषेधः') under II. 3. 32, so that in this view, there is no scope for अनुवृत्ति of षष्ठी from the preceding rule. Cf. Nāgeśa's *Laghu-śabdendu-śekhara* on "पृथग्विना—' (II. 3. 32) : "पञ्चम्या अधिकारे द्वितीयाषष्ठीविषये प्रतिषेधो वक्तव्यः । दक्षिणेन ग्रामं दक्षिणतो ग्रामस्य" इति प्रकृतसूत्रस्थभाष्येण "एनपा द्वितीया" इति सूत्रं "षष्ठ्यतसर्थ—"इत्यतः प्राग् इति सूचितम् ।।" For a contrary view-point *vide* Pt. Śivadatta's note on the present *sūtra* in his edition of the *Siddhānta-kaumudī* (Veṅkaṭeśvara Press Edn.) The use of पञ्चमी in connexion with एनप् in certain usages is incorrect. As Haradatta observes : "तत्रागारं धनपतिगृहादुत्तरेणास्मदीयम्", 'स्त्र्यधिकारात् परेण वासरूपविधिर्नाऽवश्यं भवति, 'ततः परेण नायमनुवर्त्तते'—इत्यादीनां . चिन्त्यं साधुत्वम्"—*Padamañjarī*. The following note of Bhaṭṭoji Dikṣita in his *Śabda-kustubha* may also be consulted on this point :

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"तत्रागारं धनपतिगृहादुत्तरेणास्मदीयम्", "स्त्र्यधिकारात् परेण वासरूपविधिर्नाऽवश्यं भवती'त्यादि" ?—एनबपि परशब्दात् पाक्षिकः। यदा तद्विधौ "उत्तराधरदक्षिणात्" (V. 3. 34) इति नानुवर्त्तते। सत्यम्। अतएव चिन्त्यमेवेदमिति हरदत्तः। उत्तरेणेति तृतीयैकवचनान्तं तोरणेनेत्यनेन समानाधिकरणमित्यन्ये। अपरे तु धनपतिगृहानिति शसन्तं पठन्ति ।।"—Vol. II, p. 233(*Benareș Sans. Series*).

§ 611. दूरान्तिकार्थैः षष्ठ्यन्यतरस्याम्—(II. 3. 34)

दीक्षितः ।। एतैर्योगे षष्ठी स्यात् पञ्चमी च। दूरं निकटं ग्रामस्य ग्रामात् वा।

Exposition

This is to be noted that the purpose of insertion of 'अन्यतरस्याम्' in the present *sūtra* is to bar out other case-endings besides पञ्चमी in connection with words signifying the sense of *far* or *near*. So the *Kāśikā* says : "अन्यतरस्यांग्रहणं पञ्चम्यर्थम्। इतरथा हि तृतीया पक्षे स्यात्"—on which the *Nyāsa* has the following note : "ननु चान्यतरस्यांग्रहणे प्रकृते (*vide* II. 3. 32) पुनरन्यतरस्यांग्रहणं किमर्थमित्याह—अन्यतरस्यांग्रहणमित्यादि। यदीहान्यतरस्यांग्रहणं न क्रियेत, तदा पक्षे तृतीया स्यात्। तस्य एव अनन्तरसूत्रे श्रुतत्वात्। पुनरन्यतरस्यांग्रहणं क्रियमाणं पञ्चमीविधानार्थं विज्ञायते। तथाहि तृतीयाविकल्पार्थं तावदेतन्न भवति। तृतीयाविकल्पो हि पूर्वकेणान्यतरस्यांग्रहणेन सिध्यति। न चान्या काचिद् विभक्तिः प्रकृता। किं तर्हि ? पञ्चमी। तस्मात् पञ्चमीविकल्पार्थमेतद् विज्ञायते ।।"—Consult also Haradatta's *Padamañjarī* on II. 3.34 on this point.

§ 612. ज्ञोऽविदर्थस्य करणे—(II. 3. 51)

दीक्षितः ।। जानातेरज्ञानार्थस्य करणे शेषत्वेन विवक्षिते षष्ठी स्यात्। सर्पिषो ज्ञानम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Exposition

Here the root √विद् in 'अविदर्थस्य' is to be taken as लुग्-विकरण meaning 'to know'. Thus Haradatta points out "लुग्-विकरणश्च विदिगृ ह्यते। तदथ एव जानातेर्वृत्तिसम्भवात्।"—The *Nyāsa* is more explicit on this point: "यद्यपि बहवो विदयः सन्ति तथापि यस्याथ जानातेर्वृत्तिः सम्भवति तस्यैव विदेः प्रतिषेधकरणं युक्तम्। 'विद ज्ञाने' इत्यस्यवार्थे जानातेर्वृत्तिः सम्भवति। तस्मादविदर्थस्येत्यनेन ज्ञानार्थस्यैव प्रतिषेधो विज्ञायते इत्याह—अज्ञानार्थस्येत्यादि ॥"

In the instances "सर्पिषो जानीते, मधुनो जानीते" the root √ज्ञा does not mean 'to know', but conveys the idea of 'प्रवृत्ति' based upon knowledge. So its करण—viz. सर्पिः, मधु etc. takes the sixth case-ending instead of तृतीया, when it is not intended as करण as such, but as शेष. Thus the *Kāśikā* observes:

"सर्पिषो जानीते। मधुनो जानीते। सर्पिषा करणेन प्रवर्तते—इत्यर्थः। प्रवृत्तिवचनो जानातिरविदर्थः ॥" In this case the root √ज्ञा is used in the *ātmanepada* according to the rule 'अकर्मकाच्च' (I. 3. 45): " 'अपह्नवे ज्ञः' (I.3.4) इत्यनुवर्त्तमाने 'अकर्मकाच्च' (I. 3. 45) इत्यात्मनेपदम्।......सर्पिषा करणभूतेन प्रवर्त्तते इत्यर्थः। यस्य प्रियतमं सर्पिः तस्य प्रवृत्तिं प्रति सर्पिषः करणभूतत्वात्।"

The Kāśikākāra also interprets the expression "अविदर्थ" as "मिथ्याज्ञानवचन" (i. e. meaning 'false knowledge'). Interpreting the idea of falsehood (of knowledge) in the instances cited above, he observes: "अथवा मिथ्याज्ञानवचनः। सर्पिषि रक्तः प्रतिहतो वा चित्तभ्रान्त्या तदात्मना सर्वमेव ग्राह्यं प्रतिपद्यते। मिथ्याज्ञानमज्ञानमेव।"—which has been clarified by Haradatta in the following text of the *Padamañjarī*: "सर्पिषि रक्त इति। रागो मिथ्य ज्ञानस्य हेतुः, द्रौपद्यां रक्तो हि कीचको रहसि भीमसेनमालिङ्ग्य अवोचत्—अहो उत्तमाङ्गनानामीदृशी सुस्पर्शतेति। प्रतिहतो वेति। प्रतिघातो द्वेषस्य हेतुः, द्वेषश्च मिथ्याज्ञानस्य हेतुः। यो हि परिहासशीलेन केनचित् पूयादिकमशुचि द्रव्यं निर्दिश्य उक्तः—सर्पिरेतत् पिबेति स तत्र प्रतिहतः तत आरभ्य सर्पिः द्वेष्टि। द्विषतश्चातस्मिन्नपि तज्ज्ञानमुत्पद्यते।"

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

If this intepretation of अविदर्थ as मिथ्याज्ञानार्थ is accepted it becomes difficult to justify *ātmanepada* in जानीते, for it is in this case सकर्मक (उदकं सर्पिषो जानीते) and as such cannot be brought within the purview of the rule 'अकर्मकाच्च' (I. 3. 45). Thus *Padamañjārī* notes : "अस्मिन् पक्षे उदकादिकर्मणा सकर्मकत्वात् "अकर्मकाच्च" इत्यात्मनेपदानुपपत्तेः परस्मैपदमुदाहार्य्यं मन्यन्ते ।"

Bhaṭṭoji Dīkṣita cites 'सर्पिषो ज्ञानम्' instead of 'सर्पिषो जानीते' in order to show that the word taking the sixth case-ending according to this rule is not compounded. Thus the compound form सर्पिर्ज्ञानम् is not admissible. The eight rules begining with "ज्ञोऽविदर्थस्य करणे" and ending with "दिवस्तदर्थस्य" (i.e., P. II. 3. 51—II. 3. 58) are instances of प्रतिपदविधाना षष्ठी and no षष्ठीतत्पुरुष-compound is admissible in these cases. Kātyāyana distinctly rules out षष्ठी-compound in these cases in a separate *vārttika* read under II. 2. 10 ('न निर्द्धारणे')—viz. "प्रतिपदविधाना च षष्ठी न समस्यते इति वाच्यम्". Bhaṭṭoji in his *Śabda-kaustubha*, while discarding the above-mentioned *vārttika* of Kātyāyana, makes the following learned observations : "प्रतिपद......इति वाच्यम्"—सर्पिषो ज्ञानम् । "ज्ञोऽविदर्थस्य" इति षष्ठी । सा च प्रतिपदविधाना । "षष्ठी शेषे" (II. 3 50) इति विहाय अन्यस्याः सर्वस्या अपि तथात्वात् ।

"न चैवमनेनैव गतार्थत्वात् "न निर्द्धारणे" (II.2.10) इति व्यर्थमिति शङ्क्यम् । "यतश्च निर्द्धारणम्" (II. 3. 41) इति सूत्रं हि षष्ठीं न विधत्ते किन्तु सप्तमीमेव । षष्ठी तु तया मा बाधीति प्रतिप्रसूयते इत्यन्यदेतत् । एवं "स्वामीश्वर—"(II. 3. 39) इत्यादिष्वपि । तेन "गृहस्वामी" "सर्वेश्वरः" इत्यादि सिद्धम् । वस्तुतस्तु "ज्ञोऽविदर्थस्य—" (II. 3. 53) इत्यादि चतुर्दशसूत्रीमध्ये "दिवस्तदर्थस्य" इत्यादि षट्सूत्रीं विहाय अवशिष्टायामष्टसूत्र्यां शेष इति वर्त्तते। तथा च "न माषाणामश्नीयात्" इत्यादौ इव "षष्ठी शेषे" (II. 3. 50) इत्येव सिद्धे नियमार्थं प्रकरणम्—षष्ठी भवत्येव श्रूयत एव, न तु लुप्यते। तथा च लुक्प्रयोजिका समास-संज्ञेह न भवतीति फलितोऽर्थः । तस्मात् "प्रतिपदविधाना न" इति वचनं न कर्त्तव्यम् ।......आह च—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"साधनैर्व्यपदिष्टे च श्रूयमाणक्रिये पुनः।
प्रोक्ता प्रतिपदं षष्ठी समासस्य निवृत्तये ॥" इति

(वाक्यपदीय ३. ७. १५९)। कथम् तर्हि "हरिस्मरणं" "विशेषस्मृतिहेतवः" "पदात् पदार्थस्मरणम्" इत्यादीति चेत्? कर्मणि षष्ठ्या समासस्य अनिषेधादिति गृहाण। तथा चेह कारकषष्ठ्या समासात् कृदुत्तरप्रकृतिस्वरो भवति। शेषषष्ठी-समासे तु अन्तोदात्तता स्यात्। एवञ्च अन्तोदात्तता-निवृत्तये प्रकरणं "मातुः स्मृतम्" इत्यादौ समासाभावार्थं च। न हि तत्र कारकषष्ठी लभ्यते "न लोक—" (II. 3. 69) इति प्रतिषेधात् इति निष्कृष्टोऽर्थः। आह च—

"निष्ठायां कर्मविषया षष्ठी न प्रतिषिध्यते।
शेषलक्षणया षष्ठ्या समासस्तत्र नेष्यते ॥"—

Śabda-kaustubha on II. 2. 10. Now, why "अविदर्थस्य" ?— "स्वरसंयोगेन सूत्रं जानाति"—*Kāśikā.*

§ 613. अधीगर्थदयेशां कर्मणि—(II.3.52)

दीक्षितः ॥ एषां कर्मणि शेषे षष्ठी स्यात्। मातुः स्मरणम्। सर्पिषो दयनम्, ईशनं वा।

Exposition

§ **एषां कर्मणि शेषे षष्ठी स्यात्** (Dikṣita)— 'शेष' continues from 'षष्ठी शेषे'(II.3.50). 'अधीगर्थाः स्मरणार्थाः'—*Kāśikā.* The root √इक् which means 'to recall' is always preceded by the preposition अधि. That is why Pāṇini mentions the root √इक् along with अधि. As Haradatta says: "इक् स्मरणे। ककारोऽत्रैव विशेषणार्थः। अधिपूर्वस्यैव उच्चारणमेवमेवायं प्रयोक्तव्य इति ज्ञापनार्थम्"—*Padamañjarī.* The शेषषष्ठी according to this rule, as also the subsequent rules, is not compounded. *Vide* our notes on the previous *sūtra* (§612).

"कर्मणीति किम्? मातुर्गुणैः स्मरति। शेष इति किम्? मातरं स्मरति।"—*Kāśikā.*

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

§ 614. कृञः प्रतियत्ने—(II.3.53)

दीक्षितः ।। प्रतियत्नो गुणाधानम् । कृञः कर्मणि शेषे षष्ठी स्याद् गुणाधाने । एधोदकस्योपस्करणम् ।

Exposition

§ **प्रतियत्नो गुणाधानम्**—"प्रतियत्न" means the emergence of a new property : "सतो गुणान्तराधानं प्रतियत्नः"—*Kāśikā*. The root √कृ, when preceded by 'उप', signifies the sense of प्रतियत्न and the augment सुट् is prefixed before the root according to the rule : "उपात् प्रतियत्न-वैकृत-वाक्याध्याहारेषु" (VI. 1. 139). The *ātmanepada* is according to the rule "गन्धनावक्षेपण—" (I. 3. 32).

§ **"कृञः कर्मणि शेषे षष्ठी स्याद् गुणाधाने"** (Dikṣita)—"कर्मणि" follows from II. 3. 52 and शेषे from II. 3. 50.

§ **एधोदकस्योउपस्करणम्**—In this example, the expression "एधोदकस्य" may be split up in two different ways : (1) It may be construed either as 'एधः दकस्य उपस्करणम्', meaning "the wood imparts a new quality to the water", as has been done by Nāgeśa in his *Laghu-śabdendu-śekhara* : "एधः इति पृथक्पदं, दकशब्द उदकवाची" ; (2) or, 'एधोदकस्य' may be taken as a द्वन्द्व compound, in which case the meaning of the whole sentence would be "preparation of the wood and water for sacrifice." Haradatta thus takes it as a द्वन्द्वः "जातिरप्राणिनाम्" इति (II. 4. 6) इत्येकवद्भावः. So also Bhaṭṭoji in his *Śabdakaustubha* : 'एधश्च उदकञ्च इति विग्रहे जातिरप्राणिनामिति एकवद्भावः ।'

§ 615. रुजार्थानां भाववचनानामज्वरेः—(II. 3. 54)

दीक्षितः ।। भावकर्तृकाणां ज्वरिवर्जितानां रुजार्थानां कर्मणि शेषे षष्ठी स्यात् । चौरस्य रोगस्य रुजा । "अज्वरि-सन्ताप्योरिति वाच्यम्" (वा°)। रोगस्य चौरज्वरः चौरसन्तापो वा । रोगकर्तृकं चौरसम्बन्धि ज्वरादिकमित्यर्थः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Exposition

§ **भावकर्तृकाणाम्** (Dikṣita)—This is the equivalent of भाववचनानाम्. It means the roots expressing the same meaning as the root √रुज् and having for their subject the abstract noun (formed from those roots by the addition of suffixes like घञ् etc. that are enjoined in the sense of भाव).

Jinendrabuddhi very clearly explains this meaning of the expression भाववचनानाम् in the following note : "भाववचनानाम् इति। यदि भावार्थाभिधायिनां रुजार्थानाम् इत्येषोऽर्थः विवक्षितः स्यात्, तदा अनर्थकमिदं वचनं स्यात्। सर्व एव हि रुजार्था भाववचनाः। तस्मान्नात्र धातुवाच्यो भावो विवक्षितः। किं तर्हि ? प्रत्ययवाच्यो यत्र "भावे" (III. 3. 18) इति घञ् विधीयते। वचनशब्दोऽयं कर्तृसाधनः। वक्तीति वचनः।—"कृत्यल्युटो बहुलम्" (III. 3. 113) इति ल्युट्। न च रुजार्थानां यो भावस्तस्य वचनक्रियां प्रति कर्तृत्वं सम्भवतीति सामर्थ्यात् वचनशब्देन प्रकृत्यर्थं परित्यज्य प्रत्ययार्थो विवक्षितः इति प्रतीयते। स पुनः कर्तृशक्तिः। भाववचनानामिति बहुव्रीहिः। भावो वचनः कर्त्ता येषां ते भाववचनाः। भावकर्तृका इत्यर्थः। एतत् सर्वं चेतसि कृत्वाह भावकर्तृकाणामिति। भावकर्तृकाणामित्येवं नोक्तं वैचित्र्यार्थम्।"

§ **कर्मणि शेषे**—These two words follow from the previous rules. In चौरस्य रोगस्य रुजा "रोग", which is formed with the भाववचन suffix घञ् added to √रुज् and at the same time is the subject of the action of रुजा, of which चौर is the object. So चौर is put in the sixth case-ending when there is **शेषविवक्षा.** Dikṣita everywhere substitutes कृदन्त forms like रुजा etc. for तिङन्त words like रुजति in order to indicate the absence of षष्ठीसमास in these cases. In the *Kāśikā* we have instances with तिङन्त forms—e.g. "चौरस्य रुजति रोगः, चौरस्य आमयति आमयः।"

§ **अज्वरि-सन्ताप्योरिति वाच्यम्**—This is a *vārttika*. In "रोगस्य चौरज्वरः, चौरसन्तापः"—ज्वरः and सन्तापः are compounded with चोरस्य as the sixth case-ending, in this case, is not according to the present rule, but according to "षष्ठी शेषे". As the *Tattva-*

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

bodhinī notes : "चौरज्वर इति। इह चौरशब्दात् "रुजार्थानाम्—" इति षष्ठ्या अप्रवृत्तौ "षष्ठी शेषे" इत्यनेन षष्ठ्यां 'षष्ठी' इति समासो भवत्येव इति भावः ।।" See also *Bālamanoramā*. In 'रोगस्य', षष्ठी is according to 'कर्त्तृकर्मणोः कृति' (II. 3.65).

§ 616. आशिषि नाथः—(II. 3. 55)

दीक्षितः ।। आशीरर्थस्य नाथतेः शेषे कर्मणि षष्ठी स्यात् । सर्पिषो नाथनम् । 'आशिषि' इति किम्—माणवकनाथनम् । तत्-सम्बन्धिनी याञ्चेत्यर्थः ।

Exposition

§"शेषे कर्मणि"—These two words follow from the prêvious rules. The words "आशीः" is derived from आ-√शास् (which means 'इच्छा' or desire) by the addition of the suffix क्विप्. In the *Dhātupāṭha* √नाथ् has been assigned the following meanings : "नाथृ नाधृ याच्ञोपतापैश्वर्याशीःषु". This rule applies only in the case of आशीः. For the sense expressed by the expression "सर्पिषो नाथनम्" *vide Bālamanoramā*. This rule, too, is framed for barring out *samāsa* with शेषषष्ठी. As the *Bālamanoramā* remarks : "इदमपि समासाभावार्थमेव ।"

§"आशिषि किम् ?.....याच्ञेत्यर्थः"—In माणवकनाथनम् *samāsa* is admissible as the षष्ठी in माणवकस्य is not according to the present rule, but by "'षष्ठी शेषे", since the root √नाथ् does not signify here the sense of आशीः but of "याच्ञा' or 'prayer'.

The *Kāśikā* has the example : "आशिषीति किम् ? माणवकमुपनाथति, अङ्ग पुत्रकाधीष्व ।"—"माणकमुपनाथति—याचते इत्यर्थः"—*Nyāsa*. In सर्पिषो नाथते, the root √नाथ् is used in *Ātmanepada* according to the *vārttika* "आशिषि नाथः" (under I. 3. 21).

§ 617. जासि-निप्रहण-नाट-क्राथ-पिषां हिंसायाम्—
—(II. 3. 56)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दीक्षितः ।। हिंसार्थानामेषां शेषे कर्मणि षष्ठी स्यात्। चौरस्योज्जासनम् । निप्रौ संहतौ विपर्यस्तौ व्यस्तौ वा । चौरस्य निप्रहणनं प्रणिहननं निहननं प्रहणनं वा । "नट अवस्यन्दने" चुरादिः । चौरस्योन्नाटनम् । चौरस्य क्राथनम् । वृषलस्य पेषणम् । हिंसायाम् किम्—धानापेषणम् ।

Exposition

§ Here also "शेषे कर्मणि follow from the preceding rules. 'जासि' here stands for the root √जसु read in the *Curādi*-class and not the root √जसु of the *Divādi*-class. As the *Kāśikā* distinctly points out : " 'जसु हिंसायाम्' 'जसु ताड़ने' इति च चुरादौ पठ्यते । तस्येदं ग्रहणम्, न दैवादिकस्य 'जसु मोक्षणे' इत्यस्य ।"—Cf. "निजौजसोज्जासयितुं जगद्द्रुहाम्"—*Śiśupālavadha*, I. 31.

§ **निप्रौ.........प्रहनं वा :**—'निप्रहण' stands for the root √हन् preceded by the prepositions नि and प्र. Bhaṭṭoji says in his *Śabda-kaustubha* : "नि-प्राभ्यामुपसृष्टो हनो निप्रहणः । 'हन्तेरत्पूर्वस्य' (VIII. 4. 22) इति णत्वम् ।"—This rule, however, applies whether the root √हन् be preceded by these two prepositions *severally* or *jointly* in the order in which they are read in the *sūtra* or in the reverse order. Bhaṭṭoji's statement "निप्रौ...... व्यस्तौ वा" is based upon the following *Kāśikā* text—viz. "निप्रहण इति संघातविगृहीतविपर्यस्त-ग्रहणम्", on which the *Nyāsa* comments : "निप्रहन्निति । धातूपसर्ग-निर्देशमात्रमिह तन्त्रम् । नतूपसर्गयोः संघातः, नाप्यानुपूर्वी तयोरविवक्षितत्वात् ।" In 'चौरस्य प्रणिहन्ति' the न् of नि is changed into ण् after प्र by the rule "नेर्गद-नद—" (VIII. 4. 17).

§ **नट अवस्यन्दने चुरादिः** (Dīkṣita)—The root √नट् read here belongs to the *Curādi*-class (*Curādi*° 1545). It is not the causative form of the root of the *Bhvādi*-class, which being a *ghaṭādi* root, the prologation of the radical 'अ' would be inadmissible.. As the *Śabda-kaustubha* notes : "नट अवस्यन्दने" चुरादिः । नट नृत्तौ (*Bhvādi* §781) इत्यस्य तु घटादेरग्रहणम्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दीर्घनिर्देशात् ।''—The root √नट् when preceded by the preposition 'उत्' conveys the idea of हिंसा. As *Bālamanoramā* says : "उपसर्गवशात् नाटेर्हिंसायां वृत्तिरिति भावः ।''—Vide the *maxim* "उपसर्गेण धात्वर्थो बलादन्यत्र नीयते ।" '√क्राथ' is the causative form of the root √क्रथ् of the *Bhvādi*-class (*Bhvādi* §81). According to Vṛttikāra—i. e. Kāśikākāra, the substitution of the वृद्धि vowel आ for the radical vowel अ of √क्रथ् is irregular since the root belongs to the *ghaṭadi* class as-well. Cf. : "वृषलस्य क्राथयति । निपातनाद् वृद्धिः । अयं हि घटादौ पठ्यते—"श्रथ-क्नथ-क्रथ-क्लथः हिंसार्थाः" इति । तत्र 'घ टादयो मितः' इति मित्संज्ञायाम् "मितां ह्रस्वः"(VI. 4. 92) इति ह्रस्वत्वं स्यात् ।"—*Kāśikā*. Why then read √क्रथ् in the *ghaṭadi* class ? To this Haradatta has the following answer : "घटादि-पाठस्तु 'घटादयः षितः' इत्यातिदेशिकोऽङ् यथा स्यात्।' 'चिण्णमुलोः दीर्घोऽन्यतरस्याम्,' (VI. 4. 93) इति दीर्घश्च यथा स्यात् इत्येवमर्थः ।"—But this view of Haradatta has been criticised by Bhaṭṭoji in his *Śabda-kaustubha* : "यद्यपि हरदत्तेनोक्तं घटादिपाठः "घटादयः षितः' (गणसूत्र) इति आतिदेशिकषित्त्वे अङ् यथा स्यात् इत्येतदर्थं इति, तदपि मन्दम् । 'घटादयः षितः' इति हि मध्ये सूत्रितम् । तेन पूर्वषामेव षित्त्वं न तु परेषामपि । परश्चायमिति दिक् ।''—Bhaṭṭoji's view is : "मित्त्वन्तु 'चिण्णमूलोः—' (VI. 4· 93) ति दीर्घविकल्पार्थम् अक्राथ अक्राथि । क्रथं क्रथम् । क्राथं क्राथम् । इह हि निपातनं बाधित्वा परत्वाद् दीर्घविकल्पः ।''—*Śabda-kaustubha*.

In 'धानापेषणम्' the root √पिष् indicates the idea of 'pounding' but not of 'injury' as in 'वृषलस्य पेषणम्'. So the compound is admissible : 'हिंसायां किम् ? धानापेषणम् । अन्तोदात्तः ।'—*Śabda-kaustubha*. Cf. "धानाः पिनष्टीति । अत्र हिंसा नास्ति । तस्याः प्राणिधर्मत्वात् ।"—*Nyāsa*. What is the use of framing a separate rule, inasmuch as the provisions of II. 3. 54 (§ 615) are sufficient to include the roots mentioned in the present rule as well, they being all रुजार्थ ? To this the *Nyāsa* observes : "इदञ्च अभावकर्तृकाणामपि यथा स्यादित्येवमर्थम् आरब्धम् । चौरस्य उज्जासयति देवदत्तः ।"

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

§ 618. व्यवहृपणोः समर्थयोः—(II. 3. 57)

दीक्षितः ॥ शेषे कर्मणि षष्ठी स्यात् । द्यूते क्रयविक्रय-व्यवहारे चानयोस्तुल्यार्थता । शतस्य व्यवहरणं पणनं वा । समर्थयोः किम्—शलाकाव्यवहारः । गणनेत्यर्थः । ब्राह्मणपणनं—स्तुतिरित्यर्थः ।

Exposition

§ '**शेषे**' and '**कर्मणि**' follow here also. "The object of the roots वि-अव+√हृ and √पण्, when they have the identical connotation (समर्थयोः), is put in the sixth case-ending if there be शेषत्व-विवक्षा". *Kāśikā* explains "समर्थयोः" as "समानार्थयोः" on which Haradatta has the following note : "समर्थयोरिति । संशब्दो वृत्तौ समानार्थः, समशब्दस्य वा निपातनात् पररूपमिति भावः। सम्बद्धार्थयोरिति न विज्ञायते, व्याख्यानात् । संभवति हि व्यवहृ-पणोर्हेतुहेतुमद्भावः सम्बन्धः ।" —*Padamañjarī*.

§ द्यूते......तुल्यार्थता (Dikṣita)—This is taken from *Kāśikā*. The roots वि-अव+ √हृ and √पण् have identical connotation when they signify either the idea of *gambling* or *trading*.

§ **शतस्य व्यवहरणं पणनं वा**—In *Śabda-kaustubha* Bhaṭṭojī explains the significance of this expression as follows : "शतसम्बन्धी क्रयविक्रयरूपेण विनियोगो देवनं वा ।"

§ In 'शलाकाव्यवहारः' षष्ठीसमास is admissible as वि-अव-√हृ does not mean here the actual game at dice, but mere *counting*. So also in ब्राह्मणपणनम्, as here the root √पण् means '*to praise*'. It should be noted that the suffix—आय is added after the root √पण् if it is followed by an आर्धधातुक only when it means स्तुति, so that we have ब्राह्मणान् पणायते, but सहस्रस्य पणते. *Vide Kāśikā* on this point : 'शतस्य पणते, सहस्रस्य । आयप्रत्ययः कस्मान्न भवति ? स्तुत्यर्थस्य पणतेरायप्रत्यय इष्यते । '—which has been explained by Jinendra-buddhi as follows : "आयप्रत्ययः कस्मात् न भवतीति ? "गपूधूप—" (III. 1. 28) इत्यादिना प्राप्नोतीति भावः । तुत्यर्थस्ये ... यद्यपि 'पण व्यवहारे स्तुतौ च" इति स्तुति-व्यवहारयोः पणिः पठ्यते तथापि स्तुत्यर्थस्यैव

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पणतेरायप्रत्यय इष्यते, न व्यवहारार्थस्य। तत्र वृत्तिकारः स्वयमेव युक्तिं वक्ष्यति। स्तुत्यर्थेन पणिना साहचर्य्यात् तदर्थ एव पणिरायमुत्पादयति न व्यवहारार्थ इति।"—*Nyāsa*. Consult also *Kāśikā* on III. 1. 28.

§ 619. दिवस्तदर्थस्य — (II. 3. 58)

दीक्षितः॥ द्यूतार्थस्य क्रयविक्रयरूपव्यवहारार्थस्य च दिवः कर्मणि षष्ठी स्यात्। शतस्य दीव्यति। तदर्थस्य किम्—ब्राह्मणं दीव्यति। स्तौतीत्यर्थः।

Exposition

§ 'तदर्थस्य' has been explained in the *Kāśikā* as follows "व्यवहृ-पणि-समानार्थस्य'—i. e. when the root √दिव् expresses the same meaning as the two roots—वि+अव√हृ and √पण्, referred to in the preceding *sūtras* (II. 3. 57)— viz. द्यूत and क्रयविक्रय-व्यवहार. So Dīkṣita explicitly says :

"द्यतार्थस्य......दिवः"।

It is to be noted that though "कर्मणि" follows from II. 3. 52, 'शेषे' ceases to be construed with the present *sūtra* (II. 3. 58) and the following two *sūtsas*—*viz*. II. 3·58–59. As Dīkṣita, in his *Śabda-kaustubha*, points out : "इह शेषे इति न सम्बध्यते उत्तरसूत्रद्वयारम्भात्। पूर्वसूत्र एव दिवः पाठे तदर्थस्येति न कर्त्तव्यमिति यद्यपि लाघवं तथापि योगविभागः उत्तरार्थः, शेषासम्बन्धार्थश्च।"—Though the root √दिव् might have been included in the previous *sūtra*, yet the present *sūtra* has been formed separately so that the root √दिव् alone might be construed with the following two *sūtras* (II. 3. 59–60). So *Kāśikā* says : "योगविभाग उत्तरार्थः।"

Note that in the three *sūtras* II. 3. 58–60 Dīkṣita furnishes examples with तिङन्त-forms instead of कृदन्त's, as hitherto done. In *Śabda-kaustubha* Dīkṣita says : "इह त्रिसूत्र्यां तिङन्तमपि उदाहरणम्." On this point Nāgeśa observes in his

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Laghu-śabdendu-śekhara : "शेष इति त्वत्र न सम्बध्यते ; व्याख्यानात् । अतएव "द्वितीया ब्राह्मणे" (II. 3. 60) इति सूत्रं 'गामस्य तदहः सभायां दीव्येयुः" इत्यत्र नित्यं षष्ठीप्राप्तौ द्वितीयार्थम् इति भाष्ये उक्तम् तद् ध्वनयन् तिङन्तमुदाहरति—शतस्य दीव्यतीति ।" See *Bālamanoramā*, especially Bhairava Miśra's comm. *Candrakalā* on Nāgeśa's *Laghu-śabdendu-śekhara.*

§ 620. विभाषोपसर्गे —(II. 3. 59)

दीक्षितः ।। पूर्वयोगापवादः । शतस्य शतं वा प्रतिदीव्यति ।

Exposition

§ **पूर्वयोगापवादः**—This is an exception to the preceding rule—viz. II. 3. 58. As the *Kāśikā* says : '"दिवस्तदर्थस्येति" (II. 3. 58) नित्यं षष्ठ्यां प्राप्तायां सोपसर्गस्य विकल्प उच्यते । उपसर्गे सति दिवस्तदर्थस्य कर्मणि कारके विभाषा षष्ठी विभक्तिर्भवति ।'—'तदर्थस्य' in the preceding rule is construed with the present *sūtra* as well, so that when the root √दिव्, though proceded by a preposition, does not signify द्यूत or क्रयविक्रयव्यवहार, we have द्वितीया only and not षष्ठी. *Vide Kāśikā.* : 'तदर्थस्यैव । शलाकां प्रतिदीव्यति ।'—'अत्र अर्थान्तरे क्रीड़ादौ दीव्यतिर्वर्त्तते'—*Nyāsa.*

§ 621. प्रेष्यब्रुवोर्हविषो देवतासम्प्रदाने—(II. 3. 61)

दीक्षितः ।। देवतासंप्रदानेऽर्थे वर्त्तमानयोः प्रेष्यब्रुवोः कर्मणो हविर्विशेषस्य वाचकाच्छब्दात् षष्ठी स्यात् । अग्नये छागस्य हविषो वपाया मेदसः प्रेष्य अनुब्रूहि वा ।

Exposition

Here, too, 'कर्मणि' follows from the previous rule. The form 'प्रेष्य' stands for root √इष् of the **दिवादि** class with the preposition प्र used in the 2nd person singular of the present Imperative (लोट्). By law of association the root √ब्रू also

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

is to be taken in the same mood and person. Vide *Kāśikā* : "प्रेष्य इति इष्यतेर्देवादिकस्य लोण्मध्यमपुरुषस्य एकवचनं, तत्साहचर्यात् ब्रुविरपि तद्विषय एव गृह्यते ।" Cf. also : "इष्यतेर्देवादिकस्येति । इषु गतौ इत्यस्य श्यना निर्देशः इच्छतीष्णात्योः इच्छाभीक्ष्ण्यार्थयोर्निवृत्यर्थः ।" —*Padamañjarī*. Kātyāyana qualifies this rule by a *vārttika* : "हविषोऽप्रस्थितस्येति"—i. e., when the word signifying हविः (offering) is *nct qualified by the word* 'प्रस्थित.' In the *Śabda-kaustubha* Bhaṭṭoji reads the above *vārttika* as follows : "हविषः प्रस्थितत्वेन विशेषणे प्रतिषेधो वक्तव्यः ।" इन्द्राग्निभ्यां छागं हविर्वपां मेदः प्रस्थितं प्रेष्य ।'—Though the instances cited are from by Vedic texts. the present rule has application in secular speech (भाषा) as well. As Bhaṭṭoji notes : "इदञ्च भाषायामपि प्रवर्त्तते, उत्तरत्र छन्दोग्रहणात् ।"—*Śabda-kaustubha* ; also Haradatta. The *Kāśikā* thus points out the significance of each term in the *sūtra* : "प्रेष्यब्रुवोरिति किम् ? अग्नये छागं हविर्वपां मेदो जुहुधि ।। हविष इति किम् ? अग्नये गोमयानि प्रेष्य ।। देवतासम्प्रदाने इति किम् ? माणवकाय पुरोडाशं प्रेष्य ।।"

§ 622. कृत्वोऽर्थप्रयोगे कालेऽधिकरणे—(II. 3.64)

दीक्षितः ।। कृत्वोऽर्थानां प्रयोगे कालवाचिन्यधिकरणे शेषे षष्ठी स्यात् । पञ्चकृत्वोऽह्नो भोजनम् । द्विरह्नो भोजनम् । शेषे किम् —द्विरहन्यध्ययनम् ।

Exposition

'शेषे' is again resumed in this *sūtra* by मण्डूकप्लुति. "वृत्त्यादिप्रामाण्यात् मण्डूकानुवृत्तिः स्वीकार्या"—*Laghu-śabdendu-śekhara*. Vide also :—'इह षट्सूत्र्या विच्छिन्नमपि शेषग्रहणमनुवर्त्तते, उत्तरसूत्रे कर्मग्रहणात् ।'—*Śabda-kaustubha*. Why शेष ?—'शेषे किम् ? अन्यथा विधिरेवायं स्यात् ।" तथा च द्विरहन्यधीते इति सप्तमी न स्यात् । षष्ठ्या बाधात् ।"—*Śabda-kausṭubha*. By कृत्वोऽर्थ are meant suffixes having the meaning of the suffix कृत्वसुच्, so that सुच् is also

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

included thereby. Cf. "कृत्वसुचोऽर्थो लक्ष्यते, कृत्वोऽर्थो येषां ते कृत्वोऽर्थाः ।"—*Padamañjarī.*

'पञ्चकृत्वोऽह्नो भोजनम्"—'पञ्चकृत्वः' is formed by the rule 'संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच्' (V. 4. 17).

'द्विः अह्नो भोजनम्'—द्विः is formed by the addition of the suffix सुच् according to the rule 'द्वि-त्रि-चतुर्भ्यः सुच्' (V. 4. 18). The *Kāśikā* thus points out the significance of each term in the *sūtra* : "कृत्वोऽर्थग्रहणं किम् ? अहनि शेते । प्रयोगग्रहणं किम् ? अहनि भुक्तम् । गम्यते हि द्विस्त्रिश्चतुर्वा इति, न तु अप्रयुज्यमाने भवति । कालग्रहणं किम् ? द्विः कांस्यपात्र्यां भुङ्क्ते । अधिकरण इति किम् ? द्विरह्नो भुङ्क्ते ।"

§ 623. कर्तृकर्मणोः कृति—(II. 3. 65).

दीक्षितः ।। कृद्योगे कर्त्तरि कर्मणि च षष्ठी स्यात् । कृष्णस्य कृतिः । जगतः कर्त्ता कृष्णः । 'गुणकर्मणि वेष्यते' (वा० ५०४२) ।। नेता अश्वस्य स्रुघ्नं स्रुघ्नस्य वा । कृति किम्—तद्धिते मा भूत् । कृतपूर्वी कटम् ।

Exposition

§ 'शेषे' ceases to continue in this *sūtra* on account of separate mention of कर्म in the *sūtra*. As *Kāśikā* says : " 'शेषे' इति निवृत्तं पुनः कर्मग्रहणात् । इतरथा हि कर्त्तरि च कृतीति ब्रूयात् ?"—So a word ending in षष्ठी enjoined by this rule can be compounded with another word—"तेनाप्राप्ता षष्ठी विधीयते इत्यस्याः समासो भवतीति 'कृद्योगा च षष्ठी समस्यते' इति न वक्तव्यं भवति"

—*Padamañjarī.*

Why 'कर्त्तृकर्मणोः' ?—"कर्त्तृकर्मणोरिति किम् ? शस्त्रेण भेत्ता ।"—*Kāśikā.*

§ गुणकर्मणि वेष्यते (Dikṣita)—This statement, though usually shown as a *vārttika*, is based upon Bhāṣyakāra's comments on 'अकथितञ्च' (I. 4. 51). Cf. : "अथ 'कर्त्तृकर्मणोः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कृती''ति षष्ठी द्विकर्मकेषु किं प्रधाने कर्मणि भवति आहोस्विद् गुणे भवति, आहोस्विदुभयोः ? उभयोरिति प्राप्तं द्वितीयावद् । भाष्यकारवचनात्तु गुणकर्मणि विकल्पेन षष्ठी, प्रधानकर्मणि नित्या ।—नेताऽश्वस्य स्रुघ्नस्य स्रुघ्नमिति वा'' ।—*Padamañjarī.*

Compare also the following *kārikās* recorded by Bhaṭṭojī in his *Śabda-kaustubha* on I. 4. 51—

"कृत्षष्ठी गुणमुख्याभ्यां कर्मभ्यां प्राप्यते पृथक् ।
अविशेषाद् द्वितीयावत् नेता ग्रामस्य गोरिति ॥
यत्र त्वेकेन शब्देन भिन्नकक्ष्यद्वयाभिधा ।
न शक्यते तत्र युक्तमेकस्यैवोपजीवनम् ॥
प्रधाने नियता षष्ठी गुणे ह्युभयथा भवेत् ।
इत्याह गोणिकापुत्र इति भाष्याद् गुणद्वयम् ॥''—

—*Op. cit.*, Vol. II. 135.

§ **कृति किम् ? तद्धिते मा भूत् । कृतपूर्वी कटम्** (Dikṣita).—As regards the charges of impossibility of द्वितीया in कटम् and समास and तद्धित in कृतपूर्वी on the score of अभिहितत्व (i. e. of कर्मत्व) and असामर्थ्य, *vide* the refutation in *Bālamanoramā*. Bhartṛhari has summed up the arguments for द्वितीया and समास as well as तद्धित in the expression 'कृतपूर्वी कटम्' in the following *kārikās* of the *Vākya-padīya* (III. 14. 65-67) :

"विशेषकर्मसम्बन्धे निर्भुक्तेऽपि कृतादिभिः ।
विशेषनिरपेक्षोऽन्यः कृतशब्दः प्रवर्त्तते ॥
अकर्मकत्वे सत्येवं क्तान्तं भावाभिधायकम् ।
ततः क्रियावता कर्त्रा योगो भवति कर्मणाम् ॥
अविग्रहा गतादिस्था यथा ग्रामादिकर्मभिः ।
क्रिया सम्बध्यते तद्वत् कृतपूर्व्यादिषु स्थिता ॥''

On this point *vide* the following *Bhāṣya*-text on which all subsequent discusions are based :

"अथवा कृतो ये कर्तृकर्मणी तत्र यथा स्यात् तद्धितस्य ये कर्तृकर्मणी तत्र मा भूत् । कृतपूर्वी कटम् । भुक्तपूर्वी ओदनम् इति ॥ ननु च वाक्येनैवानेन न भवितव्यम् । द्वितीया तावन्न भवितव्यम् । किं कारणम् ?

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्तेनाभिहितं कर्मेति कृत्वा। इनिप्रत्ययेन चापि नोत्पत्तव्यम्। किं कारणम्? असामर्थ्यात्। कथम् असामर्थ्यम्? सापेक्षमसमर्थं भवतीति॥ यत्तावदुच्यते द्वितीयया तावत् न भवितव्यम्। किं कारणं क्तेनाभिहितं कर्मेति कृत्वेति। योऽसौ कृतकटयोरभिसम्बन्धः स उत्पन्ने प्रत्यये निवर्त्तते। अस्ति च करोतेः कटेन सामर्थ्यम् इति कृत्वा द्वितीया भविष्यति। यदप्युच्यते इनिप्रत्ययेन चापि नोत्पत्तव्यम्। किं कारणम् असामर्थ्यात्। कथमसामर्थ्यं सापेक्षमसमर्थं भवतीति। नेदमुभयं युगपद् भवति वाक्यं च प्रत्ययश्च। यदा वाक्यं न तदा प्रत्ययः। यदा प्रत्ययः सामान्येन तदा वृत्तिः। तत्रावश्यं विशेषार्थिना विशेषोऽनुप्रयोक्तव्यः। कृतपूर्वी। किम्? कटम्। भुक्तपूर्वी। किम्? ओदनमिति॥—*Mahābhāṣya*, Vol. I, pp. 467—68 (Kielhorn's Edn.). Haradatta, in his *Padamañjarī*, does not see any justification of 'कृति' in the *sūtra* for barring out षष्ठी in कृतपूर्वी कटम्. According to him 'कृति' has been mentioned in the *sūtra* in order to rule out षष्ठी in such instances as व्याकरणं प्राज्ञः As the *Śabda-kaustubha* concludes: "...तस्माद् व्यर्थं कृद्ग्रहणमिति। अत्राहुः। कृत्येव यथा स्यात् तद्धिताधिक्ये मा भूदिति कृद्ग्रहणम्। व्याकरणं प्राज्ञः। 'प्रज्ञादिभ्यश्च' (V. 4. 38) इति स्वार्थेऽण्। एवञ्च वदतां मते 'ओदनस्य पाचकतमः' इत्यत्रापि षष्ठी न इति लभ्यते। कृतपूर्वीतिवत् कर्त्तव्यपूर्वीत्यादेरभ्युपगमे तु तव्यदाद्यन्तेन समासात् इनौ कृते कृद्ग्रहणव्यावर्त्यताऽपि सम्भवति। भाष्यं तु इह उदासीनमेव इत्यभियुक्तप्रयोगाः अवेक्षणीयाः।" —In the *Laghu-śabdendu-śekhara*, however, Nāgeśa refutes the above interpretation of the *sūtra* as recorded in Haradatta's *Padamañjarī* (viz. 'तद्धिताधिक्ये मा भूत्। व्याकरणं प्राज्ञः'), as being contrary to the implications of the Bhāṣyakāra's observations: "तद्धिते इति। तद्धितान्तशक्तिग्रहमात्रप्रयोज्योपस्थितिविषयक्रियायाः कर्त्तरि कर्मणि च मा भूद् इति अर्थः। उदाहरणे सकर्मकप्रकृतिक-भाववतान्तस्य ईदृशवृत्तिमात्रविषयताया भाष्यसम्मतत्वेन तस्य केवलस्य क्वापि अप्रयोगेण तद्धितान्तसमुदायशक्त्यैव क्रियोपस्थापकत्वात्। कृद्ग्रहणात् कृदन्तशक्तिग्रहप्रयोज्योपस्थितिविषयक्रियाकर्तृकर्मणोर्ग्रहणम्। न चात्र तथा। 'तण्डुलानां पाचकतरः' इत्यादौ च पाचकादेः पृथक् प्रयोगेण तच्छक्तिग्रहस्यापि सत्त्वेन कृदन्तशक्तिग्रहप्रयोज्योपस्थितिविषयत्वं क्रियायाः अस्त्येवेति भवत्येव षष्ठी। अतएव

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तद्धिते मा भूदित्येवोक्तम्, न तु तद्धिताधिक्येऽपीति। भाष्येऽपि तद्धितस्य ये कर्तृकर्मणी तत्र मा भूत् कृतो ये कर्तृकर्मणी तत्रैव यथा स्यात् इत्येवोक्तम् ॥"

For the formation of कृतपूर्वी *vide* the rule V. 2. 87 ('सपूर्वाच्च').

§ 624. उभयप्राप्तौ कर्मणि—(II. 3. 66)

दीक्षितः ॥ उभयोः प्राप्तिर्यस्मिन् कृति तत्र कर्मण्येव षष्ठी स्यात्। आश्चर्यो गवां दोहोऽगोपेन। स्त्रीप्रत्यययोरकाकारयोर्नायं नियमः। भेदिका बिभित्सा वा रुद्रस्य जगतः। 'शेषे विभाषा' (वा० १५१६)। स्त्रीप्रत्यय इत्येके। विचित्रा जगतः कृतिर्हरेर्हरिणा वा। केचिदविशेषेण विभाषामिच्छन्ति। शब्दानामनुशासनमाचार्येणाचार्यस्य वा।

Exposition

This is a restriction of the previous rule (II. 3. 65) : "पूर्वेण षष्ठी प्राप्ता नियम्यते"—*Kāśikā*.

§ उभयोः.......कृति (Dīkṣita)—The expression 'उभयप्राप्तौ' has to be taken as a बहुव्रीहि compound, thus qualifying 'कृति' understood from the preceding rule (II. 3. 65) and *not* as a तत्पुरुष compound. Thus, when the same कृदन्त word is the occasion of षष्ठी both after the कर्तृवाचक word and the कर्मवाचक word the latter alone takes the षष्ठी and not both of them as provided for by the previous rule (II. 3. 65). The *Kāśikā* thus remarks on the necessity of expounding 'उभयप्राप्तौ' as a बहुव्रीहि compound : "बहुव्रीहिविज्ञानादिह नियमो न भवति। आश्चर्यमिदमोदनस्य पाको, ब्राह्मणानां च प्रादुर्भावः इति।" —"अत्र पाके औदनस्य कर्मत्वं प्रादुर्भावे च ब्राह्मणानां कर्तृत्वमित्यनेकत्वात् न कृदुभयप्राप्तिर्भवति।"—*Padamañjarī*.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

§ स्त्रीप्रत्यययोः.........नियमः—This is a *vārttika*. In the *Mahābhāṣya*, the Bhaṣyakāra records two different readings, of this *vārttika*—viz. (1) 'उभयप्राप्तौ कर्मणि षष्ठ्याः प्रतिषेधेऽकादिप्रयोगेऽप्रतिषेधः', and (2) अपर आह—"अकाकारयोः प्रयोगे प्रतिषेधो नेति वक्तव्यं शेषे विभाषा". The author of the *Kāśikā* and all the later commentators usually adopt the second version of the *vārttika* splitting it into two part.—viz.. "अकाकारयोः प्रयोगे प्रतिषेधो नेति वक्तव्यम्" and "शेषे विभाषा" as done here. 'स्त्रीप्रत्यययोः' has been explained in the *Laghu-śabdendu-śekhara* as : "स्त्रियां क्तिन्" (III. 3. 94) इत्यधिकारविहितयोरित्यर्थः।" —Words ending in कृत् suffixes -अक (III. 3. 111) and -अ (III. 3. 102) take the feminine termination आ. भेदिका can be formed either by the suffix ण्वुच् (II. 3. 111), as has been done by Haradatta, or by the addition of the suffix ण्वुल् (as taught in a *vārttika* under III. 3. 108), as is the view of Nāgoji and others. Cf : "भेदनं भेदिका। 'पर्य्यायार्हणोत्पत्तिषु—" (III. 3. 111) इति ण्वुच्। 'धात्वर्थनिर्देशे ण्वुल् वक्तव्यः" (*vārttika* under III. 3. 108) इत्यनेन ण्वुल् इत्येके" ।—*Tattva-bodhinī*. Thus in 'भेदिका विभित्सा वा रुद्रस्य जगतः' both the कर्तृवाचक and कर्मवाचक words (viz. रुद्र and जगत् respectively) take षष्ठी according to the preceding rule ('कर्तृकर्मणोः कृति'), the present rule being made inapplicable by this *vārttika*. Vide : "अत्र उभयत्रापि कर्त्तरि तृतीया न भवति। षष्ठी तु शेषविवक्षयापि सिध्यति, समासोऽप्यत्र भवति। 'धर्मजिज्ञासा देवदत्तस्य' 'शिष्यस्य आचार्य्यशुश्रूषा' इति॥"

§'शेषे विभाषा'—This is the second part of the *vārttika* as recorded in the *Mahābhāṣya*, qualifying the provision of the first part. There is a difference of interpretation with regard to the exact siginificance of the word 'शेष', (which in general means 'उक्तादन्यः'), as to whether those कृत् suffixes are to be taken as referred to by शेष that are other than -अक and -अ and at the same time taugtht under the अधिकार rule 'स्त्रियां क्तिन्' (III. 3. 94) or any and every कृत् suffix excepting

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अक and अ. In the *Kāśikā* these two views are recorded : "'शेषे विभाषा'। अकाकारयोः स्त्रीप्रत्यययोर्ग्रहणात् तदपेक्षया शेषः स्त्रीप्रत्यय एव गृह्यते । विचित्रा हि सूत्रस्य कृतिः पाणिनेः पाणिनिना वा ।। केचिदविशेषेण विभाषामिच्छन्ति ।। शब्दानामनुशासनमाचार्येण आचार्यस्य वा ।।"—The second view referred to by केचित् seems to be contrary to Bhaṣyakāra's viewpoint, which seems to include by शेषे only the स्त्रीप्रत्यय कृत्-suffixes besides अक and अ, since he cites instances with the कृदन्त word 'कृति' ending in -क्तिन्. Note the following observations of Haradatta : "शेषे विभाषेति । तत्र यदा नियमेन कर्तरि तृतीया, तदा 'कर्मणि च' (II. 2. 14) इति निषेधात् पाणिनिना सूत्रकृतिः, आचार्य्येण शब्दानुशासनम् इत्यसाधुः समासः, पाणिनेः सूत्रकृतिराचार्यस्य शब्दानुशासनमिति तु साधुः"—*Padamañjarī.*

§ 625. क्तस्य च वर्त्तमाने (II. 3. 67)

दीक्षितः ।। वर्त्तमानार्थस्य क्तस्य योगे षष्ठी स्यात् । 'न लोके'-ति निषेधस्यापवादः । राज्ञां मतो बुद्धः पूजितो वा ।

Exposition

For the suffix क्त added to a root in the present tense *vide* P. III. 2. 288 ('मतिबुद्धिपूजार्थेभ्यश्च').

§ **न 'लोकेति--'...... अपवादः**—This is an exception to the prohibition of षष्ठी in connection with a word ending in -क्त according to the rule 'न लोकाव्ययनिष्ठाखलर्थतृनाम्' (II. 3. 69).

In the *Mahābhāṣya* there is a *vārttika* under this rule to account for षष्ठी in connection with -क्त in भाववाच्य—e.g. हसितम्, भुक्तम्, नृतम्, व्याहृतम् etc. Cf : " 'क्तस्य च वर्त्तमाने नपुंसके भाव उपसंख्यानम् ।" क्तस्य च वर्त्तमाने नपुंसके भावे (III. 3. 114) उपसंख्यानं कर्त्तव्यम् । छात्रस्य हसितम् । नटस्य भुक्तम् । मयूरस्य नृत्तम् । कोकिलस्य व्याहृतम् इति ।।" These are really instances of शेषषष्ठी and consequently तृतीया too is admissible.

As the second *vārttika* under the same rule says :— "शेषविज्ञानात् सिद्धम् ।।"—शेषलक्षणात्र षष्ठी भविष्यति (II. 3. 50) शेष इत्युच्यते । कश्च शेषः । कर्मादीनामविवक्षा शेषः । कथं पुनः सतो

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नामाविवक्षा स्यात् यदा छात्रो हसति नटो भुङ्क्ते मयूरो नृत्यति कोकिलो व्याहरति। सतोऽप्यविवक्षा भवति। तद्यथा। अलोमिका एडका। अनुदरा कन्येति ॥"—Vol. I., p. 438 (Kielhorn's Edn.). See also *Kāśikā* and *Śabda-kaustubha* on the present rule.

§ **626. अधिकरणवाचिनश्च**—(II. 3. 68)

दीक्षितः ॥ क्तस्य योगे षष्ठी स्यात्। इदमेषामासितं शयितं गतं भुक्तं वा।

Exposition

§ The suffix क्त is enjoined after roots meaning ध्रौव्य, गति and प्रत्यवसान to denote अधिकरण (*substratum*) also besides कर्तृ, कर्म and भाव according to the rule "क्तोऽधिकरणे च ध्रौव्यगतिप्रत्यवसानार्थेभ्यः" (III. 4. 76). *Vide* : "ध्रौव्यार्था अकर्मकाः। प्रत्यवसानार्थाः अभ्यवहारार्थाः—इति स्वनिकायप्रसिद्धिः। ध्रौव्यगतिप्रत्यवसानार्थेभ्यो यः क्तो विहितः सोऽधिकरणे भवति। चकारात् यथाप्राप्तं च। ध्रौव्यार्थेभ्यः कर्तृभावाधिकरणेषु, गत्यर्थेभ्यः कर्तृ-कर्म-भावाधिकरणेषु, प्रत्यवसानार्थेभ्यः कर्मभावाधिकरणेषु ॥"—*Kāśikā* on III. 4. 76.

§ In connection with a word ending in -क्त and denoting अधिकरण, षष्ठी is used after the कर्तृवाचक word or the कर्मवाचक word or after both, as occasion demands. The restriction "उभयप्राप्तौ कर्मणि' (II. 3. 66) does not apply in the present case. As the *Nyāsa* distinctly states : "यथासम्भवं यत्र कर्त्तैव सम्भवति, तत्र कर्तरि भवति यथा—इदमेषामासितमिति। अत्र आसेरकर्मकत्वात् कर्त्तैव सम्भवति न कर्म। यत्र तु कर्म कर्त्तापि सम्भवति तत्र उभयत्रापि—यथा इदमेषां भुक्तमोदनस्येति। भुजेः सकर्मकत्वात् कर्मापि अस्त्येव ओदनः। "उभयप्राप्तौ कर्मणि" (II. 3. 66) इति नियमः कस्मात् न भवति ? 'कर्तृकर्मणोः कृति'-त्यस्याः (II. 3. 65) षष्ठ्याः प्राप्तेरेव नियमो विज्ञायते।' 'अनन्तरस्य विधिर्वा भवति प्रतिषेधो वे'-ति (*Paribhāṣā* LXII) 'मध्येऽपवादाः पूर्वान् विधीन् बाधन्ते नोत्तरान्" (*Pari°* LXI) इति वा ॥"—Now, why 'अधिकरणवाचिनश्च' instead of simple 'अधिकरणे च' ?—"'अधिकरणे चेति वक्तव्ये वाचिग्रहणमधिकरणक्तोपलक्षणं मा विज्ञायीत्येवमर्थम्। उपलक्षणार्थत्वे हि तस्य अर्थान्तरवृत्तेरपि ध्रौव्यगतिप्रत्यवसानार्थेभ्यः उत्पन्नस्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्तस्य प्रयोगे षष्ठी स्यात्। वाचिग्रहणे तु यदा भावे क्तप्रत्ययो भवति, तदा षष्ठी न भवति। तदा कर्त्तरि तृतीयैव भवति। इहानेनासितमिति। नह्यत्र अधिकरणवाची क्तः। "क्तोऽधिकरणे—" (III. 4 76) इति चकारात् यथाप्राप्तं च इति भावे कर्त्तरि च विधानात्"—*Nyāsa.*

§ 627. न लोकाव्ययनिष्ठाखलर्थतनाम्—(II. 3. 69)

दीक्षितः ॥ एषां प्रयोगे षष्ठी न स्यात्। लादेशाः—कुर्वन् कुर्वाणो वा सृष्टिं हरिः। उः—हरिं दिदृक्षुः-अलङ्करिष्णुर्वा। उकः—दैत्यान् घातुको हरिः। 'कमेरनिषेधः' (वा° १५२१)। लक्ष्म्याः कामुको हरिः। अव्ययम्—जगत् सृष्ट्वा। सुखं कर्त्तुम्। निष्ठा—विष्णुना हता दैत्याः। दैत्यान् हतवान् विष्णुः। खलर्थः—ईषत्करः प्रपञ्चो हरिणा। तृन्निति प्रत्याहारः 'शतृशानचावि'ति तृशब्दादारभ्या तृनो नकारात्। शानन्—सोमं पवमानः। चानश्—आत्मानं मण्डयमानः। शतृ—वेदमधीयन्। तृन्—कर्ता लोकान्। 'द्विषः शतुर्वा' (वा° १५२२)। मुरस्य मुरं वा द्विषन्। सर्वोऽयं कारकषष्ठ्या प्रतिषेधः। शेषे षष्ठी तु स्यादेव। ब्राह्मणस्य कुर्वन्। नरकस्य जिष्णुः।

Exposition

By 'ल' is meant the substitues (आदेश) for 'ल्' (i. e. लट् etc.). They are शतृ, शानच्, क्वसु, कानच् and कि and किन् : "ल इति शतृ-शानचौ कानच्-क्वसू कि-किनौ च गृह्यन्ते"—*Kāśikā.* In the *vṛtti,* however, Bhaṭṭoji cites शतृ and शानच् as instances of लादेश. For the inclusion of कि-किन् (as taught in III. 2. 171 : 'आ-दृ-गम-हन-जनः कि-किनौ लिट् च') *vide* the *vārttikas* § 1—2 on the present *sūtra* and *Bhāṣya* thereon. Cf. *also* : "लादेशाः—ओदनं पचन् पचमानः पेचानः पेचिवान्। कथं तर्हि ?—'बभ्रिर्ब्रजम्. 'पपिः सोमम्' 'ददिर्गाः' इति ? न हि कि-किनौ लकारौ नापि तदादेशौ। नैष दोषः। 'कि-किनौ लिट् च' (III. 2. 171) इत्यनेन लिट्कार्यातिदेशः क्रियते न तु लिट्संज्ञा। 'विशेषातिदेशे च सामान्यमप्यतिदिश्यते' इति।"—*Śabda-kaustubha.*

'लोक' has to be split up as 'ल-उ-उक'. As the *Bhāṣya* says : "उकार योगे नेति।"

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वक्तव्यम्। कटं चिकीर्षुः। ओदनं बुभुक्षुः॥ तत्तर्हि वक्तव्यम्। न वक्तव्यम्। उकारोऽप्यत्र निर्दिश्यते। कथम्? प्रश्लिष्टनिर्देशोऽयम् उ उक ऊक ल ऊक लोकेति।" By उ is to be included the उकारान्त suffix-इष्णुच् as well, though in the *Mahābhāṣya* there is no such explicit ruling. The *Kāśikā* says : 'इष्णुचोऽपि प्रयोगे निषेधः'. Cf. also : "उकारेण व्याख्यानात् तदन्तविधिर्व्यपदेशिवद्भावेन उकारस्यापि। 'सनाशंस—' (III. 2. 168) 'अलंकृञ्—' (III. 2. 136) इति च उ-इष्णुचौ"।—Nāgeśa's *Laghu-śabdenduśekhara.*

'कमेरनिषेधः'—(*Vārttika*) : The original reading of the *vārttika* as recorded in the *Mahābhāṣya*, however, is somewhat different : "उकप्रतिषेधे कमेर्भाषायामप्रतिषेधः," so that in the vedic language (as opposed to भाषा) the prohibition holds good. Cf. "इदञ्च भाषायामेव। भाषायामिति भाष्योक्तेः"—*Laghu-śabdendu-śekhara.*

Words ending in क्त्वाच्, तुमुन् etc. are regarded as indeclinables (अव्यय) according to the *sūtra*-s : 'कृन्मेजन्तः' and 'क्त्वातोसुन्कसुनः' (I. 1. 39-40). There is an exception to this prohibition as contained in the *vārttika* : "अव्ययप्रतिषेधे तोसुन्कसुनोरप्रतिषेधः". Bhaṭṭojī perhaps leaves out this *vārttika* considering the use of the suffixes -तोसुन् and -कसुन् (III. 4. 6 and III. 4. 17) as limited to the Vedas only.

'निष्ठा' is the technical designation for the suffixes -क्त and -क्तवतु. Cf. : "क्तक्तवतू निष्ठा" (I. 2. 26). 'खलर्थ' includes, besides खल्, युच् also. As the *Kāśikā* cites as an instance : "ईषत्पानः सोमो भवता". 'ईषत्पानः' is formed by the addition of the suffix -युच् to √पा (to drink) according to the rule : "आतो युच्" (III. 3. 128).

'तृन्' is to be regarded as a प्रत्याहार, and not as an independent suffix (III. 2. 135), and all the suffixes beginning from शतृ and ending with तृन् as taught in the *sūtra*-s III. 2. 124-135 (from 'लटः शतृ—' to 'तृन्') are inclnded therein. Cf. : "तृनिति नेदं प्रत्ययग्रहणम्। किं तर्हि? प्रत्याहारग्रहणम्। क्व सन्निविष्टानां प्रत्याहारः? 'लटः शतृ—' इत्यतः प्रभृति आ तृनो नकारात्॥"

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

—*Mahābhāṣya*. So शानन्, चानश् etc. are also included in तृन्. Thus we have 'सोमं पवमानः' (शानन् according to rule III. 2. 128), 'नटमास्नानः' (चानश् according to rule III. 2. 129), 'अधीयन् पारायणम्' (शतृ according to rule III. 2. 130).

§ द्विषः शतुर्वा—This is a *vārttika* (वा° 1522) under II. 3. 69. This is an exception to the prohibition with regard to the प्रत्याहार तृन्.

§ सर्वोऽयं ...जिष्णुः—All the prohibitions contained in the present rule apply only in regard to कारकषष्ठी and not शेषषष्ठी : "उदाहरणेषु सर्वत्र कारकषष्ठ्याः प्रतिषेधः, शेषषष्ठी तु भवत्येव। ब्राह्मणस्य कुर्वन्, ओदनस्य पचन्, अपां पेरुरसि, नरकस्य जिष्णवो गुणैः तानि द्विषद्वीर्य्यनिराकरिष्णुरिति ।"—*Padamañjarī*. See also *Śabda-kaustubha*.

§ 628. अकेनोर्भविष्यदाधमर्ण्ययोः —(II. 3. 70)

दीक्षितः ।। भविष्यत्यकस्य भविष्यदाधमर्ण्यार्थेनश्च योगे षष्ठी न स्यात् । सतः पालकोऽवतरति । व्रजं गामी । शतं दायी ।

Exposition

§ भविष्यति......न स्यात् (Dīkṣita).—The principle of यथासंख्यान्वय does not apply in this case, on the authority of the Vārttikarāka and the *Bhāṣya* thereon. Cf. : "इह यथासंख्यं वारयितुं भाष्ये योगो विभक्तः । अकस्य भविष्यति, आधमर्ण्ये चेति ।।" —*Śabda-kaustubha*. See *Bhāṣya*. Consult also *Bālamanoramā*.

'भविष्यदाधमर्ण्ययोरिति ? यवानां लावकः सक्तूनां पायकः । अवश्यंकरी कटस्य ।। इह कस्मान्न भवति ? वर्षशतस्य पूरकः, पुत्रपौत्राणां दर्शकः इति ? भविष्यदधिकारे विहितस्य अकस्येदं ग्रहणम् ।।"—*Kāśikā*. The 'अक' mentioned here refers only to that अक (ण्वुल्) alone which is taught under the rule : 'भविष्यति गम्यादयः' (III. 1. 3) and *not* to that as taught in III. 1. 33 ('ण्वुल्तृचौ'). *Vide* : 'भविष्यदिति स्मर्य्यते। तेन भविष्यदधिकारविहितस्य ग्रहणात् नेह—वर्षशतस्य पूरकः। पुत्रपौत्राणां दर्शकः। अयं हि 'ण्वुल्-तृचौ' (III. 1. 133) इत्यविशेषेण विहितः, न तु 'तुमुन्-ण्वुलौ—'(III. 3. 10) इतिवत् भविष्यदधिकारस्थः ।'—*Śabda-kaustubha*.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

§ 629. कृत्यानां कर्त्तरि वा –(II. 3. 71)

दीक्षितः ।। षष्ठी वा स्यात् । मया मम वा सेव्यो हरिः । कर्त्तरि इति किम्—गेयो माणवकः साम्नाम् । 'भव्यगेय—' (सूत्र° २८९४) इति कर्त्तरि यद्विधानादनभिहितं कर्म । अत्र योगो विभज्यते —'कृत्यानाम्' । 'उभयप्राप्तौ' इति 'न' इति चानुवर्त्तते । तेन नेतव्या व्रजं गावः कृष्णेन । ततः 'कर्त्तरि वा' । उक्तोऽर्थः ।

Exposition

§ **षष्ठी वा स्यात्** (Dikṣita)—Cf. : "कर्त्तृकर्मणोः कृति" इति नित्यं षष्ठी प्राप्ता कर्त्तरि विकल्प्यते । कृत्यानां प्रयोगे कर्त्तरि वा षष्ठी विभक्तिर्भवति "—*Kāśikā*. The कृत्य suffixes are *five* in number :—

"कृत्याः पञ्च समाख्याता भावे कर्मणि यण्ण्यतौ ।
तव्यानीयौ च क्यप् षष्ठः केलिमः कर्मकर्त्तरि ॥"

§ **कर्त्तरि किम् ?......कर्म** (Dīkṣita).—This is based upon the following *vārttika* and Bhāṣyakāra's comments thereon : "भव्यादीनां कर्मणोऽनभिधानात् कृत्यानां कर्त्तृग्रहणम्"—भव्यादीनां कर्म (III. 4. 68) कृत्यैरनभिहितम् । गेयो माणवकः साम्नाम् । भव्यादीनां कर्मणोऽनभिधानात् कृत्यानां कर्त्तृग्रहणं क्रियते ॥'—*Mahābhāṣya*, Vol. I P. 470. (Kielhorn's Edn.). 'गेय' has been formed by the addition of the कृत्य suffix यत् to denote कर्त्तृ (agent) according to the rule 'भव्यगेय—' (III. 4. 68).

§ **अत्र योगो.......उक्तोऽर्थः** (Dīkṣita) : This योगविभाग is based upon the statements of Bhāṣyakāra. Cf. : "इहापि भाष्ये योगविभागः कृतः ।'—*Śabda-kaustubha*. The *Kāśikā*, however, has the following ruling instead of योगविभाग : "उभयप्राप्तौ कृत्ये षष्ठ्याः प्रतिषेधो वक्तव्यः ।" —क्रष्टव्या ग्रामं शाखा देवदत्तेन । नेतव्या ग्राममजा देवदत्तेन ।"— on which the *Padamañjarī* comments as follows : "उभयप्राप्तौ कृत्य इति । उभयोः कर्त्तृकर्मणोः प्राप्तिर्यस्मिन् कृत्ये तत्र द्वयोरपि कर्त्तृकर्मणोः षष्ठी न भवतीत्यर्थः । क्रष्टव्येति कृषेर्द्विकर्मकत्वात् प्रधाने कर्मणि कृत्यप्रत्ययो भवति, न त्वप्रधाने इति तस्मिन् कर्मणि कर्त्तरि च प्राप्ता षष्ठी न भवति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एतच्च योगविभागाल्लभ्यते ।। कथम् ? कृत्यानामित्येको योगः। अत्र 'उभयप्राप्तौ' 'न' इति च वर्त्तते, युगपदुभयप्राप्तीनां कृत्यानां प्रयोगे षष्ठी न भवतीत्यर्थः। ततः 'कर्त्तरि वा'। अत्र षष्ठीत्येवानुवर्त्तते, अन्यत् सर्वं निवृत्तम् ।।"—Compare also *Śabda-kaustubha*. 'उभयप्राप्तौ' follows from II. 3. 66 and 'न' from II. 3. 69.

§ 630. तुल्यार्थैरतुलोपमाभ्यां तृतीयान्यतरस्याम् ।

—(II. 3. 72)

दीक्षितः ।। तुल्यार्थैर्योगे तृतीया वा स्यात् पक्षे षष्ठी । तुल्यः सदृशः समो वा कृष्णस्य कृष्णेन वा । अतुलोपमाभ्यां किम्—तुला उपमा वा कृष्णस्य नास्ति ।

Exposition

Why 'अन्यतरस्याम्' in the *sūtra* as 'वा', in the previous *sūtra* (कृत्यानां कर्त्तरि वा) can, by अनुवृत्ति, serve its function ? To this *Kāśikā* says : "वेति वर्त्तमानेऽन्यतरस्यांग्रहणमुत्तरसूत्रे तस्य चकारेण अनुकर्षणार्थम् । इतरथा हि तृतीयानुकृष्येत ।।"

Why 'तुल्यार्थैः' instead of तुल्यैः ? —"बहुवचननिर्देशादेव स्वरूपग्रहणाभावे सिद्धेऽर्थग्रहणं पदान्तरनिरपेक्षा ये तुल्यानाहुस्तत्परिग्रहार्थम् । तेन द्योतका इवादयो निर्वर्त्तिता भवन्ति । गौरिव गवयः, यथा गौस्तथा गवय इति ।"—*Padamañjarī.*

How to justify तृतीया in connection with तुला and उपमा in some cases inspite of distinct prohibition here ? Compare : "कथं तर्हि—'तुलां यदारोहति दन्तवाससा' इति कालिदासः ? "स्फुटोपमं भूतिसितेन शम्भुना' (*Śiśupāla*° I. 4.) इति माघश्च ? (१) अत्राहुः—तोलनं तुला । अस्मिन्नेव सूत्रे 'णिलुगङोः' निपातनात् साधुरिति माधवः। उपमितिरुपमा । अत्र धात्वर्थं प्रति करणीभूतयोः दन्तवासः-शम्भु-शब्दयोस्तृतीया युक्तैव । यथा—'उपमीयतेऽनेन' इत्यादौ । प्रकृतसूत्रं शेषषष्ठ्यपवादभूततृतीयाविधायकम् नेह प्रवर्त्तते इत्यन्यदेतत् ।। (२) यद्वा "सहयुक्तेऽप्रधाने" (II. 3. 19) इति तृतीयाऽस्तु । "स्वबालभारस्य तदुत्तमाङ्गजैः समञ्चमर्येव तुलाभिलाषिणः" इत्यत्र यथा । उक्तं हि विनापि तद्योगं तृतीया "वृद्धो यूना—"(I. 2. 65) इति निदर्शनात् इति ।।" —*Śabda-kaustubha.*

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

§ 631. चतुर्थी चाशिष्यायुष्यमद्रभद्रकुशलसुखार्थहितैः ।
—(II.3.73)

दीक्षितः ।। एतदर्थैर्योगे चतुर्थी वा स्यात् पक्षे षष्ठी । आशिषि आयुष्यं चिरञ्जीवितं कृष्णाय कृष्णस्य वा भूयात् । एवं मद्रं भद्रं कुशलं निरामयं सुखं शम् अर्थः प्रयोजनं हितं पथ्यं वा भूयात् । आशिषि किम्—देवदत्तस्यायुष्यमस्ति । व्याख्यानात् सर्वत्रार्थ-ग्रहणम् । मद्रभद्रयोः पर्यायत्वादन्यतरो न पठनीयः ।

Exposition

As regards the different modes of splitting up the expression "आयुष्य......हितैः" *vide* the following note of Bhaṭṭoji : "सुखपर्यन्तानां द्वन्द्वः । ततोऽर्थशब्देन बहुव्रीहिः । तथा च द्वन्द्वान्ते श्रूयमाण-त्वात् प्रत्येकमर्थशब्दः सम्बध्यते । मद्र-भद्र-शब्दयोः पर्य्यायतया सूत्रेऽन्यतरो न पठनीयः । केचित्तु अर्थशब्दोऽपि पृथगेव निमित्तम् । व्याख्यानाच्च सर्वत्रार्थ-ग्रहणमित्याहुः ।।"—*Śabda-kaustubha*. The view referred to in the above extract from *Śabda-kaustubha* by केचित्तु is that of the author of the *Kāśikā*, where we have : "आशिषि गम्यमानायाम् आयुष्य, मद्र, भद्र, कुशल, सुख, अर्थ, हित इत्येतैर्योगे चतुर्थी विभक्तिर्भवति । चकारो विकल्पानुकर्षणार्थः ।। शेषे चतुर्थीविधानात् तया मुक्ते षष्ठी विभक्तिर्भवति । अत्रायुष्यादीनां पर्य्यायग्रहणं कर्त्तव्यम् ।" The चतुर्थी as taught by the *vārttika* "हितयोगे चतुर्थी वक्तव्या" (*Vār°* under II. 313) is compulsory where the sense of आशीः is lacking. Cf. : "हितयोगे चतुर्थी वक्तव्या इत्यस्य अनाशिषि चरितार्थत्वात् आशिषि हितयोगेऽपि अनेन विकल्पेन भाव्यम् । अन्यथाऽत्र हितग्रहणमनर्थकमिति मन्यन्ते ।।"—*Padamañjarī*.

।। इति षष्ठीविभक्तिः ।।

।। अथ सप्तमीविभक्तिः ।।

§ 632. आधारोऽधिकरणम् । —(I. 4. 45)

दीक्षितः ।। कर्त्तृकर्मद्वारा तन्निष्ठक्रियाया आधारः कारकमधि-करणसंज्ञः स्यात् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Exposition

'कारके' (I. 4. 23) changed into कारकम् relates itself with आधारः in the present *sūtra* as an adjective, so that the resultant form of the *sūtra* becomes 'आधारः कारकम्'. See *Bālmanoramā*.

§कर्त्तृकर्मद्वारा........स्यात् (Dīkṣita).—The आधारः (*substratum*) is only indirectly related with the action (क्रिया) inasmuch as the latter resides directly either in कर्त्तृ or कर्म, which again resides in the आधार (substratum). It is in virtue of this relation, though indirect (i.e. कर्त्तृकर्मद्वारा) with *action* (i. e. क्रिया) that आधार is regarded as a कारक, See our notes on the *sūtra* § 534. For the significance of the word आधार cf. *Kāśikā* : "आध्रियन्तेऽस्मिन् क्रिया इत्याधारः। कर्त्तृकर्मणोः क्रियाश्रयभूतयोः धारणक्रियां प्रति य आधारस्तत्कारकमधिकरणसंज्ञं भवति।"—Note also the definition of अधिकरण in Bhartṛhari's *Vākyapadīya* (III. 7. 148):—

"कर्त्तृकर्मव्यवहितामसाक्षात् धारयत् क्रियाम् ।
उपकुर्वत् क्रियासिद्धौ शास्त्रेऽधिकरणं स्मृतम् ।।"

§ 633 सप्तम्यधिकणे च ।—(II. 3. 36)

दीक्षितः ।। अधिकरणे सप्तमी स्यात् । चकाराद् दूरान्तिकार्थेभ्यः । औपश्लेषिको वैषयिकोऽभिव्यापकश्चेत्याधारस्त्रिधा । कटे आस्ते । स्थाल्यां पचति । मोक्षे इच्छास्ति । सर्वस्मिन्नात्मास्ति । वनस्य दूरे अन्तिके वा । "दूरान्तिकार्थेभ्यः—" (सू० ६०५) इति विभक्तित्रयेण सह चतस्रोऽत्र विभक्तयः फलिताः । 'क्तस्येन्विषयस्य कर्मण्युपसंख्यानम्' (वा० १४८५) । अधीती व्याकरणे । अधीतमनेनेति विग्रहे 'इष्टादिभ्यश्च' (सू० १८८८) इति कर्तरीनिः । 'साध्वसाधुप्रयोगे च' (वा० १४८६) । साधुः कृष्णो मातरि, असाधुर्मातुले । 'निमित्तात् कर्मयोगे' (वा० १४९०) निमित्तमिह फलम् । योगः संयोगसमवायात्मकः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"चर्मणि द्वीपिनं हन्ति दन्तयोर्हन्ति कुञ्जरम् ।
केशेषु चमरीं हन्ति सीम्नि पुष्कलको हतः ।।"

हेतुतृतीयात्र प्राप्ता । सोमा अण्डकोशः । पुष्कलको गन्धमृगः । योगविशेषे किम्—वेतनेन धान्यं लुनाति ।

Exposition

§ चकाराद् दूरान्तिकार्थेभ्यः—On the strength of the particle च 'दूरान्तिकार्थेभ्यः' follows from II. 3. 35 ("दूरान्तिकार्थेभ्यो द्वितीया च"). Thus words like दूर, अन्तिक and their synonyms can take four case-endings—viz, द्वितीया, तृतीया, पञ्चमी and सप्तमी. *Vide* § 605 and notes thereon. Cf. : "दूरान्तिकार्थेभ्यः प्राग् विभक्तित्रयमुक्तम् । अनेन च सप्तमीति तेभ्यश्चतस्रो विभक्तयः फलिताः"—*Śabda-kaustubha.*

§ औपश्लेषिको......त्रिधा—See our notes on § 560 ('साधकतमं करणम्') for the threefold classification of अधिकरण. It is to be noted however that in all these three varieties उपश्लेष is the common element. Cf. : उपश्लेषस्यास्त्यभेदस्तिलाकाशकटादिषु । उपकारास्तु भिद्यन्ते संयोगिसमवायिनाम् ।। अविनाशो गुरुत्वस्य प्रतिबन्धे स्वतन्त्रता । दिग्विशेषादवच्छेद इत्याद्या भेदहेतवः ।"—Bhartṛhari's *Vākyapadīya* (III.7.149). Also: "औपश्लेषिकवैषयिकाभिव्यापकेषु त्रिष्वपि उपश्लेषोऽस्त्येव। उपकारः सम्बन्धः। तद्भेदात्तु त्रित्वेन व्यवहारः। 'कटे आस्ते' इत्यादौ संयोगिनि आधारे कतिपयावयवव्याप्त्यैव सम्बन्धः। 'तिलेषु तैलम्' इत्यादौ समवायिनि समस्तावयवव्याप्त्या सः । खे शकुनयः इत्यादौ आकाशस्य तात्त्विकावयवाभावेन कल्पितदेशत्वात् वैषयिकम् । कल्पितदेशापेक्षया चात्रापि उक्तान्यतर उपश्लेषः। गुरौ वसतीत्यत्र शिष्यस्य गुर्वधीनायां वृत्तौ वैषयिकमधिकरणं गुरुः। उपश्लेषोऽत्र बौद्धः। 'युद्धे संनह्यती'-त्यत्र युद्धोद्देशेन कवचादिसंनहनप्रवृत्तेर्युद्धं विषयः। 'शत्रोरभावे सुखम्' इत्यादौ बौद्धमेव तत्। उपकारानाह—अविनाश इति। अविनाशस्तिलकृत उपकारस्तैलस्य। तिलविनाशे हि तैलं विशीर्णं नश्येत्। पर्यङ्के शेते इत्यादौ शयितृगुरुत्वस्य (पतनासमवायिकारणस्य) प्रतिबन्धे पर्य्यङ्कस्य स्वतन्त्रता उपकारः। खे शकुनय इत्यादौ दिग्विशेषसम्बन्धात् स्वापरिवर्तनमुपकारः। गुरुणा शिष्यस्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्काराः इत्येवमादय उपकारा ऊह्या इति ॥''—Helārāja on the *kārikā*-s cited above from *Vākyapadīya*.

§ 'क्तस्येन्......संख्यानम्'—This is *vārttika* 1 on II. 3. 36. Like अधीती व्याकरणे, we may have परिगणिती याज्ञिक्ये, आम्नाती छन्दसि etc. According to the rule 'इष्टादिभ्यश्च' (V. 2. 88) the suffix -इन् is added to words like इष्ट ending in -क्त in the sense of 'अनेन' (viz. *agent*). Thus : 'इष्टमनेन—इष्टी । इष्टी यज्ञे'. For a complete list of इष्टादि *vide* the *gaṇa-pāṭha* under V. 2. 88.

§ साध्वसाधुप्रयोगे च—This is *vārttika* 2. "अत्र साधुत्वासाधुत्वयोर्मातापितृविषयत्वेऽपि क्रियाया अभावात् अधिकरणत्वाभावाद् वचनम् ''—*Padamañjarī*. The subsequent rule § 640 :' साधुनिपुणाभ्यामर्चायां—' (II. 3. 43) has its application when the sense of अर्चा is comprehended, while the present *vārttika* applies also to cases where the senses of अर्चा is lacking, Vide *Bālamanoramā*. Nor can it be said that the mention of 'साधु' in the subsequent rule is superfluous on account of the existence of the present *vārttika*, for the Sūtrakāra had no knowledge of the *vārttika*, the *varttika*-s being later in date. Cf. :

'सूत्रे अर्चाग्रहणं तु निपुणार्थम् । साधुग्रहणं तु तत्र
वार्त्तिकं दृष्ट्वा सूत्रस्याप्रवृत्तेरिति ध्येयम् ॥'

—*Śabdenduśekhara*,

§ निमित्तात् कर्मसंयोगे—This is *vārttika* §6. 'योगे' in the *vārttika* means either the relation of संयोग or of समवाय. This *vārttika* overrides हेतुतृतीया in 'चर्मणि द्वीपिनं हन्ति' etc. Cf. : "अत्र हेतुतृतीया प्राप्ता । तत्र हि फलमपि हेतुशब्देन गृह्यते 'अध्ययनेन वसति' इत्यादिसिद्धये इति 'प्रत्ययः' (III. 1. 1) इति सूत्रे कैयटे स्थितम् । अत्र द्वीपिचर्मणोः समवायः सम्बन्धः।...पुष्कलकः शङ्कुः । स सीम्नि सीमज्ञानार्थं हतो निहतः निखात इत्यर्थः । निहन्यमानेन शङ्कुना सह सीम्नः संयोगः सम्बन्धः इति हरदत्तादयः । दुर्गवाक्यप्रबोधे कुलचन्द्रस्त्वाह—सीमा अण्डकोशः । पुष्कलको गन्धमृगः । उक्तं च मेदिनीकोशे—'सीमा घाटस्थितिक्षेत्रेष्वण्डकोशेषु च स्त्रियाम् ।' इति । 'अथ पुष्कलको गन्धमृगे क्षपणकीलयोः' इति च ।"—*Śabda-kaustubha*. The verse 'चर्मणि द्वीपिनं हन्ति—'is found

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

in the *Bhāṣya*. The *vārttikas* §3—5 (viz. कारकार्हाणां च कारकत्वे। अकारकार्हाणां चाकारकत्वे। तद्विपर्य्यासे च), as recorded in the *Mahābhāṣya*, are left out here, as सप्तमी in those cases can be explained by the subsequent *sūtra* (§ 634: 'यस्य च भावेन—'). Cf.: "अर्हाणां कर्त्तृत्वे; अनर्हाणामकर्त्तृत्वे तद्वैपरीत्ये च।' सत्सु तरत्सु असन्त आसते इत्यादि। यद्यपीदं 'यस्य च भावेन—' (II. 3. 37) इत्यव सिद्धम् तथापि लक्ष्यलक्षणभावाविवक्षायामपि यथा स्यादिति वचनमित्याहुः॥" —*Śabda-kaustubha*. They are read under the subsequent rule (§ 634.)

§ 634. यस्य च भावेन भावलक्षणम्॥—(II. 3. 37)

दीक्षितः॥ यस्य क्रियया क्रियान्तरं लक्ष्यते ततः सप्तमी स्यात्। गोषु दुह्यमानासु गतः। अर्हाणां कर्तृत्वेऽनर्हाणामकर्तृत्वे तद्वैपरीत्ये च। सत्सु तरत्सु असन्त आसते। असत्सु तिष्ठत्सु सन्तस्तरन्ति। सत्सु तिष्ठत्सु असन्तस्तरन्ति। असत्सु तरत्सु सन्तस्तिष्ठन्ति।

Exposition

भाव means क्रिया. So Bhaṭṭoji says 'यस्य क्रियया—' etc. लक्षण means any *antecedent* (action) that serves to determine another action. In short, here it refers to any निमित्त whatsoever partaking of the nature of an action (भाव=क्रिया). Cf.: "न खल्ववश्यं तदेव लक्षणं भवति, येन पुनः पुनर्लक्ष्यते सकृदपि यन्निमित्ताय कल्पते तदपि लक्षणं भवति। तद् यथा। अपि भवान् कमण्डलुपाणिं छात्रमद्राक्षीदिति। सकृदसौ कमण्डलुपाणिर्दृष्टश्छात्रस्तस्य तदेव लक्षणं भवति॥" —*Mahābhāṣya*, Vol. I, p. 459 (Kielhorn's Edn.). Thus in 'गोषु दुह्यमानासु—' etc. the दोहनक्रिया of गो (यस्य क्रियया) determines the subsequent गमनक्रिया. So गो takes the seventh case-ending. *Vide* the definition of लक्षण in *Śabda-kaustubha*—"निर्ज्ञातकाला हि क्रिया अनिर्ज्ञात-कालायाः क्रियायाः कालपरिच्छेदकत्वात् लक्षणमित्युच्यते॥" So also *Padamañjarī*.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Why भावेन ?—"भावेनेति किम् ? यो जटाभिः स भुङ्क्ते ॥"—*Kāśikā*.

Why the second भाव in भावलक्षणम् ?—"पुनर्भावग्रहणं किम् ? यो भुङ्क्ते स देवदत्तः"—*ibid*.

"अर्हाणां.....च"—*Vide* our notes on § 633.

§ 635. षष्ठी चानादरे ॥—(II. 3. 38)

दीक्षितः ॥ अनादराधिक्ये भावलक्षणे षष्ठीसप्तम्यौ स्तः । रुदति रुदतो वा प्राव्राजीत् । रुदन्तं पुत्रादिकमनादृत्य संन्यस्तवानित्यर्थः ।

Exposition

§ अनादराधिक्ये......स्तः (Dikṣita)—Where, in addition to भावलक्षण, the element of अनादर is conveyed, the word expressive of the *substratum of the action* (भाववत्) takes both षष्ठी and सप्तमी, instead of सप्तमी alone according to the previous rule (§ 634). Cf. : "इह सूत्रे अनादरे इति पूर्वेण (II. 3. 37) सत्सप्तमी । अनादरे सति यो भावं लक्षयतीति । तथा च तदाधिक्यं फलितम्"—*Śabdakaustubha*.

§ 636. स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैश्च । —(II. 3. 39).

दीक्षितः ॥ एतैः सप्तभिर्योगे षष्ठीसप्तम्यौ स्तः । षष्ठ्यामेव प्राप्तायां पाक्षिकसप्तम्यर्थं वचनम् । गवां गोषु वा स्वामी । गवां गोषु वा प्रसूतः । गा एवानुभवितुं जात इत्यर्थः ।

Exposition

"स्वामीश्वराधिपतीनाम् एकार्थत्वेऽपि भेदेन उपादानं पर्य्यायान्तरनिवृत्त्यर्थम् । इह मा भूत् । ग्रामस्य राजेति ।"—*Nyāsa*.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

§ 637. आयुक्तकुशलाभ्यां चासेवायाम् ।—(II. 3. 40)

दीक्षितः ।। आभ्यां योगे षष्ठीसप्तम्यौ स्तस्तात्पर्येऽर्थे । आयुक्तो व्यापारितः । आयुक्तः कुशलो वा हरिपूजने हरिपूजनस्य वा । आसेवायां किम्--आयुक्तो गौः शकटे । ईषद्युक्त इत्यर्थः ।

Exposition

आयुक्तः व्यापारितः । आसेवा means तात्पर्य्यं—i. e., 'exclusive attachment to any particular action' : 'तात्पर्य्यञ्च तदेकव्यापारवत्ता' —Nāgeśa.—In 'आयुक्तो गौः शकटे', however, आङ् (in आयुक्त) is prefixed in ईषदर्थ.'

§ 638. यतश्च निर्द्धारणम् ।—(II. 3. 41)

दीक्षितः ।। जातिगुणक्रियासंज्ञाभिः समुदायादेकदेशस्य पृथक्करणं निर्द्धारणं यतस्ततः षष्ठीसप्तम्यौ स्तः । नृणां नृषु वा ब्राह्मणः श्रेष्ठः । गवां गोषु वा कृष्णा बहुक्षीरा । गच्छतां गच्छत्सु वा धावञ्छीघ्रः । छात्राणां छात्रेषु वा मैत्रः पटुः ।

Exposition

§ जाति.......निर्द्धारणम्—This is the definition of निर्द्धारण. Where something, a portion (एकदेश), be it a group or an individual, is separated from another group within which it is comprised (समुदाय) by means of जाति (*universal*), गुण (*quality*), क्रिया (*action*) or संज्ञा (*name*), it is regarded as a case of निर्द्धारण. In the definition of निर्द्धारण as given in the *Kāśikā*, no mention is made of संज्ञा (*name*) as a distinguishing element. Cf. "जातिगुणक्रियाभिः समुदायादेकदेशस्य पृथक्करणं निर्द्धारणम् ।"—on which, however, Haradatta comments as follows : "जातिगुणक्रियाभिरिति प्रदर्शनमेतत् । समीपं छात्राणां देवदत्तः पटुरिति संज्ञयाऽपि निर्द्धारणदर्शनात् ।—*Padamañjarī*. According to *Nyāsa*, this *sūtra*

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

has nothing but an illustrative function and, as such, is only an elaboration. As he says: "किमर्थं पुनरिदम् ? यावता निर्द्धार्य्यमाणोऽवयवः समुदायान्तर्भूतः । तत्र यदा समुदायस्याधिकरणत्वं विवक्ष्यते, तदा सप्तमी सिद्धैवेति । यथा—वृक्षे शाखेति । यदा तु अवयवावयविसम्बन्धस्तदा षष्ठी । यथा—वृक्षस्य शाखेति । सत्यमेतत् । प्रपञ्चार्थं वचनम् ॥"—*Nyāsa*.

§ 639. पञ्चमी विभक्ते ।—(II. 3. 42)

दीक्षितः ॥ विभागो विभक्तम् । निर्धार्यमाणस्य यत्र भेद एव तत्र पञ्चमी स्यात् । माथुराः पाटलिपुत्रकेभ्य आढ्यतराः ।

Exposition

§ **विभागो विभक्तम्**—i. e. विभक्त is formed by the addltion of the suffix -क्त in भाववाच्य : "भावे क्तप्रत्ययाश्रयणादिति भावः'—*Bālamanoramā*. So it means *distinction* (भेद), *distinction* that is already existent (भेद एव), a *fait accompli*.

§ **निर्द्धार्यमाणस्य........स्यात्**—This serves to differentiate the scopes of the two rules (§§ 638 and 639). When two things stand in the relation of *part* or *species* (एकदेश) and *whole* (समुदाय) and when the former is to be distinguished from the latter on the basis of some जाति, गुण, क्रिया or संज्ञा, then it is a case for the application of the rule § 638. (i. e. 'यतश्च निर्द्धारणम्'). But when those two things are already granted as distinct, and जाति, गुण etc. are merely assigned as the distingushing attributes between them, then the present rule (§ 639) applies. Thus in the instance 'माथुराः पाटलिपुत्रकेभ्यः आढ्यतराः' the Māthuras (i. e. inhabitants of Mathurā) and the Pāṭaliputrakas (i. e. inhabitants of Pāṭaliputra) are two distinct groups. The attribute आढ्यतर serves only to show the ground of that distinction which is an accomplished fact. It is to be noted that as in the case of the previous rule (§ 638) the two things need not stand in the relation of

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सामान्य (*universal*) and विशेष (*species*, *particular*). Thus 'गवां कृष्णा बहुक्षीरा' cannot be brought under the application of the present rule as the relation between गो and कृष्णा (गौः) is that of *universal* and *particular*, while in माथुराः......etc. there is no such relation between the माथुर's and the पाटलिपुत्रक's. *Vide* : "सर्वत्रैव निर्द्धारणाश्रये विभक्तमस्तीति सामर्थ्यात् अवधारणमाश्रीयते। यस्मिन् निर्द्धारणाश्रये विभाग एव, न केनचिदात्मभाव इति। तेन गवां कृष्णेत्यादौ यद्यपि गोमण्डलात् कृष्णा गौः पृथक् क्रियते, तथापि गवात्मनान्तर्भावोऽस्तीति न भवति। उदाहरणे तु माथुराणां पाटलिपुत्रेषु प्राणित्वेनान्तर्भावेऽपि शब्दोपात्ताकारापेक्षयानन्तर्भावाद् विभाग एव भवति॥"—*Padamañjarī*. See also *Bhāṣya* on II. 3. 42. The present *sūtra* has been considered as superfluous by the Bhāṣyakāra, as पञ्चमी in such cases as माथुराः.........etc. can be justified by 'अपादाने पञ्चमी'. *Cf.* : "प्रत्याख्यातं चैतत् सूत्रमपादानप्रकरणे।

"बुद्ध्या समीहितैकत्वान् पञ्चालान् कुरुभिः पृथक्।
यदा विभजते वक्ता तदाऽपायः प्रतीयते॥" इति।[1]

—*Padamañjarī*. पञ्चमी according to this rule overrides षष्ठी and सप्तमी enjoined by § 638 : 'षष्ठीसप्तम्यपवादो योगः'—*Kāśikā*.

§ 640. साधुनिपुणाभ्यामर्चायां सप्तम्यप्रतेः।—(II. 3. 43)

दीक्षितः॥ आभ्यां योगे सप्तमी स्यादर्चायाम्, न तु प्रतेः प्रयोगे। मातरि साधुर्निपुणो वा। अर्चायां किम्—निपुणो राज्ञो भृत्यः। इह तत्त्वकथने तात्पर्य्यम्। 'अप्रत्यादिभिरिति वक्तव्यम्' (वा° १४९३)। साधुर्निपुणो वा मातरं प्रति परि अनु वा।

Exposition

With regard to साधु see our notes on the *vārttika* : 'साध्वसाधुप्रयोगे च' under *sūtra* § 633 : 'साधुप्रयोगे तु अनर्चायामपि सप्तमी भवत्येव'—*Śabda-kaustubha*.

§ अर्चायां.......तात्पर्य्यम्—"निपुणो राज्ञो भृत्यः" is a mere statement of fact (तत्त्वकथन), and no praise (अर्चा) is implied. Cf :

1. *Vākya-padīya*, III. 7. 4

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'तत्त्वकथने न भवति'—*Kāśikā*. Bhaṭṭoji does not cite any counter-instance (प्रत्युदाहरण) with साधु, inasmuch as साधु can govern सप्तमी even when it does not mean अर्चा. Cf. : "साधु निपुणाभ्याम्" इत्येव सिद्धे अर्च्चार्थमत्र साधुग्रहणम्, तेन तत्त्वकथनेऽपि भवति। अर्चाग्रहणं तत्र निपुणार्थम्। कथं तर्हि तत्र प्रत्युदाहरिष्यते—अर्चायामिति किम् ? 'साधुर्भृत्यो राज्ञः' इति ? उच्यते। राज्ञो भृत्येन सह शाब्दोऽन्वयः, न साधुना। राज्ञो भृत्यः स साधुरिति। तत्र राजनि वा अन्यत्र वा इति नैतत् शब्देन स्पृश्यते, प्रत्यासत्त्या तु राजविषयमेव साधुत्वं गम्यते इत्येतावता तत् प्रत्युदाहरणं द्रष्टव्यम्"—*Padamañjarī* on the *vārttika* : 'साध्वसाधुप्रयोगे च' under II. 3. 36. Also—"साधुर्भृत्यो राज्ञ इति। पूर्वमेवैतद् दूषितमुपपादितं च। निपुणः पुत्रो मातुरिति तु तत्त्वकथने न्याय्य प्रत्युदाहरणम्"—on II. 3. 43.

§ 'अप्रत्यादिभिरिति वक्तव्यम्'—This is a *ruling* (इष्टि) of the Bhāṣyakāra. By प्रत्यादि is meant परि and अनु besides प्रति, as they are read together in I. 4. 90 (§552 : 'लक्षणेत्थम्भूताख्यानः—')

§ 641. प्रसितोत्सुकाभ्यां तृतीया च।—(II. 3. 44)

दीक्षितः ।। आभ्यां योगे तृतीया स्यात्, चात् सप्तमी। प्रसित उत्सुको वा हरिणा हरौ वा।

Exposition

'प्रसित' means 'too much attached' (आसक्त). Cf. 'प्रसित इत्युच्यते। कः प्रसितो नाम ? यस्तत्र नित्यं प्रतिबद्धः। कुत एतत् ? सिनोतिरयं बध्नात्यर्थे वर्त्तते। बद्ध इवासौ तत्र भवति ।।"—*Mahābhāṣya*. See also *Amara°* : "तत्परे प्रसितासक्तौ इष्टार्थोद्युक्त उत्सुकः (III. 1. 7) Also "उत्सुकसाहचर्य्यात् प्रसितोऽपि तत्पर एवेह गृह्यते। तेन प्रकर्षेण सितः शुक्ल इत्यर्थे न भवति।"—*Śabda-kaustubha*.

642. नक्षत्रे च लुपि।—(II. 3. 45)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दीक्षितः ।। नक्षत्रे प्रकृत्यर्थे यो लुप्संज्ञया लुप्यमानस्य प्रत्ययस्यार्थस्तत्र वर्त्तमानात् तृतीयासप्तम्यौ स्तोऽधिकरणे । 'मूलेनावाहयेद् देवीं श्रवणेन विसर्जयेत् ।' मूले श्रवणे इति वा । लुपि किम्—पुष्ये शनिः ।

Exposition

§ **नक्षत्रे प्रकृत्यर्थे यो लुप्संज्ञया लुप्यमानस्य प्रत्ययस्यार्थस्तत्र वर्तमानात्**—(Dikṣita) : This is taken from Haradatta's *Padamañjarī*. *Kāśikā* has a simpler interpretation—viz. 'लुबन्तात् नक्षत्रशब्दात्' in which case the two seventh case-endings (सप्तमी) are in the sense of the fifth case-ending (पञ्चमी). But Haradatta finds fault with this construction. As he abserves : "नक्षत्रे प्रकृत्यर्थे सति यो लुप्संज्ञया लुप्यमानस्य प्रत्ययस्यार्थस्तत्र वर्त्तमानात् इति सूत्राक्षरान्वयः। यच्चोच्यते—नक्षत्रे लुपीति पञ्चम्यर्थे सप्तमी लुबन्तात् नक्षत्रवाचिन इत्यर्थ इति। तत्र 'उत्तराभ्यां फल्गुनीभ्यां नोत्तरा गच्छेत्' इति विशेषणात् न स्यात्, तस्य अलुबन्तत्वात् । कथं तर्हि लुबन्तात् नक्षत्राभिधायिनः शब्दात् इति वृत्तिः ? प्रायोवृत्त्या एतदुक्तम्—लुबन्तार्थाभिधायी प्रायेण लुबन्तो भवति । लुबर्थाभिधायिनः शब्दमात्रादित्यर्थः ।"

§ **'मूलेनावाहयेद् देवीं श्रवणेन विसर्जयेत्'**—मूल and श्रवण are formed by the addition of the suffix -अण् (according to 'नक्षत्रेण युक्तः कालः'—IV. 2. 3) to मूल and श्रवण (names of constellations). The suffix is elided by the rule : 'लुबविशेषे' (IV. 2. 4). Thus 'मूल' and 'श्रवण' are words that satisfy the above interpretation—viz. 'नक्षत्रे......वर्त्तमानात्'.

Why 'नक्षत्रे' ?—'नक्षत्रे इति किम् ? पञ्चालेषु वसति ।'—Here पञ्चाल is not the name of a constellation, but of a country.

Why लुपि ?—'लुपीति किम् ? मघासु ग्रहः'—Here the suffix -अण् has neither been added nor elided. सप्तमी here conveys merely the idea of सामीप्य (proximity). Cf. " 'मघासु ग्रह' इति । सामीप्येऽधिकरण एव सप्तमी, अत्र 'नक्षत्रेण युक्तः कालः' (IV. 2. 3) इत्यर्थस्य अविवक्षितत्वात् अण् न भवति ।"—*Nyāsa*. So also 'पुष्ये शनिः'.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

§ 643. सप्तमीपञ्चम्यौ कारकमध्ये।–(II. 3. 7)

दीक्षितः ।। शक्तिद्वयमध्ये यौ कालाध्वानौ ताभ्यामेते स्तः । अद्य भुक्त्वायं द्व्यहे द्व्यहाद्वा भोक्ता । कर्तृशक्त्योर्मध्येऽयं कालः । इहस्थोऽयं क्रोशे क्रोशाद्वा लक्ष्यं विध्येत् । कर्तृकर्मशक्त्योर्मध्येऽयं देशः। अधिकशब्देन योगे सप्तमीपञ्चम्याविष्येते । 'तदस्मिन्नधिकम्—' (सू० १८४६) इति 'यस्मादधिकम्—' (सू० ६४५) इति च सूत्रनिर्देशात् । लोके लोकाद्वा अधिको हरिः ।

Exposition

'कालाध्वनोः' follows in this *sūtra* from 'कालाध्वनोरत्यन्तसंयोगे' (II. 3. 5). सप्तमी and **पञ्चमी** are used after words denoting specific काल and specific अध्वन्, when they consitute the interval between two कारकs. By कारक is meant कारकशक्ति—i. e., कर्तृशक्ति, कर्मशक्ति etc., and not कर्तृ, कर्म etc.[1] This is arrived at by interpretation (व्याख्यान). So Bhaṭṭoji explains 'कारकमध्ये' as 'शक्तिद्वयमध्ये'.

§**अद्य भुक्त्वायं द्व्यहे द्व्यहाद्वा भोक्ता। कर्तृशक्त्योर्मध्येऽयं कालः**—(Dikṣita): Here though the agent (कर्तृकारक) is one (अयं) yet कर्तृशक्ति (*agency*) differs : for कर्तृशक्ति of the agent of to-day's *action of eating* (भुजिक्रिया) is different from that of the same agent after two days' interval. Thus द्व्यह is *in between* two different कर्तृशक्ति-s. *Vide* :'अद्य भुक्त्वेत्यादि । ननु चात्र देवदत्तः एकः कर्त्ता । तत् कथं कारकयोर्मध्ये काल इत्याह । 'कर्तृशक्त्योरिति ।' स्यादेवं यदि द्रव्यं कारकं स्यात् शक्तिस्तु कारकम् । सेह भिद्यते। एका अद्य भुजेः साधनमपरा द्व्यहभुजेः। तेनानयोर्मध्ये काल इति ।'—*Padamañjarī*. Similarly with 'इहस्थोऽयं' etc.

---

1. Vide *Vākyapadīya*, III. 7.28-31, 34, 35 etc. 'शक्ति—.... Power possessed by a thing to bring about an activity, generally known as कारकशक्ति which is of six kinds."—K. V. Abhyankar &V. P. Limaye : *Vākyapadīya* (Poona, 1965/Appendix V).

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Here no यथासंख्यान्वय is intended : 'संख्यातानुदेशो न भवति, अस्वरितत्वात् ।'—*Kāśikā*. Also—'कालाध्वभ्यां विभक्त्योर्यथासंख्यं न भवति, अस्वरितत्वात् ।'—*Śabda-kaustubha*.

§ अधिकशब्देन......अधिको हरिः (Dīkṣita)—The following note of Nāgeśa on this point is worth notice : "कर्त्तरि क्तप्रत्ययान्ताध्यारूढ़-शब्दार्थकाधिकशब्दयोगे लोकशब्दात् षष्ठ्यां प्राप्तायां ज्ञापकादिमे इष्येते इत्यर्थः । 'तदस्मिन्नधिकम्—' इति सूत्रे भाष्ये तु उपश्लिष्टपदाध्याहारेण औपश्लेषिकेऽधिकरणे सप्तमीत्युक्तम् । कर्मणि क्तप्रत्ययान्ताध्यारुढ़शब्दार्थकाधिकशब्दयोगे तु अधिको लोको हरिणा इति प्रथमैव"—*Laghu-śabdendu-śekhara*. Thus Nāgeśa distinguishes between *two* meanings of अधिक, though this distinction is too subtle to be usually noticed.

§ 644. अधिरीश्वरे ।—(I. 4. 97)

दीक्षितः ।। स्वस्वामिसम्बन्धे अधिः कर्मप्रवचनीयसंज्ञः स्यात् ।

Exposition

This *sūtra* is under the section 'कर्मप्रवचनीयाः' (I. 4. 83). अधि is regarded as कर्मप्रवचनीय when it suggests the relation of स्वस्वामिभाव. The idea of स्वस्वामिभावसम्बन्ध naturally follows from the connotation of the term ईश्वर. As *Kāśikā* observes : "ईश्वरः स्वामी । स च स्वमपेक्षते । तदयं स्वस्वामिभावसम्बन्धे कर्मप्रवचनीयसंज्ञो भवति ।"

§ 645. यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी । —(II. 3. 9)

दीक्षितः ।। अत्र कर्मप्रवचनीययुक्ते सप्तमी स्यात् । उप परार्धे हरेर्गुणाः, परार्धादधिका इत्यर्थः । ऐश्वर्य्ये तु स्वस्वामिभ्यां पर्य्यायेण सप्तमी । अधि भुवि रामः । अधि रामे भूः । 'सप्तमी शौण्डैः' (सू० ७१७) इति समासपक्षे तु रामाधीना । 'अषड़क्ष—' (सू० २०७९) इत्यादिना खः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Exposition

'कमप्रवचनीययुक्ते' follows from the previous rule, viz. II. 3. 8 ('कर्मप्रवचनीययुक्ते द्वितीया').

§ उप परार्धे हरेर्गुणाः परार्धादधिका इत्यर्थः (Dīkṣita)—In 'उप परार्धे हरेर्गुणाः' उप is used as कर्मप्रवचनीय conveying the sense of आधिक्य, according to the rule § 551 : 'उपोऽधिके च' (I. 4. 87). *Vide* our notes thereon. सप्तमी is used after परार्द्धे (यस्माद्धिकम्) according to the present rule instead of द्वितीया according to II. 3. 8 : 'द्वितीयाऽपवादो योगः'—*Kāśikā.*

§ ऐश्वर्य्ये तु स्वस्वामिभ्यां पर्य्यायेण सप्तमी । अधि भुवि रामः । अधि रामे भूः (Dīkṣita)—Cf. "यस्य चेश्वरवचनमिति स्वस्वामिनोर्द्वयोरपि पर्य्यायेण सप्तमी विभक्तिर्भवति"—*Kāśikā*, on which the *Padamañjarī* comments as follows : "द्वयमनेन उच्यते । द्वयोरपि भवति । तत्रापि पर्य्यायेणेति । तत्र द्वयोरपि तावद् भवति । कथम् ? ईश्वर उच्यते येन तदीश्वरवचनम् ऐश्वर्य्यम् । अथवा ईश्वरशब्दो भावप्रधानः, ईश्वरत्वस्योक्ति-रीश्वरवचनम्, यस्य स्वामिनः ईश्वरत्वमुच्यते ततः सप्तमीत्यर्थः । अथवा यस्येति स्वं निर्दिश्यते यस्य स्वस्य ईश्वर उच्यते ततः स्यात्, सप्तमीत्यर्थः । पर्य्यायेण वा भवति । शेषविषये कर्मप्रवचनीयविभक्त्यारम्भादेकत उत्पन्नया विभक्त्या द्विष्ठस्यापि सम्बन्धस्याभिधानात् ।"— See also *Mahābhāṣya* on II. 3. 9.

§ 'सप्तमी शौण्डैः' इति समासपक्षे तु रामाधीना । 'अषड्क्ष—' इत्यादिना खः (Dīkṣita)—अधि can be compounded with a सप्तम्यन्त word—e. g. रामे अधि, according to the rule 'सप्तमी शौण्डैः' (II. 1.40), as अधि is included in the शौण्डादिगण. And, when अधि is thus compounded the suffix -ख (-ईन) is added to the compound according to the rule 'अषड्क्ष—'(V. 4. 7), so that the resultant compound form is 'रामाधीन'. अव्ययीभाव compound is admissible too when विभक्त्यर्थ is intended. Cf. "विभक्त्यर्थवृत्तित्वे तु अव्ययीभावः । अधिरामम् ।"—*Śabda-kaustubha.*

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

In the *Bhāṣya* : the portion 'यस्य चेश्वरवचनम्' of the present *sūtra* is considered as superfluous. Cf. :—

"एवं तर्हि स्ववचनात् सिद्धम्। अधिः स्वं प्रति कर्मप्रवचनीयसंज्ञो भवतीति वक्तव्यम् (I. 4. 9)। एवमपि यदा ब्रह्मदत्तेऽधिकरणे सप्तमी, तदा पञ्चालेभ्यो द्वितीया प्राप्नोति। उपपदविभक्तेः कारकविभक्तिर्बलीयसीति भविष्यति।"—*Op. cit.,* Vol. I. p. 448 (Kielhorn's Edn.).

See also *Śabda-kaustubha* : "इह सूत्रे यस्य चेश्वरवचनमित्यंशः प्रत्याख्यातो भाष्ये। तथाहि स्वामिनि आधारे भूः स्थिता। तस्याञ्च स्वामी। तत्र यदा यद् अधिकरणत्वेन विवक्ष्यते तदा तत्र सप्तमी भविष्यति। एवं चाधिरीश्वरे इति संज्ञासूत्रमपि न कर्त्तव्यम्। न च गत्युपसर्गत्वबाधार्थं तत्। ऐश्वर्य्यविषयस्य अधेः क्रियायोगाभावेनैव तदप्राप्तेः। उत्तरार्थम् (I. 4. 98) इति चेत् तर्हि योगविभागो न कार्य्यः।"—Thus according to the Bhāṣyakāra सप्तमी in such instances as 'अधि पञ्चालेषु ब्रह्मदत्तः' or 'अधि ब्रह्मदत्ते पञ्चालाः' can be justified by 'सप्तम्यधिकरणे च' (II. 3. 36), and no separate provision is required for defending such usages.

§ 646. विभाषा कृञि।—(I. 4. 98)

दीक्षितः ।। अधिः करोतौ प्राक्संज्ञो वा स्यादीश्वरेऽर्थे। यदत्र मामधि करिष्यति। विनियोक्ष्यत इत्यर्थः। इह विनियोक्तुरीश्वरत्वं गम्यते। अगतित्वात् 'तिङि चोदात्तवति' (सू° ३९७८) इति निघातो न।

Exposition

Both 'अधिः' and 'ईश्वरे' follow from the preceding rule—viz. I. 4. 97 (§ 644). 'प्राक्संज्ञः'—i. e. कर्मप्रवचनीयसंज्ञः. Thus अधि can *optionally* (विभाषा) be regarded as कर्मप्रवचनीय when it is followed by √कृञ्, and when it has the sense of ऐश्वर्य्य. Thus when it is not regarded as कर्मप्रवचनीय, it is considered as गति by the rule 'गतिश्च' (I. 4. 60) and as such it is accented as a गति is accented (i. e., becomes अनुदात्त), when it is followed

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

by a तिङन्त form having an उदात्त syllable according to the rule 'तिङि चोदात्तवति' (VIII. 2. 71). Otherwise—i.e., when it is a कर्मप्रवचनीय, it does not become enclitic (निहत, अनुदात्त) and retains its usual accent (i. e., आद्युदात्त). Cf. "अधिकरिष्यति। अत्र 'निपातैर्यद्यदी'-त्यादिना (VIII. 1. 30) निघाते प्रतिषिद्धेऽस्य प्रकृतिस्वरेणाद्युदात्तत्वं भवति।"—*Nyāsa*. See also: "इह 'तिङि चोदात्तवति' (VIII. 1.71) इति निघातो न, गतिसंज्ञाया बाधितत्वात्। किञ्च, 'मामधिकृत्वा' इत्यत्र प्रादिसमासो न। कर्मप्रवचनीयानां प्रतिषेध इत्युक्तेः। पक्षे 'अधिकृत्य' इति बोध्यम्।"—*Śabda-kaustubha*.

॥ इति सप्तमी विभक्तिः ॥

******

॥ इति कारकप्रकरणम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

APPENDIX I

कारकप्रकरणस्थ–सवार्तिक-सूत्रानुक्रमणिका

कारके १।४।२३ (५३४)
ध्रुवमपायेऽपादानम् १।४।२४ (५८६)
* जुगुप्साविरामप्रमादार्थानामुपसंख्यानम् (वा)
भीत्रार्थानां भयहेतुः १।४।२५ (५८८)
पराजेरसोढ़ः १।४।२६ (५८९)
वारणार्थानामीप्सितः १।४।२७ (५९०)
अन्तर्द्धौ येनादर्शनमिच्छति १।४।२८ (५९१)
आख्यातोपयोगे १।४।२९ (५९२)
जनिकर्तुः प्रकृतिः १।४।३० (५९३)
भुवः प्रभवः १।४।३१ (५९४)
कर्मणा यमभिप्रैति स सम्प्रदानम् १।४।३२ (५६९)
* क्रियया यमभिप्रैति सोऽपि सम्प्रदानम् (वा)
* कर्मणः करणसंज्ञा सम्प्रदानस्य च कर्मसंज्ञा वक्तव्या (वा)
रुच्यर्थानां प्रीयमाणः १।३।३३ (५७१)
श्लाघह्नुङ्स्थाशपां ज्ञीप्स्यमानः १।४।३४ (५७२)
धारेरुत्तमर्णः १।४।३५ (५७३)
स्पृहेरीप्सितः १।४।३६ (५७४)
क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः १।४।३७ (५७५)
क्रुधद्रुहोरुपसृष्टयोः कर्म १।४।३८ (५७६)
राधीक्ष्योर्यस्य विप्रश्नः १।४।३९ (५७७)
प्रत्याङ्भ्यां श्रुवः पूर्वस्य कर्ता १।४।४० (५७८)
अनुप्रतिगृणश्च १।४।४१ (५७९)
साधकतमं करणम् १।४।४२ (५६०)
दिवः कर्म च १।४।४३ (५६२)
परिक्रयणे सम्प्रदानमन्यतरस्याम् १।४।४४ (५८०)
आधारोऽधिकरणम् १।४।४५ (६३२)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अधिशीङ्स्थासां कर्म १।४।४६ (५४२)
अभिनिविशश्च १।४।४७ (५४३)
उपान्वध्याङ्वसः १।४।४८ (५४४)
* वसेरश्यर्थस्य प्रतिषेधः (वा)
कर्तुरीप्सिततमं कर्म १।४।४९ (५३५)
तथायुक्तं चानीप्सितम् १।४।५० (५३८)
अकथितञ्च १।४।५१ (५३९)
* अकर्मकधातुभिर्योगे देशः कालो भावो गन्तव्योऽध्वा च कर्मसंज्ञक इति वाच्यम् (वा)
गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणिकर्ता स णौ १।४।५२ (५४०)
* जल्पतिप्रभृतीनामुपसंख्यानम् (वा)
* दृशेश्च (वा)
* आदिखाद्योर्न (वा)
* नीवह्योर्न (वा)
* नियन्तृकर्तृकस्य वहेरनिषेधः (वा)
* भक्षेरहिंसार्थस्य न (वा)
* शब्दायतेर्न (वा)
हृक्रोरन्यतरस्याम् १।४।५३ (५४१)
* अभिवादिदृशोरात्मनेपदे वेति वाच्यम् (वा)
स्वतन्त्रः कर्ता १।४।५४ (५५९)
[तत्प्रयोजको हेतुश्च १।४।५५ (२५७५)]

—o—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

APPENDIX II

विभक्तिप्रकरणस्थ-सवार्तिक सूत्रानुक्रमणिका

अनभिहिते २।३।१ (५३६)

* तिङ्कृत्तद्धितसमासैः परिसंख्यानम् (वा)

कर्मणि द्वितीया २।३।२ (५३७)

* उभसर्वतसोः कार्या धिगुपर्यादिषु त्रिषु ।
द्वितीयाम्रेड़ितान्तेषु ततोऽन्यत्रापि दृश्यते ।। (वा)

* अभितः-परितः-समया-निकषा-हा-प्रतियोगेऽपि (वा)

अन्तरान्तरेण युक्ते २।३।४ (५४५)

कालाध्वनोरत्यन्तसंयोगे २।३।५ (५५८)

अपवर्गे तृतीया २।३।६ (५६३)

सप्तमीपञ्चम्यौ कारकमध्ये २।३।७ (६४३)

कर्मप्रवचनीययुक्ते द्वितीया २।३।८ (५४८)

यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी २।३।९ (६४५)

पञ्चम्यपाङ्परिभिः २।३।१० (५९८)

प्रतिनिधि-प्रतिदाने च यस्मात् २।३।११ (६००)

गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि २।३।१२ (५८५)

चतुर्थी सम्प्रदाने २।३।१३ (५७०)

* तादर्थ्ये चतुर्थी वक्तव्या (वा)

* क्लृपि सम्पद्यमाने च (वा)

* उत्पातेन ज्ञापिते च (वा)

* हितयोगे च (वा)

क्रियार्थोपपदस्य च कर्मणि स्थानिनः २।३।१४ (५९१)

तुमर्थाच्च भाववचनात् २।३।१५ (५८२)

नमःस्वस्तिस्वाहास्वधालंवषड्योगाच्च २।३।१६ (५८३)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

* अलमिति पर्य्याप्त्यर्थग्रहणम् (वा)

मन्यकर्मण्यनादरे विभाषाऽप्राणिषु २।३।१७ (५८४)

* अप्राणिष्वित्यपनीय नौकाकान्नशुकशृगालवर्जेष्विति वाच्यम् (वा)

(नौ काक अन्न शुक शृगाल इति नावादयः)

कर्तृकरणयोस्तृतीया २।३।१८ (५६१)

* प्रकृत्यादिभ्य उपसंख्यानम् (वा)

(प्रकृति-प्राय-गोत्र-सम-विषम-द्विद्रोण-पञ्चक-साहस्र-इति प्रकृत्यादयः)

सहयुक्तेऽप्रधाने २।३।१९ (५६४)

येनाङ्गविकारः २।३।२० (५६५)

इत्थम्भूतलक्षणे २।३।२१ (५६६)

संज्ञोऽन्यतरस्यां कर्मणि २।३।२२ (५६७)

हेतौ २।३।२३ (५६८)

* निमित्तपर्यायप्रयोगे सर्वासां प्रायदर्शनम् (वा)

अकर्तर्यृणे पञ्चमी २।३।२४ (६०१)

विभाषा गुणेऽस्त्रियाम् २।३।२५ (६०२)

षष्ठी हेतुप्रयोगे २।३।२६ (६०७)

सर्वनाम्नस्तृतीया च २।३।२७ (६०८)

अपादाने पञ्चमी २।३।२८ (५८७)

* ल्यब्लोपे कर्मण्यधिकरणे च (वा)

* यतश्चाध्वकालनिमानंतत्र पञ्चमी तद्युक्तादध्वनः प्रथमासप्तम्यौ कालात् सप्तमी च वक्तव्या (वा)

अन्यारादितरर्तेदिक्छब्दाञ्चूत्तरपदाजाहियुक्ते २।३।२९ (५९५)

षष्ठ्यतसर्थप्रत्ययेन २।३।३० (६०९)

एनपा द्वितीया २।३।३१ (६१०)

पृथग्विनानानाभिस्तृतीयान्यतरस्याम् २।३।३२ (६०३)

करणे च स्तोकाल्पकृच्छ्रकतिपयस्यासत्त्ववचनस्य २।३।३३ (६०४)

दूरान्तिकार्थैः षष्ठ्यन्यतरस्याम् २।३।३४ (६११)

दूरान्तिकार्थेभ्यो द्वितीया च २।३।३५ (६०५)

सप्तम्यधिकरणे च २।३।३६ (६३३)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

* क्तस्येन्विषयस्य कर्मण्युपसंख्यानम् (वा)
* साध्वसाधुप्रयोगे च (वा)
* अर्हाणां कर्तृत्वेऽनर्हाणामकर्तृत्वे तद्वैपरीत्ये च (वा)
* निमित्तात् कर्मसंयोगे (वा)

यस्य च भावेन भावलक्षणम् २।३।३७ (६३४)
षष्ठी चानादरे २।३।३८ (६३५)
स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैश्च २।३।३९ (६३६)
आयुक्तकुशलाभ्यां चासेवायाम् २।३।४० (६३७)
यतश्च निर्धारणम् २।३।४१ (६३८)
पञ्चमी विभक्ते २।३।४२ (६३९)
साधुनिपुणाभ्यामर्चायां सप्तम्यप्रतेः २।३।४३ (६४०)

* अप्रत्यादिभिरिति वक्तव्यम् (वा)

(प्रति परि अनु—एते प्रत्यादयः)

प्रसितोत्सुकाभ्यां तृतीया च २।३।४४ (६४१)
नक्षत्रे च लुपि २।३।४५ (६४२)
प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा २।३।४६ (५३२)
सम्बोधने च २।३।४७ (५३३)
षष्ठी शेषे २।३।५० (६०६)
ज्ञोऽविदर्थस्य करणे २।३।५१ (६१२)
अधीगर्थदयेशां कर्मणि २।३।५२ (६१३)
कृञः प्रतियत्ने २।३।५३ (६१४)
रुजार्थानां भाववचनानामज्वरेः २।३।५४ (६१५)

* अज्वरिसन्ताप्योरिति वक्तव्यम् (वा)

आशिषि नाथः २।३।५५ (६१६)
जासिनिप्रहणनाटक्राथपिषां हिंसायाम् २।३।५६ (६१७)
व्यवहृपणोः समर्थयोः २।३।५७ (६१८)
दिवस्तदर्थस्य २।३।५८ (६१९)
विभाषोपसर्गे २।३।५९ (६२०)
प्रेष्यब्रुवोर्हविषो देवतासम्प्रदाने २।३।६१ (६२१)

* हविषोऽप्रस्थितस्य (वा)

कृत्वोऽर्थप्रयोगे कालेऽधिकरणे २।३।६४ (६२२)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कर्तृकर्मणोः कृति २।३।६५ (६२३)

* गुणकर्मणि वेष्यते (वा)

उभयप्राप्तौ कर्मणि २।३।६६ (६२४)

* स्त्रीप्रत्यययोरकाकारयोर्नायं नियमः (वा)

* शेषे विभाषा (वा)

क्तस्य च वर्त्तमाने २।३।६७ (६२५)

अधिकरणवाचिनश्च १।३।६८ (६२६)

न लोकाव्ययनिष्ठाखलर्थतृनाम् २।३।६९ (६२७)

* उकप्रतिषेधे कमेर्भाषायामप्रतिषेधः (वा)

* अव्ययप्रतिषेधे तोसुन्कसुनोरप्रतिषेधः (वा)

* द्विषः शतुर्वा (वा)

अकेनोर्भविष्यदाधिमर्ण्ययोः २।३।७० (६२८)

कृत्यानां कर्तरि वा २।३।७१ (६२९)

तुल्यार्थैरतुलोपमाभ्यां तृतीयान्यतरस्याम् २।३।७२ (६३०)

चतुर्थी चाशिष्यायुष्यमद्रभद्रकुशलसुखार्थहितैः २।३।७३ (६३१)

—o—

STOCK VERIFY 2020 G.K.V. Library

94340

Recommended By Y. D. Sharma

GURUKUL

9.3.89

25/7/96

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

COMPILED

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar